
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

धारक अंक	शिर्षक	ग्रंथकार	विषय	विस्तार (पुर्ण/ अपूर्ण)	टिकाकार	आकार	पृष्ठे	लिपी	सामग्री	Lines per page	Letters per line	Condition & age (शके/विक्रम सवंत)	Additional Particulars / Remark
M-2597	काण्वशाखा माधवभाष्य यजुर्वेद	-	वेदांग	अपूर्ण	-	3/10	135	संस्कृत	कागद	10	41		

शुक्लयजुर्वेद काण्वशाखा सायनभाष्य

॥१॥

॥श्रीवरस्मृतिर्विजयतेतरां॥ श्रीगुरुभ्योनमः॥ ॐनमः॥ वागीशाद्याःसुमनसः सर्वार्थानामुपक्रमे यन्नत्वा
कृतकृत्याःस्युस्तंनमामिगजाननं॥१॥ यस्यनिश्वसितंवेदायोवेदेभ्योखिलंजगत्॥ निर्ममेतमहंवंदे
द्यातीर्थमहेश्वरं॥२॥ यत्कटाक्षेणतद्रूपंदधद्बुक्कमहीपतिः॥ आदिशत्सायणाचार्यंवेदार्थ
स्यप्रकाशने॥३॥ येपूर्वोत्तरमीमांसेतेव्याख्यायातिसंग्रहात्॥ कृपालुःसायणाचार्योवेदार्थं
व्याकरोत्खलु॥४॥ ऋग्यजुःसामवेदायेव्याख्यातास्तेषुतद्यजुः॥ कृष्णंतैत्तिरीयंकं॥ वैशंपा
यनशिष्येणयाज्ञवल्क्येनतद्यजुः॥ अधीत्यसर्वमाचार्यकोपभीतेनयोगिना॥६॥ गुरुःशि
ष्यमुवाचेत्थंक्रुद्धःकेनापिहेतुना॥ प्रत्यर्पयमदीयांत्वंविद्यामित्यर्पयत्सच॥७॥ योगसाम
र्थ्यतोविद्यांमूर्तीकृत्वावमत्तदा॥ गृहीततद्यजुर्वान्तमितस्तान्गुरुरब्रवीत्॥८॥ अन्नेमेति
त्तिरयोभूत्वाकिंचित्किंचिदसंभ्रमयन्॥ प्रवर्तितःखंडशस्तैर्नसम्यग्बुध्यतेह्यमि॥९॥ आ
ध्वर्यवंक्वचिद्धोत्रंक्वचिदित्यप्यवस्थया॥ बुद्धिमालिन्यहेतुत्वाद्यजुःकृष्णमितीर्यते॥१०॥ याज्ञ

॥राम॥
॥१॥

वल्कस्ततः सूर्यमाराध्यास्माद्दधीतवान् ॥ व्यवस्थितप्रकरणं यजुः शुक्लतदीर्यते ॥ ११ ॥ पौराणिकां
कथामेतां वेदव्याख्यान आदरात ॥ आदिशन्मध्यमाचार्याः कृतावपि मया कृतम् ॥ १२ ॥ कारव
वेदगते विद्यावंशब्राह्मणाईर्यते ॥ यजूंषि शुक्लान्यादित्यान्मुनिः प्राप्येसतिस्फुटं ॥ अथवंशः
पौतिमाषीपुत्रः कात्यायनीपुत्रादित्यारभ्य परमेष्ठी ब्रह्मणो ब्रह्म स्वयंभु ब्रह्मणे नमइत्येतदंतं
काखेरवंबेदस्यांतिमं वंशब्राह्मणं पौतिमाषीपुत्र ४ ॥ कश्चिद्वेदसंप्रदायप्रवर्त्तको मुनिर्मनु
ष्याणां गुरुः सचकात्यायनीपुत्रादेतदधीतवान् ॥ परमेष्ठीशब्देन सत्यलोकप्रवर्त्तकः चतुर्मुखो
भिधीयते ॥ ब्रह्मशब्देनात्रप्रज्ञानं ब्रह्ममापांतु प्रकृतिविद्यात ॥ मापिनं तु महेश्वरमित्यादिवेदवाक्य
प्रसिद्धः परमेश्वरो विवक्षितः ॥ तस्य चेतरेषामिवास्त्यर्थे वेदाध्ययनादिव्यवहारायव्यापारं तं
ऽतस्त्वयंभुशब्देन निगद्यते ॥ तथा च श्वेताश्वतरा आमनन्ति न तस्य कार्यं करणं च विद्यते न
तत्समश्चाप्यधिकश्च दृश्यते पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च नत

स्य कश्चित्पतिरस्ति लोके न चेशिता नैव च तस्य लिंगं। स कारणं करणाधिपाधिपो न चास्य कश्चिज्जनिता
न चाधिपः ४। यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै। तं ह देवमात्मबुद्धिप्रकाशं मु
मुक्षुर्वै शरणमहं प्रपद्य इति नमः। शब्देन चास्य सर्वशाखाशरणस्य गुरुरूपं परविषयनमस्कारं प्रत्ये
गं मंत्रलिंगं द्योत्यते सा च गुरुर्नमस्काररूपा गुरुसेवा विद्याध्ययनतदर्थविचारतदनुष्ठानानां साफल्या
य संपद्यते। तथा स्मृतिः गुरुमुख्याः क्रियाः सर्वा भुक्तिमुक्तिफलप्रदाः ४। तस्मात्सेव्यो गुरुर्नित्यं
मुक्त्यर्थे सुसमाहितैरिति। ईदृशे चास्मिन्नवशाखासरणे वाक्यमेवमाम्नायते। आदित्यानीमानि शु
क्लानि यजूंषि वाजसनेयेन याज्ञवल्क्येनाख्यायंत इति। आदित्येनाध्यापितत्वादादित्यान्युच्य
न्ते वाजसनस्य नामधेयं। अन्नं वै वाज इति श्रुतेः। वाजसनस्य निशुक्लयजूंषि महर्षिभ्यः
पंचदशभ्यः शाखापन्नेभ्यः समंतादुपदिश्यन्ते। एवं सति याज्ञवल्क्येन प्रवर्तिताः शुक्लयजुर्वि
षयाः शाखाः पंचदश संपद्यन्ते। तच्छाखाध्यायिनश्च कण्वाद्यहारिद्रवजाबालादिभिः पंचद

शभिर्नामभिर्लब्धप्रवृत्तिर्यते। जाबाला गौधेयाः काण्वा माध्यंदिनाः शापेयाः तापायनीयाः काल
वाः पिंगलावत्सा आवटिकाः परमावटिकाः पाराशर्याः वैणेयाः बौधेयाः गालवाश्चेति पंचदश
नामानि तत्र काण्वाभिधेन महर्षिणा लब्धो यजुर्वेदशाखाविशेषः काण्वं तच्चाभ्यस्य समर्पयतो
युगांते न्तर्हितान्वेदान्सेतिहासान्महर्षयः लेभिरे तपसा पूर्वमनुज्ञाताः स्वयंभुवेति। यद्यप्य
यं वेदः स्वयमुपरमेष्ठ्यादिपरंपराप्राप्तस्त्वादित्याच्छिष्येण याज्ञवल्क्येन बहुभ्यः शिष्येभ्य उपदिष्ट
स्तथापि महता तपसा तुष्टस्येश्वरस्यानुग्रहात्काण्वसंबंधितयैव लोके प्रख्याप्यते। तमेतं काण्ववे
दमधीयते विदन्ति वेति वा तु तस्य काण्वशिष्यप्रशिष्यादिपरंपरायां वर्तमानाः सर्वेपि काण्व
वाः इत्युच्यन्ते। एवं जाबालजाबालादिषु द्रष्टव्यं। तत्रैतं काण्ववेदाख्यं शुक्लयजुः पूर्वैर्न व्याख्या
तं किं तु तैत्तिरीयाख्यं कृष्णयजुरेव व्याख्यातं। तस्मादिदानीं काण्वशाखा व्याख्यायते। यद्य
प्यनयोः शाखयोरुभयोरध्वर्युवेदत्वप्रयोगः प्रतिपाद्यते तथापि मंत्रपाठविशेषेण प्रयोगवि

॥ सं० हिं० ॥
॥ ३ ॥

शेषैर्वास्ति महान्भेदः ४ । स चानुष्ठानभेदेन व्यवस्थितविषयत्वान्न विकल्प्यते । अत एव स्वाध्यायोऽध्येत
व्य इति स्वकीयशाखाध्ययनमनुष्ठानविशेषाय विहितं । अत्रैतच्चिंतनीयं किमेतत्तद्विधिप्रयुक्तं
माणवकाध्ययनं उताध्यापनविधिप्रयुक्तमिति । तत्र प्राभाकरा मन्यंते । स्वाध्यायोऽध्येतव्य इत्य
यं विधिरष्टवर्षमुपनीतं माणवकमध्ययने प्रवर्तयितुं न प्रभवति । अनधीतवेदस्य तद्विधिवा
क्यपाठाभावात् । व्याकरणार्थज्ञानव्याकरणादिषडंगाध्ययनरहितस्य दूरापेतं बालक्रीडासु नि
रंतरमासक्तस्यानुष्ठाने प्रवृत्तिराशंकितुमप्यशक्या । तस्मान्नायं विधिः प्रवर्तकः ॥ पित्रा
चार्यादिभिः शिक्षितो माणवकः । क्रीडाभ्य उपरतः पित्रादिस्नेहाद्वा स्वयमेवोक्तवाक्यार्थमवगत्या
ध्ययने प्रवर्तिष्यत इति चेत् । एवं तर्हि पित्राचार्यकर्तृकाध्यापनप्रयुक्तं माणवकाध्ययनं न त्व
विधिप्रयुक्तमित्येतादृशमस्मदीयमेव मतं भवताऽङ्गीकर्तव्यं । अध्यापनस्य तु विधिरेवमाम्ना
यते । अष्टवर्षं ब्राह्मणमुपनयीतेति । ननु पूर्वोक्ताध्ययनविधाविवैतस्मिन्नध्यापनविधावपि यो
ग्योधिकारी साक्षान्न श्रूयते ततोध्यापनासिद्धौ तत्प्रयुक्तिरप्यध्ययनस्य दुर्लभेति चेत् । मैव

॥ भाष्य ॥
॥ ३ ॥

मा। उपनयीतित्यनेनात्मनेपदेनाचार्यत्वकामस्याधिकारिणः प्रतीमानत्वात् संमाननोत्संजननाचा
र्यकरणेत्यादिनासूत्रेणाचार्यकरणविवक्षायां नयतिधातोरात्मनेपदं विहितं। एवमप्युपनयनस्यैवाधिकारिहि
ष्टोनत्वध्यापनमितिचेत् नैवं उपनयीत तमध्यापयीतेत्युपनयनाध्यापनयोरेकप्रयोगत्वावगमात्। अय
मेवार्थोमनुनास्मर्यते उपनीय गुरुः शिष्यं वेदमध्यापयेन्नरः। सकल्पं सरहस्यं च तमाचार्यं प्रचक्ष
ते। इत्याचार्यत्वस्यैव व्यतिरेकेणाभिकामेन पित्रादिनानुष्ठेयमध्यापनं माणवककर्तृकाध्ययनव्यतिरे
केणासिध्यति। याचयति याजयतीत्यादौ सर्वत्र यथा लब्धव्यतिरेकेणाशिष्यत्वसाध्यार्थादर्शनात्। अतः पित्रा
दिभिरनुष्ठेयमध्यापनं माणवकाध्ययनस्य प्रयोजकं एवं तर्हि स्वाध्यायोध्येतव्य इत्यस्य विधेः कामाति
रिति चेत् यत्राध्यापनमन्ने विधीयत इति ब्रूमः। अत एव तैत्तिरीयब्राह्मणयज्ञेन पेक्ष्यमाणः प्राच्यां
दिशिप्रामाद्वितार आततस्मिन्नेव प्रकरणे स्वाध्यायस्य महिमानमुपपद्य हृतथाप्या स्वाध्यायप्रशंसाशिनाब
हुधाप्रपंच्य तस्मात्स्वाध्यायमामनंति तस्मात्स्वाध्यायोध्येतव्यो यं यं क्रतुमधीते तेन तेनास्येष्टं भवती
ति तस्मादध्यापनविधिप्रयुक्तं माणवकाध्ययनमित्येवं प्राभाकराणां मतं। अत्रोच्यते। नित्य

स्य ग्रहणाध्यापनस्य काम्येनाध्यापनेन प्रयोजनत्वं न संभवति । ग्रहणाध्यापनस्य नित्यत्वमकरणे प्र
त्यवायश्रवणादवगंतव्यं । तथा च स्मर्यते । योनधीत्य द्विजो वेदानन्यत्र कुरुते श्रमं । स जीवन्नेव शू
द्रत्वमाशु गच्छति सान्वयः इति । अध्यापनं तु कुटुंबपोषणाय गुरुदक्षिणाकामेनानुष्ठीयत इति
। तस्य काम्यत्वं एतदपि स्मर्यते । षण्णां तु कर्मणामस्य त्रीणि कर्माणि जीविका । याजनाध्यापने च
विशुद्धाच्च प्रतिग्रहः इति । यज्ञनयाजनाध्ययनाध्यापनदानप्रतिग्रहेषु षट्सु कर्मसु यजनाध्
ययनदानानि त्रीणि परदृष्टार्थानि याजनादीनि तु त्रीणि जीवनार्थानि दृष्टार्थानि । यस्तु गुरु
दक्षिणार्थमेव स्वमाणवकानध्यापयति तस्याध्यापनं विद्यादानत्वफलादृष्टार्थमस्तु । न
चैतावता एतस्य नित्यत्वं सिध्यति दानस्य धनवस्त्रादिना संपादयितुं शक्यत्वात् । इत्थमनि
त्यमध्यापनं यदा पित्रादयो नानुतिष्ठति तदानीमध्यापनप्रयुक्तं माणवकस्याध्ययनं न निषि
ध्येत । तस्मान्नित्यं ग्रहणाध्ययनं स्वविधिप्रयुक्तमेवेत्यवगंतव्यं । ननु स्वाध्यायोध्येतव्य इत्य
स्य वेदग्रहणपरत्वे विषयत्वात् ग्रहणाध्ययनस्य विधिर्न लभ्यते इति चेत् । बाढं । अत एव प्रकाश

त्माचार्यैर्विवरणं नैयतमध्यापयीतेत्यस्य माणवकाध्ययनविधिपरमुक्तं। अत्राध्यापयीतेतिपदेऽध्या
त्वर्थो णिच्प्रत्ययार्थो विधायकविभक्त्यर्थश्चेति त्रयोऽर्थाः प्रतीयन्ते तेषु णिजर्थः प्रयोज्यस्य ज्ञा
नकामनयैव प्राप्तत्वान्नासौ विधेयः अतः प्राप्तमनूद्य धात्वर्थः प्राप्तोऽस्मिन्वाक्ये विधीयते
।यथाग्निहोत्रं जुहोतीति होमं विधाय दध्ना जुहोतीति वाक्ये प्राप्तहोमानुवादेनाप्राप्तो दधि
गुणो विहितस्तद्वत् तस्मान्माणवककर्तृकाध्यापनविधिपरमेतद्वाक्यं। तच्च तदर्थवाचकला
पाष्टवर्षं ब्राह्मणमुपनयीत तमध्यापयीतेत्येवं परिणतवाक्यं किंच सर्वासु सर्वासु स्मृतिषु ब्रह्मचारिप्र
करणेऽध्यापनविधेर्हि श्रुतत्वेनोपलम्भात् तासु स्मृतिषु विधत एवाध्यापनविधिरित्यनुमीयते तस्मात्तु
विधिप्रयुक्तमध्ययनं तन्न माणवकस्याप्रबुद्धत्वे पित्रादिशिक्षया तदनुष्ठानं सिध्यति यथा
वेदाध्ययनात्प्रागेव पित्रादिशिक्षया संध्यावंदनसमिदाहरणाद्यनुष्ठानं सिद्धमिति तद्वत्।
तस्मात्स्वाध्यायोऽध्येतव्य इत्यस्य रूपमेव विधिः कल्प एव शिष्याणां स्वशाखाविशेषाध्ययने प्रवर्तनीय
तीति सिद्धं। इदमपरं चिंत्यते। किमेतदध्ययनमदृष्टार्थमुत दृष्टार्थमिति। तत्र दृष्टोऽदृष्टार्थं बा

हारनिष्ठादिषु वैदिष्ठि वैत्तकामोधीयीतेत्येवमाद्युक्तविध्यदर्शनाद्धि देन विहितस्याध्ययनस्य संध्या
वंदनादिवददृष्टार्थत्वं युक्तं । स्वर्गकामो ज्योतिष्टोमेन यजेतेत्यादि विधिवैदिकविध्यदर्शनाद्धि दे
व विहितस्याध्ययनस्य संध्यावंदनादिवददृष्टार्थत्वे तत्कामोधीयीतेत्येवमदृष्टस्याध्ययनःफ
लविशेषानभ्युपगत इति चेत्तत्र त्वध्ययनस्य स्वाध्याये ब्रह्मयज्ञाध्ययने ऽभ्युपगमाद् घृतकुल्या
दिफलमत्रापि दृष्टापत्तौ । ब्रह्मयज्ञप्रकरणे ह्येवं श्रूयते । यदृचोऽधीते पयसः कुल्या अस्य
पितॄन्स्वधा अभिवहंति यद्यजूंषि घृतस्य कुल्याः यत्सामानि सोम एभ्यः पवते यदथर्वांगि
रसो मधोः कुल्येतिमवित ब्रह्मयज्ञफलं महणाध्ययनेऽपि दृष्टव्यं । न चादृष्टचोदितं दृष्टमिति
वाच्यं जैमिनीयपयोः सद्यमाद्यमाध्यायेयोरतिदेशस्येव बहुधा विस्तृतत्वात् । तत्र कर्ममीमांसानामपि
तिदेशो निरूपितः । घृतकुल्यादिवाक्यं न तु कर्मणावबोधकं किंतु फलकथनेन तावकोऽर्थवा
दः ईदृशस्यातिदेशो न कापि दृष्ट इति चेन्न । मैवं । वैयासिके तु गुणोपसंहारपादे हानोपायनशब्द
शेषत्वादिति सूत्रितत्वस्य दृष्टत्वात् । तथाहि कौषीतकिनो ब्रह्मविद्यापरिसमाप्तौ सुकृतदु

ष्टतयोरितरेतरैरनुकूलैः प्रतिकूलैश्च स्वीकारमिष्टमामनंति तत्सुकृतदुष्कृते विधुनुते तत
स्य प्रियाः ज्ञातयः सुकृतमुपयंत्यप्रियादुष्कृतमिति श्रुत्याथर्वणिकास्तत्परित्यागमेवामन
न्ति नलितरस्वीकारस्तदीयं चवाक्यमेतत् । तदा विद्वान्पुण्यपापे विधूय निरंजनः परमं साम्य
मुपैतीति । तत्र भगवान्बादरायणः कौषीतकीशाखायां कृतस्येतरस्वीकारस्याथर्वणशाखा
यामुपहारे निराकृतवानसौयं फलवाक्यरूपस्यार्थवादस्यातिदेशः तद्वत्तत्कुमादिकमति
दिश्यतां अथवा विश्वजिन्न्यायेन स्वर्गो न तु हणाध्यपन फलत्वेन कल्पनीयः । तथा हि ।
विश्वजिता यजेतेति यागविधिरेवाम्नातो न तत्र फलविशेषः तस्मात्तत्राधिकार्यभावाद
ननुष्ठाने प्राप्ते तत्समाधानं भगवान् जैमिनिः सूत्रयत । सः स्वर्गः स्यात्सर्वान्प्रत्यविशि
ष्टत्वादिति । अस्यायमर्थः ॥ अधिकारहेतुत्वेनायं फलविशेषोपेक्षितः । सोयं स्वर्गेण
भवेत्कुतः फलकामिनः सर्वान्पुरुषान्प्रति स्वर्गस्य फलस्य साधारणत्वादिति । स्वर्गो
नाम सुखातिशयः । तथा चोक्तं । दुःखेन यन्न संभिन्नं न च ग्रस्तमनंतरं । अभिलाषोपनीतं

स०हि० ॥ ६ ॥

नीतं च सत्सुखं स्वर्गपदाभिधमिति ॥ अतोत्रापि तैश्च न्यायेन माणवकाध्ययनस्य स्वर्गः फलमित्यदृष्टार्थ
मध्ययनमिति प्राप्ते ब्रूमः ॥ दृष्टफलसंभवे सत्यदृष्टकल्पनमन्याय्यं ॥ अन्यथा व्रीहीनवहन्तीत्यत्रा
पि तंडुलनिष्पत्तिलक्षणं दृष्टफलं बहुप्रयाससाध्यत्वादुपेक्ष्य सकृन्मुसलप्रहाररूपं प्रयासरहित
मवघातमदृष्टार्थं पुरुषोनुतिष्ठेत् । तथा सति शाल्यीपतंडुलाभावेन पुरोडाशासिद्ध्या यागविधयो बाध्ये
रन् ॥ तस्मात् दृष्टफलसंभवे तदेवादरणीयं ॥ संभवति चाध्ययनस्याक्षरप्राप्तिरूपदृष्टफलं ॥ न तस्य
रक्षराप्तिरूपदृष्टफलं गुरुपूर्वकाध्ययनव्यतिरेकेण लिखितपाठेनापि लभ्यते ॥ अपुर्वेद्वारिम
त्रपाठस्य तथादर्शनात् । तथा सति किमनेनाध्ययनविधिनेति चेत् ॥ उच्यते नियमादृष्टार्थोय
मध्ययनविधिः यथा तंडुलनिष्पत्तिरूपस्य दृष्टफलस्य विक्रियन खविदलनादिनापि सिद्धौ नि
यमादृष्टार्थोऽवघातविधिस्तद्वत् ॥ तस्मादक्षरप्राप्तिः प्रत्यक्षोध्ययनविधिरिति सिद्धं ॥ तदिदं शांक
रदर्शनानुसारिणां मतमसहमानो भट्टगुरू मन्येते ॥ भवत्वध्ययनस्याक्षरप्राप्तिः फलं ॥ तथापि
भरतामपि विधिः पर्यवस्यति किंतु प्राप्तैरक्षैरर्थोपमर्थं च बोधस्तस्मिन्नु विधिः पर्यवस्यति ॥ अर्था

॥ भाष्य ॥
॥ ६ ॥

वबोधेनानुष्ठाने निष्पन्ने सति पुरुषार्थस्याग्निहोत्रादिफलस्य स्वर्गस्य सिद्धेः ॥ अक्षरप्राप्तिमात्रेणा तु
नाग्निहोत्राद्यनुष्ठानफलं सिध्यति । तस्मात्फलवदर्थावबोधेऽध्ययनविधेः पर्यवसानमवगंतव्यं ।
यद्यपि विहितस्वाध्यायाध्ययनमात्राद्विहितानीषत्तनेषु सर्वेष्वध्यापकेषु अर्थावबोधो न दृष्टस्तथापि नि
निगमनिरुक्तव्याकरणाद्यंगपरिशीलनवत्सु दृष्ट एवार्थावबोधः । व्याकरणादिपरिशीलनमात्रेणा
र्थप्रतीतिमात्रे सत्यपि तन्निर्णयो न लभ्यते । अक्ताः शर्करा उपदधातीत्यादिवाक्येषु केनद्रव्येणा
क्ताः स्युरिः संदेहस्यानपगमादिति चेत् । एवं तर्हि निर्णायकं मीमांसाशास्त्रमन्येनाध्ययनविधि
नार्थनिर्णयाय स्वीक्रियतां । यथावघातविधिस्तंडुलनिष्पत्तिफलसिध्यर्थः अवघातस्यावृ
त्तिं स्वीकरोति तद्वत्स्मात्फलवदर्थावबोधपर्यंतस्य स्वाध्यायाध्ययनविधिः ॥ नचाक्षरप्राप्तिमात्र
इति भ्रमः । किमयमर्थावबोधः स्वयमेव पुरुषार्थः स्वर्गादिवत् ॥ उताग्निहोत्राद्यनुष्ठानद्वारेणा
॥ नाद्यः ॥ अननुष्ठीनवैयर्थ्यप्रसंगात् ॥ द्वितीये तु यथार्थावबोधस्यानुष्ठाने हेतोः परंपरया पुरु
षार्थहेतुत्वे एवमर्थावबोधहेतुभूताया अक्षरप्राप्तेरपि परंपरया पुरुषार्थहेतुत्वाद्विधिरक्षरप्राप्तोप

॥ सं०हि० ॥
॥१०॥

यैवमस्तु किंचानुष्ठानद्वारकस्वर्गफलोपेतार्थावबोधविधिः पर्यवसानं बृहतः कृत्स्नवेदाध्ययनेन सिध्ये
त् । राजसूयाश्वमेधादावनधिकारिणो ब्राह्मणस्य तत्फलत्वपर्यन्तार्थावबोधासंभवात् । अक्षरप्रा
प्तिफलं वा इति स्तुतेः कृत्स्नवेदाध्ययनेन सिध्यति । अक्षरप्राप्तिर्ब्रह्मयज्ञजपहेतुत्वात् । तत्र ब्राह्म
णोपि राजसूयाश्वमेधादिवेदभागे मार्गांतरं ब्रह्मयज्ञजपं करोत्येव विधेरर्थावबोधपर्यन्तत्वा
भावे कथमर्थावबोधसिद्धिरिति चेत् । काम्यनाटकादिग्रंथेषु वैदिकविधिमंत्रेणापद्यार्थावबो
धस्तद्वद्भविष्यति । विध्यपेक्षाभावेर्थावबोधप्रयुक्तमदृष्टं किंचिदपि न सिध्यतीति चेत् । मैवं ।
अर्थावबोधस्याध्ययनविधिप्रयुक्तत्वाभावेपि विध्यन्तरप्रयुक्तत्वाभावेपि विध्यन्तरप्रयुक्तत्वं भवत
सादृष्टस्य सिद्धेः । विध्यन्तरं चैवमाम्नायते ब्राह्मणेन निष्कारणो धर्मः षडंगो वेदोध्येयो ज्ञेय
एवेति । योर्थज्ञ इत्सकलं भद्रमश्नुते नाकमेति ज्ञानविधूतपाप्मेति च । तस्मादध्ययनविधि
पाठमात्रपर्यवसायी । अर्थावबोधस्तु विध्यन्तरप्रयुक्त इति सिद्धं । अथेदानीं विहितार्थाव
बोधसिद्ध्युपकारकः सर्ववेदो व्याख्यायते । क एवसंबंधश्चवेदस्य पूर्वमेव दर्शितः । काम्यसंबंधिश्चरख्या

॥ भाष्य ॥
॥१०॥

यावेदत्वं वा लौकिकपुरुषार्थोपायवेदनहेतुत्वाद्वेदत्वं तथा चोक्तं प्रत्यक्षेणानुमित्या वा यस्तूपायो न
बुध्यते ॥ एवं विदंति वेदेन तस्माद्वेदस्य वेदता ॥ तस्मिंश्च वेदे द्वौ कांडौ कर्मकांडो ब्रह्मकांडश्च ॥ बृह
दारण्यकाख्यो ग्रंथो ब्रह्मकांडं तद्व्यतिरिक्तशतपथब्राह्मणसंहिताचेत्यनयोर्ग्रंथयोः ॥ कर्मकांड
त्वात्तत्रोभयत्राधानाग्निहोत्रदर्शपौर्णमासादिकर्मणामेव प्रतिपाद्यत्वात् । द्वे बृहदारण्यके तु तत्त्व
तीयाद्यध्यायेषु ब्रह्म प्रतिपाद्यते ॥ अतः कर्मब्रह्मणी वेदस्य विषयस्तद्वबोधः प्रयोजनं बोद्धा
पुरुषश्चाधिकारी ॥ तत्र प्रयोजनं जनकं विषयेण जन्यते ॥ तयोर्जन्यजनकभावः संबंधः प्रयोजनाधि
कारिणोरर्थ्यमानार्थित्वं संबंधः । अधिकारिविषययोस्तु प्रयोजनद्वारेणोपकार्योपकारत्वं सं
बंधः ॥ इत्थं विषयप्रयोजनाधिकारिसंबंधरूपस्यानुबंधचतुष्टयस्य विद्यमानत्वान्न तद्दोषप्र
माण्यं जैमिनिना प्रथमपादे प्रपंचितत्वाच्च वेदो व्याख्यामुपोद्घातस्तस्मिंश्च वेदे कर्मकांडः प्रथमप्रमा
णातः ॥ पूर्वपक्षे ब्रह्मणोऽभ्यर्हितत्वात् ब्रह्मकांडस्यैव प्राथम्यमुचितं तथापि कर्मभिः साध्यां चि
त्तशुद्धिमंतरेणापुरुषस्य ब्रह्मकांडेऽधिकाराभावात् अधिकारहेतुकर्मप्रतिपादकः ॥ कांडः प्रथम

माम्नातः कर्माणि चतुर्विधानि नित्यं नैमित्तिकं काम्यं निषिद्धं चेति तत्र नित्यनैमित्तिकयोरनुष्ठानान्नि
षिद्धसेवनाच्च प्रत्यवाय उत्पद्यते तथा च याज्ञवल्क्यः स्मरति। विहितस्याननुष्ठानान्निन्दितस्य च
सेवनात् अनिग्रहाच्चेन्द्रियाणां नरः पातनमृच्छतीति तेन च प्रत्यवायेन बुद्धिमांद्ये सति नित्यानित्य
वस्तुविवेकवैराग्यादीनामनुदयात् ब्रह्मविविदिषा पुरुषस्य न जायेत तस्माद्विविदिषाहेतुत्वेन नित्य
नैमित्तिककर्मणा बृहदारण्यके समाम्नातेति तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दा
नेन तपसाऽनाशकेनेति तदनुष्ठानेन तमोगुणान्वयि चित्तमालिन्यापगमे सति सत्वगुणाद्रूपस्य
नैर्मल्यस्योत्पादितैर्यैः कैवैराग्यसंपन्नो सत्यात्परमपुरुषार्थरूपे ब्रह्मसतत्त्वविवेकेर्निभिरुचिर्जाय
ते कारीर्यादीष्टि कामायजेत चैत्रया यजेत पशुकाम उत्साहीनि तु काम्यकर्माणि। परमपुरुषार्थसाध
नत्वाभावि पिसाभाविकापन्नस्तानां पुरुषाणां वैदिकमार्गे फलसंवादेन श्रद्धानुत्पादयितुमेवाम्ना
यते तस्मात्तानि वेदप्रासंगिकानि परमतात्पर्यविषयस्तु वेदस्य नित्यकर्मस्वेव तस्मात्कर्मकाण्डग
तयोः संहिताशतपथयं थयोः प्राधान्येन नित्यकर्माण्याम्नातानि तत्र शतपथब्राह्मणस्य मंत्रव्या

स्यावस्यसूत्रपत्नाध्याय्येषमंत्रप्रतिपादकः संहितायास्तत्पूर्वभाविताध्यायमो भवति तस्मिंश्च संहिता
यो चत्वारिंशदध्यायास्तेषु प्रथमद्वितीययोरध्याययो र्दर्शपौर्णमासौ तृतीये त्वाधानाग्निहोत्राग्न्युप
स्थानचातुर्मास्यानि। चतुर्थपंचमषष्ठसप्तमाष्टमनवमेषु षडग्निष्टोमः दशमे वाजपेयः। एका
दशे राजसूयः। द्वादशमारभ्य विंशान्तेषु नवस्वग्निचयनं। एकविंशद्वाविंशत्रयोविंशेषु त्रिषु सौ
त्रामणी। चतुर्विंशमारभ्य पंचविंशषड्विंशसप्तविंशेषु चतुर्ष्वश्वमेधः। अष्टाविंशमारभ्य त्रयोविं
शांतेषु षट्सु तत्र तत्र विप्रकीर्णलिंगविनियोज्या अनारभ्याधीता मंत्राः। चतुस्त्रिंशत्पंचत्रिंश
योः पुरुषमेधः षट्त्रिंशे शान्तिः। सप्तत्रिंशाद्यत्रिष्वेकोनचत्वारिंशान्तेषु प्रवर्ग्यः। चत्वारिंशे चत्र
स्य विद्या। ननु संहितायामाहो कर्मान्तरं परित्यज्य दर्शपौर्णमासेष्टिरेव कुतः प्रतिपाद्यते इति चे
त्। प्रकृतित्वान्निरपेक्षत्वाच्चेति ब्रूमः। प्रकर्षेणांगोपदेशो यत्र क्रियते सा प्रकृतिः। कृत्स्नांग
विषयत्वमुपदेशस्य प्रकर्षः। विकृतिषु विशेषांगमात्रस्योपदेशः क्रियते। अंगान्तराणि तु प्र
कृतेरतिदेशेनाप्तत उपदेशस्य प्रकर्षाभावः। प्रकृतिस्त्रिविधा। अग्निहोत्रमिष्टिः सोमश्चे

॥ संहिता ॥
॥ ९ ॥

ति । त्रिष्वप्येतेष्वन्यनिरपेक्षेण स्वांगजातानां सर्वमुपदिष्टत्वात्तत्र सोमयागस्य स्वरूपेणान्यैरनपेक्षस्येष्यप्यं
गेषु दीक्षणीयाप्रायणीयादिषु दर्शपूर्णमासेष्टिमपेक्षत्वात्पूर्वं भावित्वमुक्तं । इष्टेस्तु सोमया
गैनैरपेक्ष्यात्सोमात्प्राचीनत्वं युक्तं । पशावप्यग्निहोत्रस्य स्वरूपांगेषु वा नात्यन्तापेक्षा तथाप्यग्नि
सिध्यपेक्षत्वादाहवनीयाद्यग्नीनां च पवमानेष्टिसाध्यत्वात् पवमानेष्टीनां दर्शपौर्णमासविकृ
तित्वात्तत्परंपरयाग्निहोत्रस्य दर्शपूर्णमासापेक्षास्तीति प्रथमभावित्वं युक्तं दर्शपौर्णमासयो
रग्निसाध्यत्वादग्निसाध्यत्वाद्धकमाधानं प्रथमतो वक्तव्यमिति चेत् । मैवं । धौनौ नैमात्रे
णाग्नयः सिध्यंति किंतु पवमानेष्टिभिरिति । तासामिष्टीनां दर्शपूर्णमासविकृतित्वात्साक्षाद्दर्
शपूर्णमासावपेक्षते । दर्शपूर्णमासौ त्वग्निहोत्रपवमानेष्टिसापेक्षावपि न साक्षात्पवमाने
ष्टीरपेक्षेते । अतो निरपेक्षत्वाद्दर्शपूर्णमासेष्टिरेव प्रथमं वक्तव्या । ऋग्वेदसामवेदयोर्दर्श
पूर्णमासेष्टिर्नाम्नातेति चेत् । बाढं । यजुर्वेदे मे पक्षाद्दर्शपूर्णमासयोरादित्वमुक्तं । कर्मकांड
विषये यजुर्वेदस्यैव प्राधान्यत्वात् । आनुपूर्व्या कर्मणां स्वरूपं यजुर्वेदे समाम्नातं । तत्र तत्र वि

॥ भाष्य ॥
॥ ९ ॥

शेषेपक्षापामेपेक्षितत्वाद्याज्यापुरोनुवाक्यादयऋग्वेदेसमाम्नायंते॥स्तोत्रादीनितुसामवेदे॥तथासतिभि
न्नस्थानीयोयजुर्वेदः॥विप्रस्थानीयावितरौतस्मात्कर्मसुयजुर्वेदस्यप्राधान्यंतस्मिंश्चदर्शपूर्ण
मासेष्टिरादौसमाम्नाता॥तस्यांचेष्टाविषिलादयोमंत्राः॥तेषांचमंत्राणांसामान्यलक्षणंनापविल्ल
णमिषेत्वेत्यैद्वितीयाध्यायप्रथमपादेद्वाभ्यामधिकरणाभ्यामित्थंविचारितं॥अहेबुध्न्यमंत्रइतिमंत्रलक्ष
णंनास्त्यसत्वित्वास्मनास्तितस्याव्याहरवभ्रणात॥याज्ञिकाणांसमाख्यातंलक्षणंदोषवर्जितं तेनुष्ठा
नस्मारकादौमंत्रशब्दंप्रयुंजतेइति॥आधानप्रकरणेइदमाम्नायतेबुध्न्यमंत्रेणोपायेपेति॥तत्रमंत्र
स्यलक्षणंनास्तिकुतः॥अव्याप्त्यतिव्याप्त्योर्वारयितुमशक्यत्वात॥विहितार्थस्याभिधायकोमंत्र
इत्युक्तेवसंतायकपिंजलानालभतइत्यस्यमंत्रस्यविधिरूपत्वादव्याप्तिः॥मननहेतुर्मंत्रइत्युक्ते
ब्राह्मणेप्यतिव्याप्तिरितिचेत॥मैवम्॥याज्ञिकसमाख्यानस्यनिर्दोषलक्षणत्वात॥समाख्यानमनु
नुष्ठानस्मारकादीनांमंत्रत्वगमयति॥उरुप्रथस्वेत्यादयोनुष्ठानस्मारकाः॥अग्निमीळेपुरोहि
तमित्यादयस्तुतिरूपाः॥इषेत्वेत्यादयः शंताः॥अग्नआयाहिवीतयइत्यादयआमंत्रणोपेताः

॥म०हि०॥
॥१०॥

॥एवमन्येषूदाहार्याः॥ द्वैधे सति विजातीयेषु समाख्यामन्तरेणानामः कस्मिन्समाख्यानं मंत्रे लक्षणा
।ऋगादिलक्षणानां पूर्वोक्तत्वात्परस्पराहानेके सामयजुषां लक्षणान्कुर्यादिति शंकितेपरस्परसंगीतिः प्र
श्लिष्टपाठः स्पष्टसंकरः दृष्टमाम्नायते। अहेबुध्न्यमंत्रंमेगोपायमृषयस्त्रैविदाविदुः ऋचः
सामानियजूंषि शब्देनवेदानविदंतीतित्रिविदास्तं बधिनोध्येतारस्त्रैविदाः। तेचयंमंत्रमृगादिरूपेण
त्रिविधंविदंति। तंगोपायेतियोजना। त्रिविधा ता ऋक्सामयजुषा व्यवस्थितेलक्षणंनास्तिकुतः
सांकर्यस्यदुष्परिहरत्वात्। अध्यापकप्रसिद्धेषु ऋग्वेदादिषुपठितोमंत्रऋगादिरूपइतिहिव
क्तव्येतच्चसंकीर्णंतथाहि। अग्नयेमथ्यमानायानुब्रूहिहविर्धानाभ्यांप्रोह्यमाणाभ्यामनु
ब्रूहीत्यादीनियजूंषिऋग्वेदेसमाम्नातानि। देवोवःसवितापुनात्वच्छिद्रेणपवित्रेणवसोःसूर्य
स्यरश्मिभिरित्ययंमंत्रोयजुर्वेदेसंप्रतिपन्नयजुषांमध्येपठितः। नचतस्ययजुष्ट्वमस्तिऋग्रूप
त्वेनतद्ब्राह्मणेव्यवहृतत्वात्। सावित्र्यर्चेतिहिब्राह्मणं। एतत्सामगायन्नास्तइतिहिप्रतिज्ञायहाउ
हाउइत्यादिकंसामयजुर्वेदेगीतं। अक्षितमस्यच्युतमसिप्राणसंशितमसीतित्रीणियजूंषिसामवे

॥भाष्य॥
॥१०॥

हि समाम्नायंते। तस्मान्नास्ति लक्षणमिति चेत् न। पराहीनामसंकीर्णलक्षणत्वात्। पादेनार्धर्चेनोपेता

वृत्तबद्धा मंत्रा ऋचः। गीतिरूपा मंत्राः सामानि। वृत्तगीतिवर्जितत्वेन प्रश्लिष्टपठिता मंत्रा यजूं

षि इति व्यवस्थितेलक्षणं। प्रथमाध्यायस्य द्वितीयपादे इमं त्रैविध्यं अविवादितं मंत्रा उरु प्रथस्वेति किं

महत्वैकहेतवः यागे घृतपुरोडाशप्रथनादिरूपा भासकाः ब्राह्मणेनाम्नाताः तद्वन्मंत्राः पुण्यक

हेतवः न तद्वीद्वासमस्य दृष्टत्वात् दृष्टवरमदृष्टं तदिति। उरु प्रथस्वेत्यस्यैकस्मिन्मंत्रे। तस्यायम

र्थः। भो पुरोडाश त्वमविपुलता यथा भवति तथा कपालेषु प्रथस्वेति। हि दृष्टा मंत्रा यागप्रयोगे

षु स्वप्रमाणात्र दृष्टमेव जनयंति न त्वर्थप्रकाशमात्रं तदुच्चारणं पुरोडाशप्रथनलक्षणार्थ

स्य ब्राह्मणवाक्येनापि भासमानत्वात्। उरु प्रथस्वेति पुरोडाशं प्रथयतीति हि ब्राह्मणवाक्यमिति

चेत् नैतद्युक्तं। अर्थप्रत्यायनस्य दृष्टप्रयोजनस्य संभवे सति केवलादृष्टस्य कल्पयितुमश

क्त्वात्। तस्माद्दृष्टमर्थानुस्मरणमेव यागप्रयोगे मंत्रोच्चारणस्य प्रयोजनं ब्राह्मणवाक्येन व्यर्था

नुस्मारणासंभवे मंत्रैर्वानुस्मरणीयमिति यो नियमस्तस्यामदृष्टप्रयोजनमस्तु। ननु मंत्रा

राणामनुष्ठेयार्थस्मारकत्वाक्क्वचिद्व्यभिचरितं। तथा हि दिवो वा विष्णउत वा पृथिव्या महो वा विष्णउरोरन्तरि
क्षाद्‌उभा हि हस्ता वसुना पृणस्वा प्रयच्छ दक्षिणादोत सव्यादिति यस्मिन्मन्त्रे धनमाशास्ते इत्युपम
र्थः प्रतीयते ऽनुष्ठेयार्थस्तु शकटविशेषस्थापनाया धारभूतकाष्ठस्थापनं। तत्तु ब्राह्मणेन वि
धीयते दिवो विष्णउत वा पृथिव्या इत्याशीर्वतयर्चा दक्षिणस्य हविर्धानस्य मेथीं निहन्तीति
नायं दोषः। अस्याधिकरणस्य लिंगाविनियोगविषयत्वादुदाहृतस्य मन्त्रः स्कसाविनियुज्यते
।यएतेर्थस्मरणाय प्रयोक्तव्या मंत्राः संतितेषु सर्वेषु आम्नायादिकं विस्तितव्यं। अतएवछंदोगा
आम्नायाद्यवेदनेबाधमभिधाय तद्दूहनविधिमानयंति। योहवा अविदितार्षेयच्छंदोदैवतब्रा
ह्मणेन मंत्रेण याजयति वाध्यापयति वा स्थाणुवर्छति गर्तं वा पद्यत इत्यादि वेदने बाधः। तस्मा
देतानि मंत्रे मंत्रे विद्यादिति वेदनविधिः। तथा कात्यायनाचार्योप्याह। एतान्यविदित्वा योधीते
ऽनुब्रूते जपति जुहोति यजते याजयति तस्य ब्रह्म निर्वीर्यं यातयामं भवत्यथ विज्ञायैतानि योधीते
तस्य वीर्यवत्तरं भवति जपित्वा हुत्वा इष्ट्वा तत्फलेन युज्यत इति। अस्या

स्कमंत्रब्राह्मणात्मिकायाः काण्वशाखायाः सर्वस्याश्चापिस्वयंभुब्रह्मारभ्यपौत्तिशाखापर्यन्ताः
संप्रदायप्रवर्त्तकाऋषयस्त्वेषुवंशब्राह्मणेषुमंत्रविशेषेषुस्पष्टमाम्नाताः कांडविशेषेषुमंत्रवि
शेषेषुचाप्येस्मिद्यास्तत्तदृषिविशेषाब्राह्मणागतास्यापिकाभिरनुक्रमणिकादिग्रंथेभ्यश्चावगंत
व्याः। तत्परिज्ञानेपिवंशोक्तानामृषीणामवगतत्वाद्वेदनप्रयुक्तोबाधोनास्तिऋषिविशेषाणा
मपिविज्ञानेफलाधिक्यमस्तिअतएववैर्यवरांभवतीतिकात्यायनवाक्यंपूर्वमुदाहृतंताश्छं
स्कमंत्राणामिषेत्वादीनामनियताक्षरत्वात्तासेवपित्तुपञ्जुषामपिछंदरूढंछंदतितैःकात्याय
नोक्तसर्वानुक्रमणिकायांपंचमाध्यायमभ्यस्यतदेवगतत्तन्मंत्रछंदोनुसंधेयं॥ देवतातुमंत्रा
र्थप्रतिपाद्यासाचमंत्रलिंगादवगंतव्यायेषुमंत्रेष्वग्नीन्द्रादयश्श्रुतनाःप्रतिपाद्यंतेतेष्वग्न्यादी
नांदेवतात्वंविस्पष्टं। येषुमंत्रेषुपालाशशाखौशौबर्हिर्जुह्वादयोचेतनाःप्रतिपाद्यन्तेतेष्वपि
शाखादिशब्दाभिधेयास्तत्तद्व्याभिमानिन्यश्चेतनादेवताश्चावगंतव्याअतएवभगवान्बाद
रायणोमदब्रवीदापोब्रूवन्नित्यादिग्रंथेचेतनइष्टेषुचेतनोचितव्यापारमुपपादयितुमभिमान

॥ सं०हि० ॥
॥ १२ ॥

व्यपदेशःस्यादितिसूत्रयामास।एवंचसतीषेत्वादीनांमंत्राणांमध्येकेचिद्देवतापथ्योक्तनीत्यासुबोधाः।
तस्मा— ग्रंथबाहुल्यभीरुभिरस्माभिःप्रतिमंत्रंनोदाह्रियते।विनियोगज्ञानायतुप्रतिमंत्रंकात्याय
नसूत्रवाक्यमुदाह्रियते।मंत्रार्थज्ञानायकएवसंबंधिब्राह्मणंतत्रयथासंभवमुदाहरामः॥ ॥त
दर्थावबोधदा— यशाखांतरविषयमप्यापस्तंबसूत्रेबौधायनसूत्रेतैत्तिरीयब्राह्मणेचक्वचित्क
चिदुदाहरामः॥दर्शयागंचिकीर्षुरमावास्यायांप्रातर्नित्याग्निहोत्रंकृत्वाततोदर्शयागार्थंममा
ग्नेवर्चइत्यादिभिर्मंत्रैर्वह्निषुसमिदाधानरूपमन्वाधानंकृत्वावत्सापाकरणंकुर्यात्।किमिदं
वत्सापाकरणमितिचेत्।संतिदर्शयागेत्रीणिप्रधानहवींषि।आग्नेयोष्टाकपालऐंद्रंपयइतित
त्रप्रतिपद्दिदधिहोतुंतस्यदध्नःसंपादनायामावास्यायांरात्रौगावोदोग्धव्याः।तद्दोहनार्थंप्रातः
कालेलौकिकदोहादूर्ध्वंस्वमातृभिःसहसंचरंतोवत्सामातृभ्योपाकरणीयाः।तदिदंवत्सापा
करणं।एतच्चैकएवमहर्षिःस्वकीयब्राह्मणेविधातुमिदंवाक्यंपठति।सैवेपर्णशाखाकरस्मी
हवयावत्सानपाकरोतीति।तदेतदुपपादयितुमर्थवादेगायत्र्याकृतसोमाहरणंअभिधायतदाहर

॥ भाष्य ॥
॥ १२ ॥

णाविल्लापांपप्रसिद्धपायाः गायत्र्याः पक्षविशेषः सोमवल्याः पर्णं च भूमावपतत् । तयोरन्यतरपर्णनाम
कः पलाशवृक्षोऽभूत् । अतः सोमसंबंधाद्गायत्रीसंबंधाच्च पलाशवृक्षः प्रशस्त इत्यभिधीयते । तं
विधिमेवमुपसंहरति । पर्णमचिच्छेद गायत्र्या वा सोमस्य वा राज्ञस्तत्पतितत्वात्पर्णोभवत् । तस्मात्
पर्णनामपत्रं किंचित्सोमसंपृक्तं । तस्मात्पर्णशाखया वत्सानपाकरोतीति । गायत्र्या सोमाह
रणं तु कद्रूश्चवैसुपर्णी चेत्यादौ तैत्तिरीयब्राह्मणे तानुवाके सोमो वै राजा गंधर्वेष्वासीदित्यादौ च
च ब्राह्मणे प्रपंचितं । पलाशवृक्षस्य सोमसंबंधिपर्णोद्भूतत्वेनाखिलवृक्षजातिषु ब्राह्मणत्वेब्र
ह्मरूपतया प्रशस्तत्वात् ॥ तदीयशाखया वत्सापाकरणं तैत्तिरिः स्वकीयब्राह्मणेपि स्पष्टमित्यमु
वाच । तत्तीयस्यामितो दिवि सोम आसीत् ॥ तदीयशाखया वत्सापाकरणं तैत्तिरिः स्वकीयब्र
ह्मणेपि स्पष्टमित्यमुवाच । तत्तीयस्यामितो दिवि सोम आसीत्तं गायत्र्याहरत् । तस्य पर्णमच्छिद्य
त । तत्पर्णोभवत् ॥ तत्पर्णस्य पर्णत्वं ब्रह्म वै पर्णः । पर्णशाखया वत्सानपाकरोति । ब्रह्मणैवैना
नपाकरोतीति ॥ न चात्र सोमकन्यायाः पत्रमात्रस्य कथं वृक्षस्य संपत्तिरिति विस्मेतव्यं । विधातुरी

॥ सं०हि० ॥
॥ २३ ॥

म्परस्याचिंत्यशक्तित्वात्। अन्यथा बीजाद्वृक्षस्तत्रापि कबीजं कुत्र वा वृक्ष इत्ययं विस्मयः केन वा
पेत। सर्वत्र परीक्ष्यो वृक्षः प्रसज्येतेत्ययमतिप्रसंगोपीश्वरसंकल्पाभावेन परिहर्त्तव्यः। स च सं
कल्पः कार्यैकसमाधिगम्यः। तस्माद्दृष्टार्थे कुतर्कैर्न चोदनीयं। तस्याः पर्णवृक्षशाखायाश्छेदनेन
प्रथममंत्रे कात्यायनः स्वकीयसूत्र इत्थं विनियुङ्क्ते। पर्णशाखां छिनत्ति शामिलीं चेषे त्वेत्यूर्जे त्वे
ति वा छिनद्मीति चोभयोः साकांक्षत्वात्सन्नयामि चोत्तर इति। अस्यायमर्थः। पलाशशाखा
शमीशाखा चात्र विकल्पिता तच्छेदने इषे त्वोर्जे त्वेति चैतौ मंत्रौ विकल्पितौ। तयोः क्रिया
पदाकांक्षत्वादर्थावबाधाय छिनद्मीति पदमध्याहर्त्तव्यं सोयमेकः पक्षः। इषे त्वेति छेदना
र्थो मंत्रः। ऊर्जे त्वेति सन्नमनार्थो मंत्रः सन्नमनं नाम ऊर्ध्वकरणं तदिदं पदान्तरमिति। अत्र बोधायन उ
भयोर्वाक्ययोरेकमंत्रत्वमाश्रित्य सौविनियोगमेवमाह सन्नयतः पालाशशाखां शमीशाखां वाह+
तं मंत्रेण छेदने विनियुङ्क्ते तामाच्छिनत्तीषे त्वोर्जे त्वेति इति। आपस्तंबस्तु तदेतदभिधाय मंत्रभेदप
क्षमपि कंचिदाश्रित्य+ इतीषे त्वोर्जे त्वेति तामाच्छिनत्त्यपि वेषे त्वेत्याच्छिनत्त्यूर्जे त्वेति सन्नमय

॥ राम ॥
॥ २३ ॥

त्यनुमार्ष्टि चेति मन्यतः सान्नाय्यनामकं दधिरूपं हविः कुर्वत इत्यर्थः कारावशिष्यास्तु मंत्रभेदं विनि
योगभेदं चाश्रित्य छिन्दमामनंति । तामाछिनत्तीषे त्वेत्यधिश्रयतीति छिन्नत्र हह यदि इषे त्वेति ऊर्जे त्वेत्य
नुमार्ष्टि परिहृष्याकर्णे सोन्नायते तस्माद् होर्जे त्वेति आसापमर्थः तां परोशाखां इषे त्वा जिमंत्रेणा
ध्वर्युः सा कस्मै त्वेन छिं घात छेदनकालेः ध्वर्युः इषे त्वेति पदद्वयमहितद्वाकं वर्ष्टिसिद्ध्यर्थमधिश्रय
ति । अधिकेनार्देरणासवेत ऊर्जे त्वेति मंत्रेणातां शाखामनुमज्यात । अनुमार्जे मानुलोम्येन तत्सं
संलग्नधूल्याद्यपनयनपरिश्रम तापा द्वेषेः सकाशा दृहियवाघ भिवृष्टिहेतुरूर्जे शब्दाभिधे
यः समीचीनज्वलात्मको रसो जायते तद्वा प्राणिनामुपकारो भवति । तदर्थमेवाध्वर्युः तद्वाह किमा
हेत्याशंक्य तस्माद्वा होर्जे त्वेति वाक्येन तद्देवस्पष्टी क्रियते इति कारणाभिमत एव मंत्रभेदपक्षे नै
मित्तीयैरपि द्वितीयाध्यायमपाद्दत्यंनिरणीतः । इषे त्वादिर्मंत्र एको भिन्नो वैकः क्रियापदे
असत्यप्यस्मारकत्वादेकावाक्यस्य कल्पनात् छेदने मार्जने चैतौ विनियुक्तौ क्रियापदं अध्याहृते
स्मारकत्वान्मंत्रभेद इतीरितः । इषे त्वोर्जे त्वेत्यत्र क्रियापदाभावेनोरूप्रप्यस्वेति मंत्रवदनुस्मार

कलाभावाद्दृष्टार्थत्वेसत्यपेकादृष्टस्यकल्पनेलाघवंवैदिकएवमंत्रइतिचेत्तर्हिवंकारएवब्राह्मणोच्छिन्नत्वाच्च
नुमार्ष्टिंइतिविनियोगभेदस्कंवणाच्चइतुसारेणोघेलाच्छिनत्तिइर्जेत्वानुमार्ष्टीतिश्रिपापेरध्याहृते
सत्यर्थद्वपस्मारकत्वाल्लिंगात्रौमंत्रौ। अथयतयोरर्थोभिधीयते। इषुइच्छायामितिधातुःइष्यतेइतिइषु
स्तस्याक्विवंतेनषकारांतेनइषशब्देनवृष्टिरभिधीयते। व्रीहियवादिधान्यनिष्पत्तिहेतुत्वेनस
र्वैःप्राणिभिर्वृष्टिमिच्छति। हेपलाशशाखेइष्यमाणायैवृष्ट्यैत्वाछिनद्मि। ऊर्जबलप्राणनयोरि
तिधातुःवृष्टिंगतोकलात्मकोरसःसर्वान्मनुष्यपश्वादीन्बलयतिप्राणादिनादृढशरीरान्करोति
।।पकालप्राणयतिप्रकर्षेणचेष्टयतीतिस्तुतत्त्विडेपनरसः ऊर्जशब्देनाभिधीयते। हेपलाशशाखे
ऊर्जेरसायत्वामनुमार्ज्मि। इषुशब्दगतइकारोधातुस्वरेणप्रातिपदिकस्वरेणचोदात्तः चतुर्थ्ये
कवचनस्यानुदात्तोसुप्पितावितिअनुदात्तत्वेप्राप्तेतत्त्वपवादत्वेनसावेकाचस्तृतीयादिर्विभक्तिरित्यु
दात्तत्वंतस्मिन्नितिसत्यनुदात्तंपदमेकवर्जमितिपूर्वइकारोनुदात्तः। यद्यप्येकशब्देनद्वयोरुदात्तयो
रन्यतरोपःकापवक्तुंशक्यते। तथापिसतिशिष्टस्वरोबलीयानितिन्यायेनविभक्तिगतउदात्त

एवप्रबलः तथासत्यनुदात्तादिकं उदात्तांतं इदं पदं संपन्नं । चाशब्दस्य प्रातिपदिकस्वरेणायमपि उदात्तः
प्राप्तः तथाप्यनुदात्तं सर्वमपादादावित्यस्य सूत्रस्यानुवृत्तौ समतां गतामेडितीया इति लादेशविधाना
द्वयंशब्दोनुदात्तः । संहितायामुदात्तादनुदात्तस्य स्वरितः इति लाशब्दस्य स्वरितत्वं ॥ ऊर्जेत्वेत्यत्रापिप
योक्तनीत्या स्वरवत्त्वं लेपः मंत्रद्वयस्य संहितायामूर्जे इत्येकारस्य स्वरितात्संहितायामनुदात्तानामिति
प्रचयाभिधायमिकश्रुतत्वं प्राप्ते सा तस्य त्वा इत्येवमोदात्तं स्वरितपरस्य सन्नतर इत्यस्य न्नतो नीचो अनुदात्तो
भवति एवमुत्तरेष्वपि मंत्रेषु स्वरप्रक्रियोहनीया । उक्तमंत्रद्वयपठिनाध्वर्युः शिष्यमाणां अनंत्रमूव
लकरमाज्यस्थालीरात्रिसंचयन्नमानेन सपात्वयोपेवा तदा हविर्निर्वपः । इषेत्वोर्जेत्वेत्याह इषमेवोर्जं
यजमाने दधातीति नचात्र प्रत्यक्षविरोधः आशंकनीयः अर्थवादस्य प्रशंसारूपगुणत्वांगी
कारात् ॥ भूतार्थवादत्वांगीकारे यद्यपि कदाचिदन्नरसयोर्यं संपादनं तदा मंत्रफलमित्यवगंत
व्यं ॥ उत्तरमंत्रस्य विनियोगमाह कात्यायनः ॥ मातृभिर्वत्सात्संसृज्य वत्सांश्शाखयोपस्पृशति
वायवस्थोपायवस्थेति च कद्रतिकएवाप्याह सवत्सममुपस्पृशति वायवस्थेतीति तरत्त्वा वानेवकए

वाभिमतौमंत्रः उपापवस्येत्सपमुच्चरमागस्ति त्रिरेरभिमतः तस्मादेकद्वसम्पूर्हीपमततेलेन कात्यायनः
ऋ उद्दाजहारः तित्रिपेभिमतं विनियोगमाह बौधायनः तत्राव स्नानयाकरोति वापवस्येतीति त
त्रैवत्सरभागंकरणेवानिराचकार उपापवस्ठ सुहे कस्माद्युस्तद्वन्नाद्दिर्यतेति वागत्तिं गंधर्मपोरितिधा
तुः वांतिगच्छतीतिवापवोगंतारः हेवत्साः पूर्यंवापवः स्यमात्स्पः सकाशात् अस्मत्रंगतारोभव
तसहमात् भिगीमनेसतिसायं दोहानलम्पतइत्सभिप्रायः अथवा वायुमहदश्लाह्नस्नानं वायु
तंपथ्यावायुःप्रापस्प्रक्षात्तन निष्ठीवनादिभिरूपहतां भुमिं शोषयित्वा पुनाति एवं वत्सा अस्यप्यनुले
पनेहेतुभूत्तगोमयादिदानेन भूमिंपुनंति तस्माद्वायुसादृश्यं पसोयमभिप्रायः कएवनायंवावुवायु
र्योपंपवततइसादिवाकोनाम्नातः अथवामनुष्याणामिवपशूनां स्वतिवासापगतहनि मोणासा
मध्यीभावाभिराश्वरणंतिरिक्षसंचरणादंतरिक्षमेवंपशूनां देवतातस्यवांतरिक्षस्य वायुरधि
पतिः सचवायुरेतान्पशून् कामावयवानिवपालयतीतिपशूनांवायुरूपत्वं तथा विधपालना
यपशून्वायवेसमर्पयितु वायुरूपत्व मापाद्यवापवस्येतिमंत्रः प्रंवज्ञाते सोयमभिप्रायस्तित्तिरि

राम्नातः वायवस्थेत्याह। वायुर्वा अंतरिक्षस्याध्यक्षः। अंतरिक्षदेवत्याः खलु वै पशवः। पशवो वायव एना
न्परिदहातीति तेन वायुरूपत्वमुच्यते। अथ वा तेनाभसरणायाहेति तत्र तत्रारण्ये चरित्वा सायंकाले वा
युवद्वेगेन यजमानगृहं समागमनाय पशून्प्रकर्षेणाकारयितुं वायुरूपत्वमुच्यते अयमप्यभिप्रा
यस्तित्तिरीणामाम्नातः। प्रवा एनानितराकरोतिपराहवा एवस्थेतीतिवा कात्यायनं देवो व इति
मातृणामेकां वत्सं दर्भेण अभवतिमाहिद्वेति अनुपूर्वमंत्रविनियोगसूत्रवाक्याच्छाखया पस्पृश
तीतिपस्पृश्य देवो वः इत्यनुवर्त्तते। गायमर्थः। सप्तधातवस्तानामातरोयाः गावः संतितासामध्ये
गामेकां व्याहृत्य पृथक् त्वदेवो व इति मंत्रेण शाखया पस्पृशेत्। तथा सति गोदधि संबंधिरूपं ह
विर्देहमाहेन्दवाभवति। एतदेवाभिप्रेत्यापस्तंबआह। इंद्र विगामेषु पलक्षयेदिंद्रपाजिनामहेद्र
पाजिनइतित्रीभपविध। यजमानविवेकंतित्रिर्हिंशपतिनागतः श्रीमहे। ॐ पजितत्रयीवगत
स्त्रियः श्रुश्रुवान्द्वामराराजन्यस्तेषां महेन्द्रो देवतेति मंत्रपाठस्तु देवो वः सविता प्रार्पयतु श्रे
ष्ठतमाय कर्मणे। आप्यायध्वमघ्न्या इंद्राय भागं प्रजावतीरनमीवा अयक्ष्मा। मा वस्तेन ईशत

॥ सं०हि० ॥
॥ २६ ॥

माध्यशर्द० सः ॥ ध्रुवा अस्मिन् गोपतौ स्यात बह्वीरिति ॥ द्योतनार्थस्य दीव्यतिधातोरिदं वदति रूपं षूप्रेरणे इ
ति धातोः सवितेति सोऽयं सविता देवः स्वस्वव्यापारप्रेरकः परमेश्वरः हे गावो युष्मान् अर्पयतु प्रशस्त
यवसोपेतमरण्यप्रदेशं गमयतु किमर्थं श्रेष्ठतमाय कर्मणे कर्म हि चतुर्विधं अप्रशस्तं श्रेष्ठतमं
चेति लोकविरुद्धवधबंधचौर्यादिकं अप्रशस्तं लौकिकैः श्लाघनीयं वधुवर्गपोषणादिकं
प्रशस्तं स्मृतिभिः श्लाघनीयं वापीकूपतडागादिकं श्रेष्ठं वेदैः श्लाघ्यं श्लाघनीयं यज्ञरूपं कर्म
श्रेष्ठतममिति तद्विवेकः हे अघ्न्याः गावः गोवधस्य पापातिरूपत्वाद्धन्तुमयोग्या अघ्न्या उक्तं च
तोतथाविधापूर्यं रुद्रापभागं रुद्रस्य भागमुद्दिश्य संपादयिष्यमाणाद्धि हेतुरूपेक्षीरं आप्याय
ध्वं समृद्धीर्लभिपीगाषु भूतं प्रकुरुत स्फायी आप्यायी वृद्धाविति धातुः वो युष्मान् अपहर्तुं स्तेनः
श्चोरो मेशत ईश्वरः समर्थो मा भून् कीदृशीर्युष्मान् प्रजावतीर्बहुपयसः अनमीवाः अम
रोग इति धातुः क्रिमिदुष्टत्वादिसकलरोगरहिताः अयक्ष्माः क्षयव्याध्यादिप्रबलरोगरहि
ताः अघशंस इति सः अघेन तीव्रपापेन भक्षणादिना शंसो घातको व्याघ्रादिरपि मा हिंसको भूत्

प्रशस्तं
श्रेष्ठ ५

॥ राम ॥
॥ २६ ॥

किंच यूयं गोपतौ गवां पुष्टकपतावस्मिन्यजमाने ध्रुवाः शाश्वतिकाः बह्वीर्बहुविधाः स्यात भवत नन्व
ध्यायकाः श्रेष्ठतमाय कर्मणे इत्येतावतैव प्रथमकंडिकां समापयंति आप्यायध्वमित्यादिना तु द्वितीयकंडिका
मारभंते तथोभिन्नकंडिकाविच्छेदस्य बुद्धिमद्भिरध्यायकैः कल्पितत्वात् यथा बह्वृचानां तत्र सूक्तमध्ये
वर्गविच्छेदः कल्पितः यथा तैत्तिरीयकाणां वाक्यमध्ये पिपंचाशत्पदसंख्यया विच्छेदः आवृत्तिसौक
र्यायकल्पितस्तद्वदत्रापि द्रष्टव्यं कं एवं तु तस्य मंत्रस्य विनियोगं मंत्रभागानां व्याख्यानं च विवक्षित्वेवं
पठति अथ धेनुमुपस्पृशति देवो वः सविता प्रार्पयतु श्रेष्ठतमाय कर्मणे इति सोयं विनियोगः सवि
ता देवानां प्रसविता सवितृप्रसूता यज्ञं संभरन्निति प्रथमभागव्याख्यानं श्रेष्ठतमाय कर्मणे इ
ति यज्ञो वै श्रेष्ठतमं कर्म यज्ञाय हितत्वात्तस्मा आह श्रेष्ठतमाय कर्मणे इति द्वितीयभागव्याख्यानं आप्या
यध्वमघ्न्या इंद्राय भागमिति सर्व एव वा वो देवतापि हविर्गृह्णन्नादिशत्येवमेवैतद्देवता आदिश
ति यद्वाहेंद्राय भागमितीति तृतीयभागव्याख्यानं प्रजावतीरनमीवा अयक्ष्मा इति नात्र तिरो
हितमिवास्तीति चतुर्थभागव्याख्यानं मा वः स्तेन ईशत माघशंस इति भावः कात्स्न्येन नाप्नुयाद्

ग्नेतेपैवैनदाहेतिपंचमभागव्याख्यानं॥ अत्रनाड्डानाध्यकारिरापडूत्पर्थः। ध्रुवाअस्मिन्गोपतौस्यातब
ह्वीरितिपनपक्षमिरापोअस्मिन्यजमानेबह्व्यः स्यातेतेपैवैतदाहेतिषष्ठभागव्याख्यानंकात्यायनः प
जमानस्यपशून्पाहीत्यग्न्यगारस्यान्यतरस्यपुरस्ताच्छाखामुपगूहतीति॥ हिपत्नाशाशाखेलचुजनतप्र
देशेस्थित्वाप्रतीक्षमाणासतीयजमानस्यपशून्नारोपसंचरतश्चोरव्याघ्रादिभयात्पाहिरक्ष॥
यद्यप्यचेतनाशाखातथापितदभिमानिनीदेवतामुद्दिश्यैवमभिधातुंशक्यतेयथाशास्त्रज्ञानाग्न
चेतनेपिग्रावगणेभिमानिदेवताविष्णुसंनिधिमभिप्रेत्यतेविष्णुसंबोधनावाहनादीनुपपोडश्यो
पचारानन्नुतिष्ठंतितद्वदत्रपाशाखादेवतारक्षिततत्वादेवगावोनिरुपद्रवाः सत्यः सायंकालेपुनः
समागच्छंतीतिसोपमर्थःश्रितित्तिरीयाः समास्नातः यजमानस्यपशून्पाहीत्याहपशूनांगोपीथायपश्र
स्मात्सायंपशवउपसमावर्तन्तेइतिकरोवनापिविनियोगपुरःसरंमंत्राभिप्रायश्चात्मापते॥ अ
थाहवनीयागारस्यवागार्हपत्यागारस्यवापूर्वार्धउपगूहतिपजमानस्यपशून्पाहीतिब्रह्मणोवैत
द्यजमानस्यपशून्गुप्तयेपरिददातीतिश्रुत्युक्तमर्थमेतेनमंत्रेणोपरक्षार्थंशाखाभिमानिदेव

णायेसमर्पयतीत्यर्थः। कात्या॰ वसोः पवित्रमिति पवित्रमस्यां बध्नाति कुशैस्त्रिवृद्वैतिश्रसीति मंत्रया
ठस्तु शेषः। हे दर्भमयपवित्र वसो। रुद्रदेवताया निवासहेतोः पयसः शोधकं पवित्रमसि अनेनमं
त्रेण पवित्रं कलापशाखायां बध्नीयात् द्वौ कुशौ कुशत्रयं वा पवित्रमित्युच्यते तदेतद्धिस्पष्टं
तित्तिरिणा समाम्नातं। त्रिवृत्पलाशशाखायां दर्भमयं भवतीति त्रिवृद्धि प्राणाः त्रिवृतमेव प्राणं म
ध्यतो यजमाने दधातीति मानवपरोः सयोतिधायमास्मात्पवित्रं दर्भादिति आपस्तंबोपि विस्पष्टमे
तदेवाचष्ट त्रिवृद्दर्भमयं पवित्रं कलावसूनां पवित्रमसीति शाखापार्श्वे शिथिलमसज्जति
मूलेमूलान्यग्रेणाग्राणि ग्रंथिकरोतीति। कएवंन तु मंत्र एव व्याख्यातः। तस्मादेव पवित्रं करोति
वसोः पवित्रमसीत्येतावतैवपदेनैव सुर्यज्ञस्य पवित्रमसीत्येवेन तद्दाहेति। तस्माद्देव पलाशशा
खाया एव संबंधिरेतावतैव पदत्रयरूपेण मंत्रेणैव यज्ञशब्देन तदीयपहविर्द्रव्यरूपं द्योरंल
भ्यत इस्त्रवगंतव्यं। इति सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे काण्व संहितायां प्रथमा
ध्याये प्रथमोऽनुवाकः। प्रथमेऽनुवाके पलाशशाखाप्रयुक्ता मंत्रा उक्ताः। द्वितीये दोहनप्रयु

॥स०हि०॥
॥१८॥

क्तमंत्रा उच्यते कात्यायनः ॥ द्यौरसीति स्थाल्यादानमिति यस्यां स्थाल्यां दुग्धं धक्षीरस्म सिष्यंते तस्याः
स्वीकारार्थोयं मंत्रः तत्र पाठस्तु द्यौरसि पृथिव्यसीति हे स्थालि मृल्लाभं प्रतिनिष्पन्ना त्वं जलहेतुवृ
ष्टिप्रदद्युलोकरूपासि द्युसंबंधात्स्याः तद्रूपत्वं अस्माभिरुपचर्यते तथा पृथिव्याः सकाशाद्दुग्धत
पाकस्य निष्पन्नत्वात्पृथिवीरूपत्वं इममेवाभिप्रायं तैत्तिरीया दर्शयति घोरसि पृथिव्यसीत्या
ह दिवश्च ह्येषा पृथिव्याश्च संभृता यदुखा तस्मादेवमाहेति कात्यायनः मातरिश्वन इत्यधिश्र
यतीति तमेव विनियोगमापस्तंबः स्पष्टीचकार गार्हपत्यादुदीचो गारान्निरूह्य मातरिश्वनो घ
र्मोसीति तेषु कुंभीमधिश्रयतीति पाठस्तु मातरिश्वनो घर्मोसि विश्वधाः परमेण धाम्ना दृं
हस्व मा ह्वार्मा ते यज्ञपतिर्ह्वार्षीति मातर्यंतरिक्षे श्वसितीति निश्वासवच्चेष्टां करोतीति मातरि
श्वा वायुः घृ क्षरणदीप्त्योरिति धातुः घर्मो दीपकः अंतरिक्षलोकसंचारस्थानप्रदाने
न वायोर्दीपको भिव्यंजको भवतीति हे कुंभ त्वं वादरेप्यंतात्फिरूपस्यावकाशस्य वायुसंचा
रस्य सद्भावाल्लमपि वायोरभिव्यंजकोसि एतदेवाभिप्रेत्य तैत्तिरीया आह मातरिश्वनो घर्मोसी

॥राम॥
॥१८॥

ण्याहअंतरिक्षं वैमातरिश्वनोधर्मः एषांलोकानांविधर्त्ताइतिपूर्वमंत्रेघोरमसिष्टयियप्सीतिलो
कपरूपत्वंकुंभस्योक्तं अत्रतुमातरिश्वनोधर्मोसौतंचांतरिक्षलोकरूपत्वमुच्यतेतस्मादेषांत्र
याणांलोकानांस्वात्मनिविशेषेणधारणायकुंभः शक्नोतीत्यर्थः किंचपरमेणधाम्नाऽनेनमे
नवकुक्षीरधारणसामर्थ्यरूपेणतेजसाविश्वधाः सर्वजगद्धारकवृष्टिरूपोयंकुंभः अनेनकुं
भेनधृतंक्षीरमिंद्रेशेनकुतस्त्वहहितस्मोरणावृष्टिः संपद्यतेतथास्मर्यते अग्नौप्रास्ताहु
तिः सम्यगादित्यमुपतिष्ठते आदित्याज्जायतेवृष्टिः वृष्टेरन्नंततः प्रजाइतिवृष्टिरूपेणविश्व
धारकत्वंतित्तिरिणासमाम्नातं विश्वधायासिपरमेणधाम्नेत्याहवृष्टिर्वैविश्वधायावृष्टि
मेवावरुंधइतिहेकुंभदृंहस्वलंनिष्ठस्यक्षीरस्यगलनंवारयितुंदृढोभव अन्यथाभग्नस
तच्छिद्रेणक्षीरंगलेत दृहदृंहिदृंहवृद्धावितिधातुः यद्यपिहवृद्ध्यर्थस्तथापिद्रौसतिभंगाभावेनचि दृढो
रमवस्थानाद्दार्ढ्यंनामकालवृद्धिरेवभवति किंचहेकुंभमाह्वाः कुटिलोमाभवा — कौटिल्य
इतिधातुः यदिकुंभः कुटिलोभवेत्तदानीं अवाङ्मुखस्तिर्यङ्मुखोवासन्जितत्वस्मिन्स्थितंक्षीरं

||स॰हि॰||
||१८||

गलेन्त्र्यतः क्षीरधारणायहार्यमकौटिल्यं चोच्यते । तदाहतित्तिरिः दृंहस्व मा ह्वारित्याह धृत्या इति
किं चेतपतत्पतितं लतत्वं धीपद्यमानः मा ह्वार्षीत् कुटिलो मा भूत् तत्र च निष्पन्नस्य क्षीरस्कंदनेनानुष्ठा
नविघ्नस्य पद्यमानस्य कौटिल्येति च लदीपहार्ष्येन कौटिल्याभावेन च भविष्यति कासायनः
वसोः पवित्रमसीत्येको तत्र संपुटे वेति अस्यां कुंभ्यां स्थापनीयस्य प्रागग्रत्वं साम्नातः प्राप्तमिति
सिद्धवत्कृत्वो दगग्रत्वं विकल्प्यते चेतत्त्वच प्रागग्रं वै बौधायनो दर्शयन्ति तस्यां प्राचीनाग्र
शाखापवित्रं निदधातीति आपस्तंबसूत्रोपदिष्टं प्रातर्दोहभेदेन प्रागग्रो दगग्रयोश्चोर्ध्वस्था
ममभिप्रेत्याह तस्यां प्रागग्रं शाखापवित्रमलमसादधात्युदक्प्रातरिति एतमेवाभिप्रायं तित्तिरि
र्दर्शयति प्राकूसायमधिनिदधातीति पंक्तू प्रातरिति पंक्तू प्रातरितित त्यारणार्था तपोहूयंपाठ
स्तुवसोः पवित्रमसि शतधारं वसोः पवित्रमसि सहस्रधारमिति हे शाखापवित्र वसोरद्विव
व्रतापानिवासहेतोः पपसः पवित्रं शोधकमसि पवित्रेणास्य वधानेस्तति स्थिरेणास हकूंभ्यांपत
तात्तणपर्णादीनां प्रतिबध्यमानत्वात् पवित्रस्य क्षीरशोधकत्वं न च क्षीरमप्येवं प्रतिबध्यतः

||राम||
||१८||

तिशंकनीयंपरत्स्मेःपवित्रेस्थेइः कुंभ्यांपततीनांक्षीरधाराणांशतसहस्रसंख्याकानांसद्धावाछो
धकत्वमात्संत्तुवसोःपवित्रमितिद्विरुक्तिः कात्यायनः देवस्त्वासवितेत्यादिमंत्रमानेजपतीतिपाठस्तु देवस्त्वा
सवितापुनातुवसोःपवित्रेणशतधारेणसुप्वेति दोहनादूर्ध्वंकुंभ्यांस्थितमानंदक्षीरंलक्ष्यको
हे वः पूर्वोक्तेनशतधारेणवसोःपवित्रेणपुनातुशोधयतुसुप्वेतिपवित्रविशेषणंसुप्वेतिसु
ष्टुपुनातीतिसुप्वः तस्यपततीपासुप्वेति कात्यायनः कामधुक्षइतिप्रश्नइति एकस्यांगवि
दुग्धायांपाहीगधारंप्रत्येवंपृच्छेत् हे होग्धः विद्यमानानांगवांमध्येकांगामधुक्षः दुग्धवानसि का
त्यायनः प्रोक्तेसाविश्वायुरित्याहेति पूर्वोक्तप्रश्नेदोग्धात्वमूमितिगोनाम्निकथितेस
तिसाविश्वायुरितिमंत्रमध्वर्युर्दोग्धारंप्रतिब्रूयातप्रश्नाप्रोक्तेसतिसाविश्वायुरितिमं
त्रेणोत्तरंदोग्धाब्रूयादितस्यमंत्रस्यायमर्थः यागौस्त्वयादुग्धात्वयाचपृष्टासागौर्विश्वायु
शब्देनाभिधीयतेविश्वमायुर्यस्याइतिविग्रहः यजमानस्यसंपूर्णमायुःप्रयच्छतीत्य
र्थः कात्यायनः एवमितरेउत्तरात्मप्रतिमंत्रमितिपथाप्रथमागौःपृष्टा एवमितरेद्वितीयपत

॥ सं०हि०॥
॥२०॥

तीयेणावेतत्तदोहनाद्दृधंधेकामधुक्षइतिमंत्रेणाष्टष्टत्येदोग्धापुरुषोप्युक्तोऽस्यांमासा विश्वकर्मासा
विश्वधायाइतिमंत्राभ्यांक्रमेणाप्सरं ब्रूयात पादितीयपाणोस्त्वेः सविश्वकर्मेत्युक्तरं क्षीरदधि
नवनीतादिः साध्यानि विश्वानिकर्माणियस्यागोः संतिसाविश्वकर्मापात्-तीयासा विश्वधा
याइत्याति तत्प्रश्नस्योत्तरंतु धातृधारणपोषणयोरितिधातुः क्षीरदधादिहविर्भुजदंप्रा
दिद्देवान विश्वान्सर्वान्दधातिपुष्णातिइतिविश्वधायाः तु धातृधारणपोषणयोः अ
ह्यधिद्दान इतिधातुः विश्वान्सर्वान्दाहीनद्दव्यं क्षीरदूषं धापयतिपाययतीतिविश्वाधायाः
कश्यायनः उद्दास्यातनक्तिप्राग्घृतशेषेणोइस्पृशेतीतिकथितं क्षीरं त्र्यग्नेः सकाशाद्दहि
रुद्धास्यंमहछेक्षीरेसायंकालीनाग्निहोत्रान्नतरवर्तिनायवागूशेषेणदधिनिष्पत्त्यर्थमा
तंचनंकुर्यात्तरपवागूशेषस्यातंचनसाधनत्वमापन्नंवः स्पष्टमाहत्र्यमावास्यायांतृतीया
स्वयंपञ्जमानोपवागस्वाग्निहोत्रंजुहोति अग्निहोत्रोच्छेषेणाभ्यातंचनार्थंनिदधातीति ति
त्तिरीयशाख्यामान्तं अग्निहोत्रोच्छेषेणाभ्यातनक्ति पडासमंतत्स्यादिइतिपाठस्तुइंड्सत्ताभा

॥राम॥
॥२०॥

गः ॥ सोमेभ्रातनकर्षीति । हेहीरंइ इस्भागं त्वां सोमवल्लीरसेनातन विपन्नं च तिधातुः कठिनीकरणार्थः ३
श्विनिष्पन्नपेकठिनीकरोमीत्यर्थः पद्यपत्रांतं च नेहेतुर्वेवागभूशेषोनतुसोमस्त्वथापिमनोभावनपातस
सोमत्वसंपद्यते यथा कश्चित्पुरुष आनुकूल्येन भावितो बंधुर्भवति प्रतिकूल्येन भावितः शत्रु
र्भवति यथा वा भक्ष्यं भोज्यं च विषत्वेन भावितं वमनं करोति अमृतत्वेन भावितं जीर्णं सद्बलहेतु
र्भवति यथा वा भक्ष्यं भोज्यं पतद्दृष्ट्वा मिष्टं रामायणोबंधुत्वे भावितो बंधुः परत्वे भावितः परः ॥ विषाम
तदृशेद्विहस्थितिर्भावनि बंधिनी इति तद्यात्रापि यवागूशेषस्य भावनया सोमत्वं तदेतन्निति
रीयासमाम्नातं सोमं तन्वात नकर्नी द्वापत्तदु धीत्वा हसोम मे वैतत्करोतीति एतान्यथा सेन सो
मत्वसंपादनेन प्रयोजनं भवति नैवाम्नातं यो वै सोमं भक्षयित्वा संवत्सरं ८ सोमं तपिबति पुनर्भक्षस्य
सोमपीथो भवति सोमः खलु वै साम्राज्यं य एवं विद्वान् शतमालभत इति साम्राज्यं पिबति अ
अपुनर्भक्षस्य सोमपीथो भवति सोमं त्वगत हे पंइ संबंध कथनस्य सोमत्वकथनस्य च ता
त्पर्यं कथ्येनाम्नातं सप्रातनकीं इस्भागं सोमेनातनवति सपथ्येवा देदेवतां पे हविर्गच्छ

न्नादिशत्येवमेवैतद्देवतापा आदिशतिपरोहि देवः सत्वाभागमितिसोमेनान्नकोतिस्वदयत्येवैतदिति
कात्यायनः सोदकेनापिदधात्यनेन मन्त्रेण विष्णोहव्यमितिरक्षस्वेति मंत्रशेषः सर्वत्रस्तंभोपाल्नेसह
रेवब्रह्मविषयः कार्य एवेनाम्नातः उदन्वताकंसेनवाचमसेनवामन्त्रेणापिदधाति वज्रोवा आपोवज्र
मेवैतदभिगोप्तारंकरोतीतिसन्मन्त्रेणेत्यस्यमन्त्रपदवर्ज्जनेनसाभिप्रायमस्तितिरिणासमाम्नातःस
न्मन्त्रेणापिहध्यातित्यतेदेवः स्यात अयस्पात्रेणवादारुपात्रेणवापिदधातिनहिंसेदेवं उदन्वद्
वतिआपोवैरक्षोघ्नीः रक्षसामपहत्याइतिइतिप्रथमाध्यायेद्वितीयोनुवाकः ॥ द्वितीयेहेहनमंत्राउ
क्ताः तृतीयेहविर्निर्वपनमंत्राः उच्यंते कात्यायनः अपरेणाहवनीयंप्राङ्तिष्ठन्नग्निमीक्षमाणो
पउपस्पृश्यव्रतमुपैत्यग्नेव्रतपतइदमहमितिविति तयोर्विकल्पितयोर्मंत्रयोः प्रथममंत्रपाठस्तु
अग्नेव्रतपतेव्रतपतेव्रतंचरिष्यामितच्छकेयंतन्मेराध्यतामिति व्रतस्यानुष्ठेयस्यकर्मणःपतेपा
लकहेअग्नेत्वदनुग्रहाद्व्रतंचरिष्यामिकर्मानुष्ठास्यामितच्छकेयंकर्म्मानुष्ठातुंत्वत्प्रसादाच्छ
क्तोभूयासंतन्मेराध्यतांमहीपतत्कर्मनिर्विघ्नंसत्फलपर्यंतंसाध्यतांएतस्यमन्त्रस्यतात्पर्यंक

एवेनाम्नातं त्र्याहवनीयमीक्षमाणो व्रतमुपैत्यग्ने व्रतपते व्रतं चरिष्यामि तछकेयं तन्मे राध्यतामिति त्र्य
ग्निर्वै देवानां व्रतपतिस्तस्मा एवैतं व्रतं चरिष्यन्प्राह तस्मैवेदयति तन्नात्र तिरोहितमिवास्ति स्तिति
रिणाप्यतराम्नातं व्रतेन मध्योग्निर्व्रतपतिर्ब्राह्मणो व्रतमुपेष्यन्नुपाहाग्ने व्रतं चरिष्यामीत्यग्निर्वै
देवानां व्रतपतिस्तस्मा एवं प्रतिप्रोच्य व्रतमालभत इति द्वितीयमंत्रपाठस्तु इदमहमनृतात्स
त्यमुपैमीति अनृतं मनुष्यजन्मशीघ्रविनाशित्वात्तपथ्याजन्मारसागञ्जाद्यपल्लाह्नहं पजमा
नोऽस्मादनृतात मनुष्यजन्मनत्ऊत्पदेवताशरीरमुपैमि प्राप्नोमि न तत्सत्यमनुष्ठीयमानक
र्मरूपेणाप्रत्यक्षमितिमन्वान इदमिति विशिनष्टि मातान्तयो देवमनुष्यजन्मपरं लंमन्त्र
तः तित्तिरीयः कश्चित्तं मंत्रः स्वयमेवव्याचष्टे अनृतात्सत्यमुपैमि मानुषाद्दैव्यमुपैमिदै
ववाचं यच्छामिति क एवं नाप्प्यपमर्थ आम्नातं द्रुपवाइदं तत्तीपमस्मिस्तयंचैवा त तच
ततः सर्वदेव्यमनृतं मनुष्यवेउपयाद्दिदमहमनृतात्सत्यमुपैमीति तन्मनुष्येभ्यो देवानुपावर्त
त इति अथ बालोकप्रसिद्धएवसत्यानृतेशब्दोतवेनानृतं ववेदहितत्यानृतवादो निषिध्यस्य कर्म

॥सं०हि०॥
॥२१॥

वारणीमनृतत्वात् अतः तद्वचनाद्भूतत्वाद्धि इदं सत्यवचनं प्राप्नोमीति मंत्रार्थः ॥ अत एव कात्यायन
इदमहमिति वा सत्यवादी निवृत्तोऽपापविधाय पश्चादेवमाह अतः कर्मांगमुक्तोऽसत्यवदनमिति
पतः मनुष्या हीनव्रतमुपेतवान् अतः कारणात् तद्दुर्त्तोरेकर्मकालेऽपत्यसत्यवदते तत्कर्मांगं निषि
द्धः उक्तप्रकारेण व्रतमुपेत्य ततो ब्रह्मस्वरांकृतो तेन ब्रह्मणानुज्ञातो यज्ञपात्रप्रोक्षणार्थं
अपां प्रणायनं कुर्यात् तदाह कात्यायनः ब्रह्मन्नपः प्रणेष्यामि यजमान वाचंयच्छेत्यादानुज्ञा
त उत्तरेणाहवनीयपर्ट: संप्रति विदधातीति कस्त्वा युनक्तीति पाठस्तु कस्त्वा युनक्ति स त्वा युनक्ति
कस्मै त्वा युनक्ति तस्मै त्वा युनक्तीति अत्र मंत्रप्रयुज्यमानः ध्वयुर्यज्ञस्यारंभकमात्मनः कर्त्
मेतद्धेयनीय प्रजापतेर्यज्ञकर्तृत्वं प्रश्नोत्तररूपाभ्यां मन्त्रवाक्याभ्यां प्रतिपादयति प्रणीतानां
मप्पांधारकं हे पात्र त्वां कः पुरुषो युनक्ति आहवनीयस्योत्तरभागे स्थापयतीति प्रश्नः तदुत्तरः
प्रतिज्ञार्थं चाचोऽसर्वेषु वेदेषु ज्ञानिर्वाहकत्वेन सिद्धोऽपः प्रजापतिरस्ति स एव परमेश्वरोऽ हे
पात्र त्वां युनक्ति इत्युत्तरं पुनरपि कस्मै प्रयोजनाय त्वां युनक्तीति प्रश्नः तस्मै प्रजापतये तत्प्री

॥राम॥
॥२१॥

त्वर्थंत्वांपुनःक्रीतुत्वंसर्वकर्मणांपरमेश्वरप्रीत्यर्थंभगवद्गीतास्वर्जुनंप्रतिभगवतोक्तंसर्वकर्माण
पिसदाकुर्वाणोमद्व्यपाश्रयःमत्प्रसादादवाप्नोतिशाश्वतंपदमव्ययमितियत्करोषियदश्नासि
यज्जुहोषिददासियत्‌यत्तपस्यसिकौंतेयतत्कुरुष्वमदर्पणमितिचब्रह्मार्पणंब्रह्मह
विर्ब्रह्माग्नौब्रह्मणाहुतंब्रह्मैवतेनगंतव्यंब्रह्मकर्मसमाधिनेतिचनस्यमंत्रस्यप्रजापति
परत्वेनव्याख्यानत्वेनायंतेसप्रणायतिकस्त्वापुनःक्रिकस्त्वापुनःक्रिकस्मैत्वापुनःक्रितस्मैत्वा
पुनःक्रीतिएताभिरनिरुक्ताभिर्व्याहृतिभिरनिरुक्तोवैप्रजापतिःप्रजापतिर्यज्ञस्तत्प्रजापतिमे
वैतद्युक्तपुनःक्रीतिव्याहृतिपुक्ताम्वततोमंत्रवाक्यरूपास्ताननुकिंशब्दतछब्दाभ्यांसाधा
रणार्थवाचित्वस्यामेवदेवताव्याक्तिंपेते।नताद्रग्गुणयुक्तानामविशेषेणानेनोपेतिविस्पष्टंनिः
शेषेणोच्यते।तस्मादेवसामनिरुक्तस्वरताभिर्व्याहृतिभिःप्रजापतौत्तन्वपःव्याहृतपोपदहनि
रुक्तास्तत्प्रजापतिरप्यनिरुक्तःचतुर्मुखाद्यवतारस्वीकारात्पूर्वंसर्वंजगत्।कारणात्मतः
प्रजापतिरीदृशइतिवक्तुमशक्यत्वात्अतएवहदारापकेस्पष्टःपुराप्रजापतिरूपस्यपष्टत्व

॥ स०हि०॥
॥२३॥

माम्नातं तद्धेदं तर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यामेवव्याक्रियतेति यदा भूतभौतिकरूपसर्वजगद्विषयना
मरूपकारेण प्रजापतिस्वरूपं व्याकृतं विस्पष्टं भवतीति तदानीं यज्ञरूपेणापिव्याक्रियते तत्र यथा सर्वेते न द
क्षेनमंत्रेण प्रजापतिरूपमेव यज्ञं पुनरुत्तानुतिष्ठतीति तित्तिरिणाप्यत्रैवाम्नातं कस्मात्पुनः किं क्रियत इत्यपु
नक्तीत्याह प्रजापतिर्वै कः प्रजापतिनैवैनं युनक्तीति अनन्तरभावी प्रयोगः क एवं नैवमाम्नातः परि
स्तीर्य हुं हुं पात्राण्युपसादयत्यग्निहोत्रहवणीं च सूर्पं च स्फं च कपालानि च शम्यां च कृष्णाजिनं चोलूख
मुशले दृषदुपले दश हशास्पराणैव विराट् विराड्वै यज्ञो विराजमेतद्यज्ञमभिसंपादयतीति तित्तिरिणाप्ये
वमाम्नायं यज्ञायुधानि संभरति यज्ञो वै यज्ञायुधानि यज्ञमेवैतद्दुरसीय देकमेकं संतेरमि स्वत्रिरेवल्या
निस्पूर्पेत्यह सर्वाणि मानुषाणि द्वे द्वे संभरति यज्ञायुधानि संभरतीति यज्ञानुवाक्यपेरेवं रूपं करोत्य
थोमिथुनमेवपौवैदश यज्ञायुधानि वैदमुखतो समयष्टः कल्पते स्फं च कपालानि वाग्निहोत्रहवणी
च शूर्पं च कृष्णाजिनं च शम्यां चोलूखलं च दृष — प — वैतानि वै दश यज्ञायुधानीति कात्यायनः कर्म
णावामिति सूर्याग्निहोत्रहवणपादपितिपाठस्तु कर्मणोवांवेषापवामितिहे अग्निहोत्रहवणीं —

॥राम॥
॥२३॥

र्थं वां युवां कर्मणे कर्मार्थं आरभ इति शेषः विष्लृ व्याप्ताविति धातुः वेषो व्याप्तिः तस्यै उचितकर्मसु व्याप्त्य
र्थं वां युवामारभ इति शकटस्थितान् व्रीहीन् हविरर्थं प्रथमकरणं प्रोक्षणाद्युदकधारणमित्येवमाद्
यो ऽग्निहोत्रहवण्या एव व्यापारः — हि निर्वापधारणमुलूखले व्रीहिप्रक्षेपः पुनरुद्धरणं चेत्यादयः श्
र्प्पोचितव्यापाराः । कः एवं नैतन्मन्त्रव्याख्यानमाम्नायते सोऽग्निहोत्रहवणीं च शूर्पं चादाय कर्मणे
वां वेषाय वामिति यज्ञो वै कर्म यज्ञाय वामित्येवैतदाह वेषाय वामिति विरेह्येव बर्हिः पज्ञमिति कात्यायनः
प्रतपनं प्रत्युष्टं निष्टप्तमिति विवृति पाठस्तु प्रत्युष्टं रक्षः प्रत्युष्टा अरातयो निष्टप्तं रक्षो निष्टप्ता अरात
य इति उष दाहे इति धातुः अग्निना [illegible] ग्निहोत्रहवणीशूर्पयोः प्रत[illegible]ने नात्र स्थितं रक्षः प्रत्यु
ष्टाः शत्रवः सन्ति प्रत्येकं दग्धाः रा दाने इति धातुः हविषो रक्षिरणाय वा दानं रातिः तस्याः प्रतिबा
धका अरातयस्ते च प्रत्युष्टाः प्रत्येकं दग्धाः तप संतापे इति धातुः शूर्पाद्योनिरूढं रक्षो निष्टप्तं नि
षेण संतप्तं अरातयश्च निष्टप्ताः अनयोर्मन्त्रयोर्विकल्पः क एवेनाम्नातः सम्प्रतपति प्रत्युष्टं
रक्षः प्रत्युष्टा अरातय इति तिवा निष्टप्तं रक्षो निष्टप्ता अरातय इति वेति पुनरपि द्वाहैव पञ्चे

नंत्वानाऽअसुरारक्षसामासंगीहिमपांचक्रुरित्यादिनात्रतात्पर्यंऽप्रात्प्रातेकात्यायनःगच्छत्युर्वंतरिक्षमि
तीतिअन्वेमीतिमंत्रशेषःऽउरुविस्तीर्णंअन्तरिक्षमवकाशमन्वेमिअनुसृत्यगच्छामिगच्छेत्तःपुरु
षस्यपार्श्वेयोरुभयेपावस्थितंरक्षोमंत्रेणानेननिराक्रियतेतमेतमभिप्रायंकात्यायनआहउर्वंतरिक्ष
मन्वेमीतिप्रत्यंतरिक्षवायुमनुरक्षस्प्रतिपथायपथ्यायंपुरुषउभयतःपरिछिन्नोब्रह्मणौवेनउभय
मनाष्ट्रअन्तरीक्षंकुरुतइतिब्रह्मणोवमैत्रेणौवएतदुभयंपरस्पमानंपार्श्वद्वयगतमंतरीक्षमना
ष्ट्रंनाशंकरक्षोरहितंकुरुतइत्यर्थःकात्यायनःअपरेणास्यपश्चाद्धनस्तिष्ठत्समंगिधूरसीतिधू
रभिमर्शनमितिअपरेणास्यपुरोडाशस्याकहेतोर्गार्हपत्यस्यपश्चाद्धनःशकटंव्रीहियुक्तंतिष्ठतित
च्छस्पंगिहमीचीतक(?)त्स्नंगार्हपत्यंतस्यधुरंखलीवर्द्दवहनयोग्यंपुरुगप्रदेशंधूरसीतिमंत्रेणास्पृशेदि
त्यर्थःबौधायनोप्याहाजघनेनगार्हपत्यमगिनष्टमनोभवतितस्मिन्वोऽनंस्ताधुरमभिमृशतिधूर
सीतिआवस्त्तभोप्यहिउर्वंतरिक्षमन्विहीतिशकटायाभिव्रजतिअपरेणगार्हपत्यंप्राग्रीषमुद
ग्रीषंवानड्वाहयुगंशकटमवस्थितंभवतिव्रीहिमद्वाधूरसिदक्षिणांयुगधुरमभिमृशतिउ

त्तरां चेति पाठस्तु धूरसि धूर्व धूर्वंतं धूर्वतं योस्मान्धूर्वति धूर्वतं यं वयं धूर्वाम इति श्रीहिरूपह विहारेक
शटसंबंधिनो युगस्य बलीवर्दं वहनप्रदेशे कश्चिद्धिंसको ग्निः शास्त्रदृष्टोस्ति तं प्रार्थयते धुर्वी धु
र्वी हुर्वी हिंसार्थाः इति धातुः हे वह्ने त्वं धूरसि हिंसकोसि तस्माद्धूर्वंतं हिंसंतं पाप्मानं धूर्व विनाशय
किंच योस्मान्हिंसादिर्यागविघ्नेनास्मान् धूर्वति हिंसितुमुद्युक्तो तमपि धूर्व विनाशय यं वा लस्मादि
हिंसायामिति धातुः । वाजिनं यजनहेतुत्वाद्दन्नवंतं स्रुवं संमार्ज्मि सम्यक् शोधयामि । मृजूष् शुद्धाविति
धातुः । किमर्थं वाजेध्यायै भी ई धी दीप्ताविति धातुः । वाजस्यान्नस्येध्यायै दीप्त्यै प्रकाशनार्थं शोधितत्वेन स्रु
णाज्ये हुते सत्यग्निर्दीप्यते तेषामाप्यायितदेवाहुतिफलभक्तमन्नं प्रकाशितं भवतीत्यर्थः । कात्यायनः । प्रतप्य प्र
तप्य प्रपद्यस्य निशितेति स्रुव इति । जुहूपभृद्ध्रुवास्तत्तः स्रुववत्तरः प्रत्येकं प्रत्युष्टमिति मंत्रेण प्रतप्य प्रतप्य प्र

यष्ठस्य निहितेति स्रुव इति । जुहूपभृद्ध्रुवास्तिस्रः स्रुचः ततः प्रसेकं प्रत्युष्टमिति मंत्रेण प्रतप्य प्रतप्य वेद्यां स्था
पनार्थं अन्यस्य हस्ते मयपश्चेत् । प्रतप्येसेतदुत्तरं मंत्रकृतं संमार्ज्जनस्याप्युपलक्षणं । प्रत्युष्टमिति प्रतप्यानि
शितेति स्रुवः मापष्ठत्त । जुह्वादीनां स्त्रीलिंगत्वात्तद्विशेषणस्यापि अनिशितेति पदस्य स्त्रीलिंगत्वं । मंत्रपा
ठस्तु । प्रत्युष्टं रक्षः प्रत्युष्टा अरातयो निष्टप्तं रक्षो निष्टप्ता अरातयः । अनिशितासि सपत्नक्षिद्वाजिनीं त्वा
वाजेध्यायै संमार्ज्मि इति । एवंविधा स्रुच्ये मं । स्रुवस्य पुरुषरूपत्वात् । प्रथमतः समार्ज्जने स्रुवो स्त्रीरूपत्वात् सम्या
क्संमार्जनं तदिदं रूपं एवं आह स्रुवं मग्रे संमार्ष्टि च पावे स्रुचो यो यथा स्रुव इति तित्तिरिरप्याह स्रुवं समार्ष्टि समग्रे स
पुमान्ठ समेवाभ्यः संपश्यति मिथुनत्वाय अथ जुहूं ततोपभृतं अथ ध्रुवामिति । आप्यो जुह्वादियोषरूपये
षार्पसत्ठ पश्यति सम्पकृती स्त्रोकरोति । कात्यायनः । पत्नीं संनह्यति मत्सगृहस्थिणतोपविष्टां गार्हपत्यस्य दु
जमोत्रेण त्रिवृत्ता परिहरत्सभिनासोदिक्षैरास्तेति । मत्सगृहस्थिणतो नैऋत्यां दिशि अभिवासोवस्त्रस्योप
रिष्टात् परिहितो वेद्ये ते पाठस्तु । अदित्यै रास्नासीन्द्राण्यै सन्नहनमिति । हेरज्ज्वोत्व अदित्यै भ्ठ्याः रास्ना

सिरशनाभवत्॥ अथैवं शूर्पणख्याः सेनहनेवलक्ष्मणस्योपरिसम्पक्वंथनहेतु सौवर्णदामस्थानीये॥ असीत्प
तुवर्त्तते॥ तमेते मंत्रं तिस्त्रिरिः सम्पक्व्याचष्टे आदितैरात्तासीत्पारु॥ इयंचात्र दितिः अस्याएवैतत्रास्त्रां करोति
इंद्रक्षेपेसन्नहननमितिइत्याह॥ इंद्राणीवात्र सहेद्रेवताता॥ ॐ सनत्यते आभ्रोदिति कात्यायनः दक्षिणपाशमु
तेरमतिमुच्यतेर्ध्वमुरू हतिनग्रंथिंकरोतीति॥ अस्येतिमंत्रं शेषमज्ञोरुत्तरपाशप्रतिमुच्योर्ध्वमुत्कष्यमा
णाहेदक्षिणपाशत्वं विलोर्ध्वामकस्यमत्तस्यवेवोसिव्यापकोसि विष्णुव्याप्ताविति धातुः मद्याचेष्टनरूपो
सिवेष्टवेष्टनइति धातुः छंदश्यकारादेशः॥ कात्यायनः॥ ऊर्जेत्वेत्याज्यमुदास्योत्तिहे आज्यत्वे विलाप्य
नायपरुवंवरूवधिश्रितेत्वामिदानींभूत्यैअधिकपाकाभावेन स्वादुत्तमरसत्वाभामेवक्षिप्रवेशप्रद्दृति
रूद्धासयामीति शेषः॥ कात्यायनः॥ पत्नीमवेक्षयत्यस्कन्नेजि॥ पाठस्तु॥ अदब्धेनत्वाचक्षुषाविपश्याम्यग्नेर्जि
ह्वासि सुभूर्देवेभ्योधाम्नेधाम्ने भवयजुषेयजुषेइति दभातिधातुर्हिंसार्थः हे आज्य अदब्धेन हिंसारहितेन
नचक्षुषात्वामवपश्यामि अप्राचीनंयथाभवतितथा योमुखःसन्नपश्यामिकिंचाज्यमग्नेर्यद्राज्युक्ततित्स्य

श्रेष्ठसिद्धेः कर्त्तव्यतोत्पद्यते अतस्तस्मिन्निमित्तत्वात् श्रेष्ठतमत्वं च प्रसिद्धा सा चाज्जिकासु भवतीति सुभूः। तत्र सुष्टुम
वन्तं देवेभ्यो वो पकारार्थं एवं विधमत्वं धाम्ने धाम्ने त तं यागफलोपभोगस्थानसिद्ध्यर्थं यज्ञेषु यज्ञेषु भवत्तत्त
यागासिद्धये योगं प्रभवफलेन प्रस्ताः इतिमुत्सस्या मन्त्रः शब्दे यागवाचीतरभिप्रेत्यक एव आह। भवयज्ञ
येयज्ञेषु इति। सर्वस्मै यज्ञायदेवेभ्य एधीत्येवं तदाहेति। कात्यायनः। सवितुस्त्वा प्रसव उत्पुनातीति प्रोक्षणी
रपर्वं वदिति। पाठस्तु। सवितुस्त्वा प्रसव उत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिरिति। हे आज्य सवि
तुः प्रसवे वर्त्तमानं त्वामुत्पुनामि अच्छिद्रेण सावित्रेण पवित्रेण पवित्रे स्थ इत्यनुवाके व्याख्यातः। सो यमाज्योत्पव
नमन्त्रः सवितुर्व इत्यादिकस्तु प्रोक्षणीनाम पाठ उत्पवनीयो मन्त्रः स च पवित्रे स्थ इत्यनुवाक एव गतः। त
स्मान्मन्त्रकारेण प्रोक्षणीष्वपर्वं वदित्युक्तं। कात्यायनः। आज्यमवेक्षते तेजोसीति। पाठस्तु। तेजोसि शु
क्रमस्यमृतमसीति। हे आज्य त्वं तेजोसि त्वं अविनाशिशरीरकान्तिहेतुत्वान्नेजस्त्वं शुक्रमसि दीप्तिमदसि
त्रिग्धस्वरूपत्वाद्दीप्तिमत्तत्वं। अमृतमसीति विनाशरहितमसि। बहुदिनावस्थाने प्योरनादिवत्सर्वदुर्वि

त्वादितेषामभावादविनाशित्वं।कस्माद्यमनः।स्रुवेणाज्यग्रहणं चतुर्जुह्वां धामनामेति सकृन्मंत्र इति।पाठस्तु।यत्
मनामासिप्रियंदेवानामनाधृष्टंदेवयजनमिति।हे आज्य त्वं धाम स्थानमसि।धीयते स्थाप्यते देवैरित्तव
त्तिरत्रेति।धामशब्दव्युत्पत्तिः।देवपुनर्नामादिभिश्रुतिभिर्विशेषणैर्विशेष्यते।नामयति सर्वाणि भूतानि आ
त्मानंप्रतिप्रणतानिकरोतीत्याज्यस्यनामत्वं।एतच्चाज्यं सोपेसरणां सर्वेषु मन्त्रेषु प्रसिद्धं।तथैतदाज्यंदेवा
नांप्रियंतत्प्रियत्वंचतित्तिरिः स्पष्टीचकार।प्रजापतिर्देवेभ्यो यज्ञान्व्यादिशन्स आत्मन्नाज्यमधत्त तं देवा
अब्रुवन्नेष वाव यज्ञो यदाज्यमप्येव नोऽत्रास्त्विति।यदा प्रजापतिर्यज्ञहवींषि देवेभ्यो विभज्य ददौ।तस्मि
न्नी आज्यं स्वकीयत्वे स्वीचकारात्तदृष्ट्वा देवा अयज्ञे सारभूतं हविराज्यमेवेति।वदंतोऽस्माकमप्याज्ये भागोऽस्त्वि
त्यपेक्षितवंत इत्यर्थः।तच्चेदमाज्यमनाधृष्टं गतसारत्वदोषेण कदाचिदप्यतिरस्कृतं एतदपि प्रश्नोत्तरा
भ्यां तित्तिरिर्दर्शयति।ब्रह्मवादिनो वदंति।कस्मात्सत्याद्यातयामान्यन्यानि हवींष्ययातयामाज्यमिति प्राजा
पत्यमिति ब्रूयादयातयामा हि देवानां प्रजापतिरिति।च तत्पुरोडाशप्राप्तौ इति चिरावस्थानेन यातयामानि

गतस्यास्ति।आज्यंतुनतथातत्रहेतुःप्रजापतिर्देवताकृत्त्वामित्यर्थः।अथवावज्ररूपत्वाद्नाशकंरक्षोभिरति
रस्कृतंतत्साहकरणंवः।वज्रोवाआज्यंतत्समारक्षणार्थमिति।तित्तिरिरप्याह।घृतंवैघदेवावज्रंकृत्वासोममघ्नव
न्निति।तद्यदस्मोऽस्यदेवयजनंदेवानुद्दिश्ययागसाधनंतेजःप्रतिष्ठमेव।अनंतरमंत्रस्तुघृतस्तेमाणइत्यादिकःप्रयोगा
नुसारेणोपरिष्टादुत्कर्षणीयः।अतएवकात्यायनेः।तक्षितियोगमुत्तरत्रैवमुवाच।पुरोडाशावभिघार्यपर्द्वास्मो
पस्तीर्ण्णेतिध्यायानति।पाठस्तु।यस्तेप्राणःपशुषुप्रविष्टोदेवानांविष्ठामनुयोवित्तस्यआत्मवान्सोमघृतवान्हि
भूत्वाग्निंगछस्वर्यजमानायविंदेति।हेसोमश्रेष्ठतयासोमसमानहेपुरोडाशतेतवप्राणोजीवनहेतुःप्रा
णासहश्लोयःआज्यपदार्थःपशुषुगवादिषुप्रविष्टःक्षीरमध्येप्रविष्टइवनिरूढः।किंचयःआज्यपदार्थःदेवा
नामिंद्रादीनांविष्ठामनुविशेषणायागभमोस्थितिमनुरसःसविततस्यैसत्वयमपिवेद्यामासादितेसंक्षिशेषण
तिष्ठति।तेनेसध्याहारः।त्वाद्दृष्टोनाज्यपदार्थेनत्वपिप्राप्तिश्चैनघृतवान्घृतयुक्तआत्मन्वान्भूत्वाजीवात्म
युक्तःस्वयंश्रेष्ठोभूत्वाअग्निंगछ।आहुतिप्रक्षेपवेलायामाहवनीयाग्निंप्राप्नुहि।पषउदेश्यामग्निर्देवतांना

श्रा॰ हिषामप्यव यजमानाय यजमानो यकार्यार्थं स्वर्विदं स्वर्गलभस्व हि श्रवो घृत्ताक्तं पुरोडाशस्य यथोक्तफ
लसाधनत्वमस्तिति द्योतयति। उपरिष्टाद्ध्यास्ता घृत्तोपेतस्य पुरोडाशस्य स्वर्गप्राप्तिहेतुत्वं त्तित्तिरिणाह
उपरिष्टाभ्यज्याधस्तादुपानक्ति। सुवर्गस्य लोकस्य समाप्त्या इतीति॥ ॥इति प्रथमेऽध्याये दशमानुवा
कः॥ ॥अथ विनियोगसंग्रहः। येदर्शपूर्णमासांगमंत्रास्तेध्याय मोर्ध्वमोर्युक्ताः हविश्श्रयत्तम थविध्या
ययोस्तयोः आघे दशानुवाकास्तेषामयो विविच्यंते। शाश्वापवित्रनिष्पत्तिसंहननं ग्रहणोऽस्संरोऽवघातः
कपालानि येषसंश्रयणं तथा वेदिराज्यग्रहे श्रेतेनुको यं: प्रकीर्तिताः इषेशाखां छिनत्ति ऊर्जेमादि
वायवेतिवत्सकांस्य स्पृशेदेव स्पृशेऽत्राचयत्न शाखोपगृहनं वसोः शाखां पवित्रं स्यास स्थमंत्रानुवाक गाः धो
स्यालीसमुपाभायवद्धो मातेस धिश्रयेनूवसोः। पवित्रमाभायद्देवस्त्वा सेवनेजपेत्। कामेति पृच्छेत्सावि
श्वा त्रिभिस्तत्रोत्तरं वदेत्। इडातेन्यानिदध्यात्तद्विस्तो दशमीरिताः अग्रेवृते दभिस्पेतो विकल्प्यंते वृतग्र
हे। कस्त्वोदपात्रमावध्यात्के मभिरध्वानान्यमो ग्रहः प्रत्तयेत्मत्स निष्ठेति धुरगमप्रति धर्ध्वरंस्पृशेदेवास्य शोदी

यां विष्ठुरां पृथ्वी क्षते। उर्वि त्वं यस्त्रे दृंहयध्वंतां संस्पृष्टे द्विः देवगत्याति शेषं तु भस्पृष्टा स्व रित्तीक्षते।
२९॥ हावारहस्ये त्रागछेत्स्थियाः स्थापयेत्॥ ६॥ विष्णु अनुवाके तृतीये स्मिन्नुक्तार एकोनविंशति। दर्भौ छिंधात्स
वित्रे स्थ उत्पुनाति सवितस्यः। हस्तेन चालयेद्देवीः प्रोक्ष्मायां प्रोक्षणं भवेत्। अग्रये त्वा हविः प्रोक्ष्य दैव्या
पात्रोक्षणं भवेत्। अनुवाके चतुर्थे स्मिन्मंत्राः मंत्राउदिता। खलु शर्मेत्यजिनमादाय अवधूतं स्यवेतितत्त्वात्र
दित्स्रुणाद्विचमेलिखलेविकल्पितौ। तस्मिन् क्षिप्य दद्यंसशलग्रहणं बहून्नाः सदृस्तद्धात्सेत्रेषु विः पत्नी
नि हासयेत्। आरुह्यादृषदोः॥ ७॥ वर्षवृद्धमसि परियहणं प्रतिलाहविष्कृद्योयो नि ष्पुनाति परे सतवेत्। तुवा निरस्य
दृषदं वा पुर्वस्ताद्विवेचनी दैवः यात्रो हविः स्थापन मंत्राः षोडश निर्मिता। ॥ उपवेषग्रहोथ्यं विरस्यं गारा वियोज
नं पुनः स्वीकारं आदि वैकपालं स्थापयेत्॥ ८॥ ध्रुवं अग्रे गारसमारोप्य परदर्ध्नामि तिध्यानं। प्रतपत्क्रुं प्राची कपाले
द्वेविश्वाह दक्षिणे तस्ता याचितउत्तरतो गारैरस रक्तः हति त्रिपुशति। अनुवाके तु पदेस्मिन् दश मंत्रा उदीरिता
शर्मासि अवधूता क्षिप्यास्त्र गिस्येते पर्व वत्रयः धिषेति दर्भं तत्र स्थापयेद्दिवः इतःतः शम्या मथः स्थापयिलास्थाप

येद्पद्दोसलात्मू।सात्म्यो प्पतंदुलाध्यान्मपिष्मात्मारोगोतिचत्त।स्त्रिभिः द्दी र्गोव्हुस्माजिनंप्रोहे च्चस्तुघेपिष्टमोक्ष
त्तोमहीनामाज्पनिर्वायोवेवेवे दंप्रमंचतिश्रनुवाकेसप्तमेस्मिन्मंत्रःप्रोक्ताश्चतुर्दशापिष्टावायोदेवयात्रांस
मायोजेलमानयेनू।जननसंयोतित्त द्धास्पशेदिदमिंदूयान्।इवेत्ताज्समभिग्निस्पपुरोऽशंच सेन्मतःउ
रुत्तेमपयेदग्निरदिस्त्तस्माभिमर्भशूनें।श्रतःपयग्निकरणंस्वरूवाश्रपयेद्वविःमाभेःस्पष्टातमेभस्मनी
त्वाप्ताय त्रितात्रयान्।निलयेत्स्थालनजलेमंत्राःषोडशवर्णितः।देवस्पस्फ्यासमादत्तइंद्रालम्भज
येरुगौतलंप्तपिष्टैस स्थाप्यपृथिवीप्रहरेदिदंवज्रंपुरीषमादत्तेवर्षवेदिमवेस्सत्तो।वर्षोत्करेन्यसेत्सांउ
द्दितीयमहतितस्यावज्रंतत्रयःपर्वरायौघःपुनर्न्यसेतात्तीयमहतिईपुःपर्ववस्पुःवज्रंत्रयः।त्तेवेदेःप
र्वपरिग्राहेगायत्रेणेत्तित्रिभिर्मंत्रेः।उत्तरस्तुपरिग्राहःस्यस्मादेवसादिभिःत्रिभिःअनुमार्ष्टिपुराचेदिंष्वि
षतःस्फ्यंपरिस्पजेत्तानवमेस्मनुवाकेस्मिंश्चतुर्विंशत्तिरीरितः।स्नुवंतयेत्सत्सुनिष्टसंमन्त्र्यादनिशीसतःपु
नःप्रत्युस्त्रिभिस्त्रायोमार्जनंचमश्चीप्यतो।श्रदिस्पेनसतेयत्रीविस्लोस्त्तस्तार्श्गृहनें।उर्ज्जेत्ताज्मपुरुस्पादध्वेप

त्रीमवसेयेनूांतविनुस्त्वाऽसभ्रूरूमभो स्वलिः श्लोथयेत्रविः॥तेजोस्याज्यमवेक्ष्यानुक्राग्लीत्तथामनी
यस्तेनत्तिपुरोडाशामंत्रापेचदृष्टोरिताः॥वेदार्थस्यप्रकाशेनतमोहार्दंतिरोधयन्पुमर्थांश्चतुरोदेया
द्विद्यातीर्थमहेश्वरः॥ ॥इतिश्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्तकश्रीवीरबुक्कभूपा
लसाम्राज्यधुरंधरेणसायणाचार्येणविरचितेमाधवीयवेदार्थप्रकाशेकाण्वसंहितायांप्रथमो
ध्यायः

९५

श्रीगणेशाय नमः॥ यस्य निश्वसितं वेदा यो वेदेभ्योऽखिलं जगत्॥ निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं॥ प्रथमेऽध्याये हविःसंपा
दकोपयुक्ता मंत्रा उक्ताः द्वितीयेत्तेन हविषा यज्ञोपयुक्ता मंत्रा उच्यंते तत्र प्रथमेऽनुवाके संस्कृतायां वेद्यां स्रुचामासादन उच्य
ते तत्राहौनावदिध्माबर्हिषोः प्रोक्षणं उच्यते कात्यायनः इध्मं प्रोक्षति विस्रस्य वेदिं च त्रिर्बर्हिः प्रतिगृह्य वेद्यां कृत्वा पुरस्तात् कृ
ष्णोसीति प्रतिमंत्रमिति॥ योयमिध्मः पूर्वं दर्भैर्बद्धस्तं विस्रस्य प्रोक्षेत् बर्हिस्तु प्रतिगृह्य तद्ग्रंथिं पूर्वस्यां दिशि यथा भ
वति तथा वेद्यां निधाय प्रोक्षेत् पाठस्तु कृष्णोस्याखरेष्ठोऽग्नये त्वा जुष्टं प्रोक्षामि वेदिरसि बर्हिषे त्वा जुष्टां प्रोक्षामि॥ बर्हिर
सि स्रुग्भ्यस्त्वा जुष्टं प्रोक्षामीति॥ हे इध्म त्वं कृष्णोसि॥ अंतोदात्तः कृष्णशब्दो वर्णवाची॥ अत एव कृष्णं वासः कृष्णं रूपमित्या
द्यावंतोदात्त आम्नातः॥ अयं तु कृष्णशब्द आद्युदात्तत्वान्न गवाची तस्मादत्र कृष्णमृगोसीत्यर्थः॥ यज्ञात्मको देवः कदाचिद
पि केनापि निमित्तेन स्वशरीरगोपनाय कृष्णमृगस्य रूपं कृत्वा देवेभ्योपसृत्य निगूढोऽभवत् ततो वनं गत्वा वनस्पतीन्यज्ञये
ष्यान् प्राविशत्॥ प्रविश्य खरे कठिने वृक्षे सर्वत्रावतस्थौ तदेतं हानि प्रेत्य कृष्ण इत्याखरेष्ठ इति च द्वयमुच्यते॥ तदेतत्ति
रिर्दर्शयति॥ यज्ञो देवेभ्यो निलायत कृष्णं रूपं कृत्वा स वनस्पतीन् प्राविशत् कृष्णोस्याखरेष्ठोग्नये चेति॥ अतो वनस्पतिजन्य

१

इध्मोग्नेः प्रियो भवति तस्मादग्नये त्वा जुष्टं प्रियं त्वां शुध्यर्थं जलेन प्रोक्षामि सोयमाद्यो मंत्रः हे वेदे त्वं असुरसकाशाद्देवैर्लब्
त्वा हे दिरसि मन्वा चिविदि धातुस्त्वां वेदिनामसु क्तासि । एतच्च ब्राह्मणमति निरीर्दृश्यते ॥ यद्विन्नामविंदंतित द्वेद्यै वेदित्वमि
ति ॥ अतस्माद्दर्शी त्वां बर्हिषे जुष्टां बर्हिर्धारणोपयोगितया प्रियां प्रोक्षामि । बर्हिषः प्रजारूपत्वाद्वेदेश्च पृथ्वीविरूपत्वाद्ब
र्हिर्धारकत्वं युक्तं तदाह तित्तिरिः प्रजा वै बर्हिः पृथिवी वेदिः प्रजा एव पृथिव्यां प्रतिष्ठापयतीति । सोयं द्वितीयो मंत्रः हे द
र्भ त्वं बर्हिरसि प्रभूतत्वात्वेदिरं हणसमर्थमसि अतस्त्वमोजुष्टं स्तुवां धारणोपयोगित्वेन प्रियं त्वां प्रोक्षामि स्तुचायेन
मानस हे शत्वा यजमानस्य प्रजानां मध्ये वस्यानुं सुसुकत्वात्प्रजारूपे बर्हिषि यजमानस्यावस्थानमुचितं । कात्यायनः शे
षं मूलेषु उपसिंचत्यदित्यै व्युंदनमसीति । असीति मंत्रशेषः हे प्रोक्षणशेषोदक त्वं अदित्यै भूम्या व्युंदनमसि विशेषेणाक्ले
दनसाधनमसि दर्भमूलशावनं क एव उपयाद यति । अथ योः परिशिष्टाः प्रोक्षिता आपो भवंति ताभिर्बर्हिषो मूलान्युपनि
नयत्यदित्यै व्युंदनमसीतीयं वा अदितिरोषधयो वै बर्हिरस्याः एवैतत्पृथिव्या ओषधीनां मूलान्युपानक्ति तस्मादिमा आर्द्र
मूला ओषधय इति ॥ कात्यायनः बर्हिर्विस्र स्य पुरस्तात्प्रस्तरं ग्रहणाति विष्णोः स्तूपोसीति मंत्रशेषः दर्भमुष्टिरूपे हे प्रस्त

राम

रत्वं विष्णोर्व्यापकस्य यज्ञस्य स्तुपोसि केशसंघातरूपदर्भशिखेव दर्भसंघातरूपोसि स्तुपः केशसंघातयोरिति धातुः त
दाह कल्पः अथ विस्तरः स्तुपुरस्तात्प्रस्तरं गृह्णाति विष्णोस्तुपोसीति यज्ञो वै विष्णुस्तस्य हैव स्तुपो यच्छिखा तामेवैतद्द
दधातीति कात्यायनः वेदिं स्तरणात् ऊर्णम्रदसमिति यदुक्तं ऊर्णम्रदसं त्वा स्तृणामि स्वासस्थां देवेभ्य इति हे वेदे
त्वां स्तृणामि दर्भैराच्छादयामि कथंभूतां त्वां ऊर्णम्रदसं ऊर्णामिव म्रद्वीयं धाय भोहपवेहुं कं बलं वहु पुष्टं युक्तं खेनसंको
च्यभूमावास्तरणेति आवमः काठिन्यं परित्यज्य मृदुर्भवति तस्मात् दर्भैराच्छादिता भूर्मृदु संपद्यते देवेभ्यः स्वासस्थां देवोप
कारार्थं सुखेनासितुं स्थानभूतां एतदेव कल्प आह स्वासनं देवेभ्य इत्येवैनदाहेति भूपतये स्वाहेत्यादीनां त्रयाणां मन्त्राणां
प्रयोगानुसारेणान्यत्रोत्कर्षः कर्त्तव्यः अत एवान्यत्र कात्यायन आह स्त्रुग्मभिमृशति भूपतये स्वाहेतीति तमेतं विनि
योगं कल्पो विस्पष्टं प्रपंचयामास तदभिमृशति भूपतये स्वाहा भुवनपतये स्वाहा भूतानां पतये स्वाहेत्येतानि वै नेषाम
ग्नीनां नामानि भूपतिर्भुवनपतिर्भूतानां पतिरितीति भूपत्यादयस्त्रयोग्नेर्भ्रातरः स्वाहाशब्दो देवान्प्रति दानवाचकोभि
पातः अत एव वृहदारण्यके श्रूयते देवा उपजीवन्ति स्वाहाकारं च वषट्कारं चेति हविर्ग्रहणकाले परिधिभ्यो बर्हिर्यद्हविः

स्कन्नं तद्धविर्भूपत्यादिनामकेभ्योऽग्निभ्रातृभ्यस्त्रिभ्यो दत्तमिति मंत्राणामर्थः एतेग्निभ्रातरो देवेभ्यो हव्यं वहंस्तो यदामृता
स्तदानीमग्निः स्कन्नं हविर्भ्रातृभ्यो भवत्विति वरं वृतवानतस्तन्मिन्नमर्थं तैत्तिरीये अग्नेस्त्रयो ज्यायांसः सोभ्रातरस्त्रोसन् ते देवे
भ्योहव्यं वहंतः प्रमीयंते स्मारभ्यां तेस्य इमुवाच सो ब्रवीद्वरं वृणै वदेवा गृहीतस्याहुतस्य बहिः परिधिः स्कंदात्तेभ्य
तॄणां भागधेयमसदिति तस्माद्यद्गृहीतस्याहुतस्य बहिः परिधिः स्कंदति तेषां तद्भागधेयं तानेव तेन प्रीणाति कासा
यनः परिधीन्परिदधाति मध्यमदक्षिणोत्तरान् गंधर्वेत्यतिप्रतीकं त्रमिति प्रथममंत्रपाठस्तु गंधर्वस्त्वा विश्वावसुः
परिदधातु विश्वस्यारिष्ट्यै यजमानस्य परिधिरस्यग्निरिड ईडित इति द्युलोकावस्थितं सोमं रक्षितुं सोमस्य पार्श्वे वि
श्वस्मिन्सर्वस्मिन्प्रदेशे वसतीति विश्वावसुः एतन्नामको गंधर्वः तथा च श्रुत्यंतरं विश्वावसुः सोमं गंधर्वमिति त्वा प्रदे
शत्रयपरिमितं समिधं त्वां परिदधातु आहवनीयस्य पश्चिमभागे सर्वतः स्थापयतु किमर्थं विश्वस्यारिष्ट्यै रिष्टिर्हिंसा
र्थः आहवनीयस्थानरूपस्य विश्वस्य हिंसा राहिंसा यथा परिधेरभावे सति असुराः प्रविश्य हिंसां कुर्वंति किं च यजमानस्य
परिधिरसि यजमानमसुरेभ्यो रक्षितुं पश्चिमदिशि सर्वतः स्थापितोसि किं चाग्निरिलईलितः असीत्यनुवर्तते आहवनी

२म

यस्याग्नेः प्रथमोऽस्येष्टस्यातानूनपान्नामधेयोग्निस्तद्रूपोसिसचाग्निरिलः स्तुतियोग्यस्तस्मादीलितो होत्रादिभिः स्तुतः ईड स्तुतावि
तिधातुः द्वितीयमंत्रपाठस्तु इंद्रस्यवज्रहूरसिदक्षिणो विश्वस्यारिष्ट्यै यजमानस्यपरिधिरस्यग्निरिलईलित इति हे द्वितीयप
रिधे त्वं इंद्रस्य दक्षिणो बाहुरसि रक्षायां समर्थत्वादिंद्रबाहुत्वोपचारः विश्वस्येत्यादि व्याख्यातं अत्राग्निशब्देन द्वितीय
स्यातानूनपान्नामको विवक्षितः तृतीयमंत्रपाठस्तु मित्रावरुणौ त्वोत्तरतः परिधत्तां ध्रुवेणधर्मणा विश्वस्यारि
ष्ट्यै यजमानस्यपरिधिरस्यग्निरिलईलित इति हे तृतीयपरिधे त्वां मित्रावरुणावेतन्नामकौ देवौ ध्रुवेण स्थिरेण धर्मणा धार
णेन पोषणेन वा उत्तरत उत्तरस्यां दिशि परिधत्तां परितः स्थापयतां विश्वस्येत्यादि पूर्ववत्‌ अत्राग्निशब्देन भूतानां पति
रित्येतन्नामकस्तृतीयस्याता विवक्षितः कात्यायनः प्रथमं परिधिं समिन्धोयस्य वीतिहोत्रमिति दधातीति पाठस्तु वीति
होत्रं त्वा कवे द्युमंतं ८ समिधीमहि अग्ने बृहंतमध्वर इति कविः क्रांतदर्शी सर्वज्ञ इत्यर्थः तथाविध हे अग्ने त्वां अध्वरे यागे
निमित्तभूते सति समिधीमहि अनेनाधानसमिधइध्मस्थापनेन सम्यग्दीपयामि कथंभूतं त्वां वीतिहोत्रं इगतावितिधातु
रितिर्गतिः विविधा इतिव्याप्तिः समृद्धिरित्यर्थः वीतये होत्रं होमो यस्याग्नेरिति विग्रहः एतमेवार्थं तित्तिरिर्दर्शयति वीतिहो

२

त्वंखाकवदत्याह अग्निमेवहोत्रेणसमर्द्धयतीतिघुमंतंस्वतएवघोतन्नोपेतंचहंतं रहघागवर्त्रिखेनकात्यायनः अनुप
स्थश्यद्वितीयांसमिदसीति द्वितीयाघारसमिधमादधातीत्यनुवर्त्तते हे आघारसमिदग्नेः पूर्वभागेस्थाप्यमानभव
सि कात्यायनः सूर्यस्त्वेतिजपित्वाहवनीयमीक्षमाणइतिपाठस्तु सूर्यस्त्वापुरस्तात्पातु कस्याश्चिदभिशस्त्यै हे आहव
नीयत्वांपुरस्तात्पूर्वस्यांदिशि सूर्यः कस्याश्चिदभिशस्त्यैसर्वस्याअपिहिंसायाःपातुपरिरक्षतुयाकाचिद्धिंसाप्रसक्तातांसर्वां
परिहरत्वित्यर्थः चतुर्थीपंचम्यर्थे द्रष्टव्याइतरस्मिन्निरूप्येपरिधित्रयेणरक्षाभवति पूर्वस्यांतुपरिध्यभावेपिसूर्योरक्षकः इ
ममेवार्थकएवमाह परिधयइमेअभितोगुप्त्यैपरिहिताभवतिसूर्यमेवास्यैतत्पुरस्तात्पुरोगंकरोतीति कात्यायनः वर्हि
षस्तरणोतिरश्चीनिदधातिसवितुर्बाहुभ्यामिति वाहूस्थइतिमंत्रशेषः वेधामास्तीर्णस्यप्राग्ग्रस्यदर्भस्योपरिपुनरस्तीर्यमाणस्य
प्रस्तरस्यसांकर्यपरिहारायपत्रणाद्वयंतिर्यङ्निदध्यात् हे तृणेयुवांयनुसवितुःप्रेरकस्यदेवस्यबाहूस्थःदक्षिणोत्तरत्वा
द्बाहुस्थानीयेभवथः कात्यायनः तयोःप्रस्तरं तृणास्तरणाच्छादसमिति पाठस्तु ऊर्णम्रदसंत्वास्तृणामीस्वासस्थंदेवेभ्यइ
ति पूर्ववद्याख्येयं कात्यायनः अभिनिदधात्यास्यावसदइति सव्यांगुल्याभ्यन्यइति प्रस्तरमित्यनुवर्त्तते आस्तीर्णप्रस्त

एम

रं तद्वद्दुहितेऽन्यस्थाने वामांगुल्या प्रसारयेत् पाठस्तु आसावसवो रुद्रा आदित्याः सदंतु इति प्रस्तरस्य सवनत्रयाभि
मानिनस्त्रयो वस्वादयो देवगणाः स्वामासादयंतु सर्वतः प्रसारयंतु कात्यायनः जुहूं प्रतिगृह्य निदधाति घृताचीत्येव
मितरे उत्तराभ्यां प्रतिमंत्रमिति प्रथममंत्रपाठस्तु घृताच्यसि जुहूर्नाम्ना सेदं प्रियेण धाम्ना प्रिये सदसि सीदेति हे जु
हु त्वं घृतमंचतीति घृताची घृतपूर्णासि भवसि जुहूर्नाम जुहू जुहूरित्येतत्तव नामधेयं हूयतेऽनयेति व्युत्पत्तेः सा त्वं इदं प्र
स्तरस्योर्ध्वस्थानं अधितिष्ठेति शेषः उक्तस्यैव व्याख्यानं प्रियेणेत्यादि कं प्रियेण देवानां प्रीतिहेतुना धाम्ना आज्यरूपेण
तेजसा सहेति शेषः तद्धि देवानां प्रियं धाम यदाज्यमस्तीति हि श्रुतिः प्रिये सदसि प्रस्तरस्योपरि प्रियस्थाने सीद प्राप्नुहि उ
पविशेत्यर्थः द्वितीयमंत्रेण पाठस्तु घृताच्युपभृन्नाम्ना सेदं प्रियेण धाम्ना प्रिये सदसि सीद उपजुह्वः समीपे स्थि
त्वा बिभर्त्याज्यं धारयतीत्युपभृत् व्याख्यातमन्यत् तृतीयमंत्रपाठस्तु घृताच्यसि ध्रुवा नाम्ना सेदं प्रियेण धाम्ना प्रिये स
दसि सीदेति ध्रुवमति स्थैर्यं याति धातुः यथा होमार्थं जुहूपभृतोर्गच्छतोः चलनं तद्वदस्याश्चलनाभावे स्थिरत्वात् ध्रुवे
ति नाम व्याख्यातमन्यत् कात्यायनः प्रियेण धाम्नाहवींषि वेद्यां कृत्वेति कण्वो ह्याह प्रियेण धाम्ना प्रिये सदसि सीदेत्यन्या

निहवीषिआसादयइति आग्नेयः पुरोडाश इत्यादीन्यन्यानि मंत्रस्तत्पूर्ववदेकैकं हविःसंबोध्य व्याख्येयः कात्यायनः ध्रुवाऽ
सदन्निति सर्वाण्यालभते पाठस्तु ध्रुवा असदन् तस्य योनौ तादित्योपाहि पाहि यज्ञं पाहि यज्ञपतिं अतस्त्वं अवश्यं भाविप्र
लोपेतत्वेन सस्यस्य यज्ञस्य योनौ स्थाने सर्वे हविर्विशेषा ध्रुवा असदन् आवश्यकत्वेन तत्र स्थिरा अतिष्ठन् हे विष्णो व्यापक
यज्ञपुरुषतान् पाहि तान् हविर्विशेषान् रक्ष अन्यत्सुगमं व्याख्यातं कात्यायनः पाहि मामित्यान्नानमिति आलभतइति शे
षः यज्ञन्यमिति मंत्रशेषः स च मंत्रः पूर्वमेव व्याख्यातः द्वितीयाध्याये प्रथमोनु—कः प्रथमेनुवाके इध्मप्रोक्षणमार
भ्य सुगासादनोपयुक्ता मंत्रा उक्ताः द्वितीये सुच्यानारत्रिषयामंत्रा उच्यंते कात्यायनः इध्मासन्नहनमनु परिधिसमार्जनं अग्ने
वाजजिदिति त्रिस्त्रिः परिक्रामम् इति पाठस्तु अग्ने वाजजिद्वाजं त्वा सरिष्यंतं वाजजितं संमार्ज्मीति हे वाजजित् अग्ने वाजम
न्नं जयतीति वाजजित् तथाविधहे अग्ने त्वां संमार्ज्मि शोधयामि कीदृशं सरंतं त्वां वाजं सरिष्यंतं अन्नमुद्दिश्य गमिष्यंतं अन्नसं
पादनोपयुक्तं वाजजितं अन्नमुद्दिश्य जयो येतं अन्नप्राप्तिं चलितं बारकं अस्मिन्नर्थः कात्यायनः अपरमाह वनीयादंजलिं क
रोति नमो देवेभ्य इतियेदेवा अनुजानमनु स्वाहा [illegible] कात्यायनः स्वधापितृभ्यइति दक्षिणात उत्तानमिति पु

एम

राग्राङ्मुखो देवनमस्कारार्थमंजलिं कृतवान् इदानीं पितृनमस्कारार्थं दक्षिणामुखउत्तानपाणिद्वयं कुर्यात् ये पितरः पा
लकाः संति तेभ्यः स्वधास्तु स्वधा शब्दो निपातः स च पितृतृप्ति अर्थे देयपिंडादिदानेन वर्त्तते अतो यद्वयं तद्दानमित्य
र्थः अनेन मंत्रद्वयेन देवाश्च पितरश्चोपचर्यंते तदाह कएवः अथ स्रुवावारपि कथमन्येण स्रुचोरंजलिं निदधाति न
मो देवेभ्यः स्वधा पितृभ्य इति देवेभ्यश्चैवैतत्पितृभ्यश्चानिह्नुते आर्त्विज्यं करिष्यन्निह्नुते अपलपति उपचरतीत्यर्थः का
त्यायनः सुयमे मइति जुहूयमन्तावारयेति पाठस्तु सुयमे मे रपास्तमस्कन्नमद्यास्यं देवेभ्यः संस्त्रियासमिति हे जुहूयमन्तौ
मे मदर्थं सुयमे सुष्ठु नियते मे पापास्तं भवतं यथा ध्रुवयोः स्थितमाज्यं न स्कंदति तथा धारयंतमित्यर्थः तथासत्यहमद्यास्मिन्
कर्मानुष्ठानदिवसे देवेभ्यो देवनोपकारार्थं आज्यं ध्रुवयोः स्थितं च तत्र स्कन्नं मोयथा न स्कंदति तथा संस्त्रियासे सम्यक् प्रेष
णां करवाणि अस्कन्नमित्यादेरभिप्रायं कएवो दर्शयति अविष्णुष्व मधमं यज्ञं देवेभ्यस्तनवाद्यस्ये वैतदाहेति कात्यायनः द
क्षिणातिक्रामत्यंघ्रिणा विष्णतीति पाठस्तु अंघ्रिणा विष्णो मा त्वावक्रमिषमिति हे विष्णो व्यापक यज्ञपुरुष त्वां अंघ्रिणा
पादेन मा चक्रमिचं अवक्रमणं मा कार्षं पादेनातिक्रमणादोषो मे मा भूदित्यर्थः एतमेवभिप्रायं कएवो दर्शयति यज्ञो वै वि

ष्णुस्तमनतिक्रमिष्यन्नू प्रभवति तस्माद्रौद्रेणाग्निं कृते भावावक्रमिषमिनीति कात्यायनः परिधीनपरेणासंचरो होमः [illegible] नः सव्ये
नेतो दक्षिणेनास्तुतो वसुमतीमित्यवस्थायेति परिधीनां पश्चिमभागः संचरदेशः ततो होमाय ध्रुक्रमस्य सव्येन पादेनेतः
परिधेः पश्चिमदिश्यवस्थानं दक्षिणेन पादेनास्तुतः पूर्वस्यां दिशि दिश्यवस्थानमित्यर्थः पाठस्तु वसुमतीमग्ने ते छायामु
पस्थेषं विष्णोः स्थानमसीति हे अग्ने तेतव छायां तमुपस्तीयथो पुरुषस्य छाया समीपवर्त्तिनी तद्वत्त्वसमीपवर्त्तिनी भू
मिं उपस्थेषं से वेषं उप पूर्वस्मित्र्ठतिः सेवार्थे वर्त्तते सहस्त्रवाचिकः सेवाप्रकारः स्पष्टीक्रियते विष्णोः स्थानमसि हे वसु
मति त्वं यज्ञस्य स्थानं भवसि अत्र छिपित्वायायाः कर्तुं [illegible] नत इत्यर्थः आहवनीयसमीपवर्त्तित्वादस्याभूमेर्यज्ञस्थानत्वंयु
क्तं तदाह काण्वः यज्ञो वै विष्णुर्यज्ञस्यवा एतदंतिकं तिष्ठति तस्मादाह विष्णोः स्थानमसीति कात्यायनः इतइंद्र इति जुहो
तीति पाठस्तु इत इंद्रो वीर्यमकृणोदूर्ध्वो ध्वर आ[illegible] देहीं [illegible] त्वंअवनां त्वां द्यावापृथिवी अवत्वं द्यावापृथिवी स्वि
ष्टकृद्देवेभ्य इंद्र आज्येन हविषाभूत्स्वाहेति पूर्वस्मिन्[illegible] स्थानमुक्तं तदेव देवानां विजयहेतुत्वाद्विवृणोदे
न पराम्रष्यते दिवं यज्ञ [illegible] अतिरिक्तभूमेरस्तु [illegible] देवतानां पराजये प्रियज्ञ प्रदेशः पराजयरहितः अत एव ति

राम

त्रिरित्याह विष्णोः स्थानमसीत्याह यज्ञो वै विष्णुः यत्तत्खलु देवानामपराजितमायतनं यद्यज्ञ देवानामेवापराजित आ-
यतने तिष्ठतीति तथा विष्णोर्हि तोऽस्माद्वयं [illegible] स्थानात्स्वकीयमूर्ध्वलोकं पितोयुद्धार्थमुद्युक्त इंद्रो वीर्यमकरोत् वीर-
स्य कर्म शत्रुवधरूपमकरोत् इंद्रेणाचीर्णं [illegible] प्रति शत्रुप्रयुक्तं [illegible] भावाद्ध्वरोऽयं यज्ञ ऊर्ध्वं आस्थाद्दुन्नतो वा स्थितः
यस्माद् ध्वरो निर्विघ्नो वा स्थितः तस्मात्कारणात् हे अग्ने त्वं वेर्होतुः कर्म विद्धि जानीहि तथा हव्यं देव संवधि हतकर्म-
वर्विद्धि होतस्त्वं देव हव्यं तत्त्वयोरग्निसंबंधित्वं कारात्मो हर्षयति अग्ने वेर्होत्रं वेर्दूत्यमवतु मां यं हवा एतदग्निर्देवानां हो-
ता तद्दूतश्च तद्धूमयं विद्धि यद्देवानामसीत्येवैतदाहेति द्वेह शंसामग्निं उभे द्यावापृथिवी देवेन आवतां पालयतां हे अ-
ग्ने त्वमपि द्यावापृथिवीलोकद्वयं देवेभ्य अवपालय द्वयमन्योन्यपालने सति देवेभ्यो देवोपकारार्थं इंद्र आज्येन हविषा
स्माभिः देवेन स्विष्टकृत्भूत् सुहुतं कारोतीति स्विष्टकृन्नाहरो भवतु यद्वा स्माभिरिज्यते तत्र दिष्टं सर्वं वै कल्पे रहि-
तं करोतु स्वाहा इंद्रदेवमुद्दिश्य दत्तमाज्यं दत्तं कामयतः ३ जनयत्वा स्मा व्यार्पास ४ स्पर्शयन् स्रुवावेस्पजुहोध्रुवाग्ं स-
मनक्तिः संज्योति षे ति स्योतिरिति मंत्रशेषः अत्रागच्छुनामिसध्याहर्त्तव्यं ध्रुवायां स्थितमाज्यरूपं यज्ज्योतिः तेन ज्योति

६

पासहजुहुवासिच्यमानमाज्यरूपंज्योतिःसंगच्छतां आघारशेषाज्यस्य ध्रौवाज्यस्य च संगमनं तेन त्रिरिद्दर्शयति शिरो
वा एतद्यज्ञस्य आत्मा ध्रुवा आघार्य ध्रुवां ५ समनक्ति आत्मन्नेव यज्ञस्य शिरः प्रतिदधातीति आत्मशब्देनात्र गलादध
स्ततो देहभागो विवक्षितः का एवो पितृभ्रुवा ६ समनक्ति शिरो वा एतदित्यादिनात्रथैवावोचत् अथोत्तरस्य प्रयोग
स्यापक्रमः प्रयाजाश्च आज्यभागौ प्रधानयागस्तच्छेषप्राशनं चेति तत्र प्राशनार्थं हविश्चतुर्द्धीकुर्वेदं ब्रह्मण इदं
द८ होतुरिदमध्वर्योरिदमग्नीध्र इदं स्विगस्या आदिशेत् तदानीं यजमानो मन्त्रं जपेत् तदाह कात्यायनः अत्र पित
र इति यजमानो जपतीति पाठस्तु अत्र पितरो मादयध्वं यथाभागमावृषायध्वमिति हे पितरो यूयमत्र शास्मिंश्चतुर्द्धी
विभज्यादिश्यमाने मादयध्वं हृष्टा भवत ततो हविर्विषयथाभागं स्वं स्वं भागमनतिक्रम्य आवृषायध्वं समन्तात् वृषवदा
चरत यथावृषो घासं स्वाभीष्टं प्राप्य तत्रिपर्यन्तं स्वीकरोतीति तद्वत्स्वीकुरुत यद्यप्येतान् भागान् अस्विज्ञो भक्षयंतिन
तु पितरस्तथापि तद्दर्शनेन पितॄणां तृप्तिर्भवति न वै देवा अश्नन्ति न पिबन्त्येतद्देवा अमृतं दृष्ट्वा तृप्यन्तीति श्रुतेः अतएव कात्या
यनः विसृज्यामीमदंतेति जपतीत्यनुवर्त्तते पाठस्तु अमीमदन्त पितरो यथाभागमावृषायिषतेति यान् पितॄन् प्रतिस्वी

एम

कुरुतेसुक्तंतेपितरः अमीमदंतमरवायं हत इदं तस्य शा... मावृषायिषत स्वस्वभागमनतिक्रम्य स्वीकृतवंतः पूर्वमंत्रे
ण भागान् स्वस्वाजयेत् इमं हविः स्वज्यजनयतीति शेषः कात्यायनः इडैकमाहरति द्यावापृथिव्योरुपह्वानेऽग्नीधेष
इवत्तं प्राश्नासु उपहूता पृथिवीतीति यदा होता... द्यावापृथिव्योरुपह्वानं करोति तदानीमाग्नेयपुरोडाशमग्नीषोमी
यपुरोडाशं चैकैकमानीय प्राय षडवत्तं संपाद्य होत्रे स चोपहूतेति मंत्रेण प्राश्नीयात् पाठस्तु उपहूता पृथिवी माता
पमा पृथिवी माता ह्वयतामग्निराग्नीध्रात्स्वाहा उपहूतो द्यौः पितोप मां द्यौष्पिता ह्वयतामग्निराग्नीध्रात्स्वाहेति येयं
पृथिवी दृश्यते सेयं जगतो माता उपहूताभ्यनुज्ञाता मारवेनास्माभिर्भाविनाः सा च माता पृथिवी मां ह विशेषभक्षणा
यो घृत उपह्वयतामनुज्ञानातु आग्नीध्रादेतन्नामकादार्त्विज्यः कर्मणो हेतोरग्निरहं च वह्निस्वरूपः सन् भक्षयामीति
शेषः तस्मात्स्वाहा मदीयमुखे मा विद हविः सुहुतमस्तु प्रथमपुरोडाशशेषभक्षणे मंत्रः उपहूतो द्यौरित्यादिकस्तु द्वि
तीयपुरोडाशशेषभक्षणे मंत्रः द्यौर्द्युलोकाभिमानी देवता पिता सर्वस्य जगतः पालकत्वात् पिता उपहूतोऽस्माभिश्च पित
त्वेनाभ्यनुज्ञातो द्यौः पिता द्युलोकरूपः स पिता मां भक्षणे यो घृतमुपह्वयतामभ्यनुज्ञानातु अग्निरित्यादिकं पूर्ववत्

६

कात्यायनः आशास्तानो मयीदमिति यजमानोऽनुपतीति यदा होतामंत्रमाशीर्विषयं प्रयुंक्ते तदा यजमानोऽनुजपेत् पाठस्तु मयीदमिं
द्र इंद्रियं दधात्वस्मान् रायो मघवानः सचंतां अस्माकं सत्वाशिषः सत्या नः संत्वाशिष इति इंद्रः परमेश्वरः इदमस्मदपेक्षितमिं
द्रियं इंद्रवत् वीर्यं मयि यजमाने दधातु स्थापयतु किंच रायो धनानि दैवमानुषभेदेन द्विविधानि मघवानो धनवंतः अस्मान्
यजमानान् सचंतां समयंतु सेवंतां किंचास्माकं यजमानानामाशिषो मीष्टार्थस्याशंसनानि संतु वियंतां किंच नोऽस्माकमाशिषः पू
र्वोक्ताः सत्याः संतु अवितथा भवंतु कात्यायनः संमार्ष्टि पूर्ववत् परिक्रामं ससवांऽसमितीति पूर्ववदभ्यस्तग्रहणैः यथाग्ने वा
जजिदिति मंत्रेण संमार्गः कृतः परिक्रम्य च संमार्जनं अत्र तु परिक्रमणं विना संमार्जनमिति विशेषः तथा मंत्रपाठेऽपि पूर्वत्र स
रिष्यंतमिति अत्र तु ससवांऽसमिति विशेषः पाठस्तु अग्ने वाजजिद्वाजं त्वा सरिष्यंतं वाजं ससवांऽसं वाजजितं संमार्ज्मीति वाजं ससृ
वांऽसं अन्नमुद्दिश्य गतवंतमित्यर्थः अग्नयत्तूर्द्दिवं इति द्वितीयेऽध्याये द्वितीयोऽनुवाकः द्वितीये तु द्यावापृथिवीविषया मंत्रा उक्ताः
तृतीये देव सवितरित्यादयो मंत्रा ब्रह्मसंबंधिप्रयोगे उक्ताः तत्र कात्यायनो ब्रह्माणं वरणीते ब्रह्मास्य प्रयोगं ब्रुवन् देव सवित
रित्युक्ते प्रत्युदाहरणात् पाठस्तु देव सवितरेतं त्वा वृणते बृहस्पतिं ब्रह्माणं तदहं मनसे प्रब्रवीमि मनो गायत्र्यै गायत्री त्रिष्टुभे त्रि

राम

ष्टुप्जगत्यै जगत्यनुष्टुभे अनुष्टुप्प्रजापतये प्रजापतिर्विश्वेभ्यो देवेभ्यः बृहस्पतिर्देवानां ब्रह्माहं मनुष्याणां भूर्भुवः स्वरिति हे
सवितर्देव एतं त्वा सवितृरूपं त्वां बृहस्पतिं ब्रह्माणं बृहस्पतिरूपं ब्रह्माणं ब्रह्मनामकमृत्विजं वृणाते याज्ञिकावरणं कुर्वं
त सवितृशब्दाभिधेयः परमेश्वर एव बृहस्पतिरूपेणावतारं कृत्वास्मद्यागे ब्रह्मेति भावयंतीत्यर्थः तत्सर्वमहमनुष्ठाता
मनसे मनोभिमानिदेवाय प्रब्रवीमि कथयामि तच्च मनो गायत्र्यै गायत्रीदेवतायै प्रब्रवीमि इति शेषः स चोत्तरेष्वपि पंच
सुवाक्येषु द्रष्टव्यः गायत्री त्रिष्टुब्जगत्यनुष्टुप्प्रजापतिर्विश्वेदेवमुखेभ्यो ब्रह्मा प्रख्यातः स च ब्रह्मा देवानां यागे बृहस्प
तिरभूत् मनुष्याणां यागे त्वहं ब्रह्मा भवामि इत्थं भूर्भुवः स्वराख्येषु त्रिषु लोकेषु ब्रह्मप्रसिद्धिर्द्रष्टव्या सोयं मंत्रो वतेन
ब्रह्मणा जपितव्यः कात्यायनः ब्रह्मसदनात्तृणं निरस्यति निरस्तः पाप्मेति योयं पाप्मा यज्ञविघातायासुररूपेण तृणे नि
गूढः सोयं निरस्तो निराकृतः कात्यायनः इदमहं बृहस्पतेः सदसि सीदामीति ब्रह्मसदनमाहवनीयाभिमुख उपविश
तीति इदमित्यंगुल्या निर्दिशन्नू ब्रह्मेत्थं ब्रूते। अहं मनुष्याणां ब्रह्मा बृहस्पतिर्देवसंबंधि ब्रह्मणः सदसि स्थाने सीदाम्युपवि
शामि कात्यायनः मित्रस्य वेति प्राशित्रं प्रतीक्षत इति चक्षुषा प्रतीक्ष इति मंत्रशेषः हे प्राशित्रभाग त्वां मित्रस्य एतन्नामकस्य

देवस्य चक्षुषा प्रतीक्षे सम्यक् पश्यामि कात्यायनः देवस्येति प्रतिगृह्णातीति पाठस्तु देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां
पूष्णो हस्ताभ्यां प्रतिगृह्णामि स्वीकरोमीत्यर्थः व्याख्यातमन्यत् कात्यायनः पृथिव्यास्त्वेति सादयतीति पाठस्तु पृथिव्यास्त्वा नाभौ
सादयाम्यदित्या उपस्थे इति सोयं मंत्रोऽग्ने व्रतपत इत्यनुवाके व्याख्यातः कात्यायनः पुनरादाय देवस्य त्वेत्यनामिकांगुष्ठाभ्या
मिति पाठस्तु देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददे इति असावप्यसकृद्व्याख्यातो मंत्रः कात्यायनः
अग्नेष्ट्वेति प्राश्नाति दंतैरनुपस्पृशन्निति पाठस्तु अग्नेष्ट्वास्येन प्राश्नामि बृहस्पतेर्मुखेनेति हे प्राशित्र त्वां अग्नेरास्येन व
ह्निदेवतासंबंधिना मुखेन तथा बृहस्पतिसंबंधिना मुखेन च प्राश्नामि भक्षयामि अतो मदीयमुखस्योपद्रवो नास्तीत्यभिप्रा
यः पुरा कदाचिद्देवानां यागे बृहस्पतिः प्राशित्रं प्रतिगृह्णन्न मक्षयं श्वनं हिंसिष्यतीति भीतः सन् हिंसापरिहाराय देवस्य त्वे
ति मंत्रेण प्रतिगृह्याग्नेष्ट्वेति मंत्रेण प्राशित्र[illegible]वान्सोऽग्राह शपं न्वद्यामि प्राग्नेति निरिदिस्यमाह सोबिभेत् प्रतिगृह्णंतं मां हिंसि
ष्यतीति देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां प्रतिगृह्णामीत्यब्रवीत् सवितृप्रसूत एवैनं ब्रह्मणा देवताभिः
प्रत्यगृह्णात् सोबिभेत् प्राश्नंतं मा हिंसिष्यतीति सोऽग्नेष्ट्वास्येन प्राश्नामीत्यब्रवीत् न त्वाग्नेरास्यं किंचन हिनस्तीति कात्यायनः नामि

एम

मालभंते यान्यश्वं नरिनीति पाठस्तु यान्यस्वं जरे दैवमा स्ता दूह ॐ श्रामयंतु स्वाहा कृतं जठरमिंदूस्य गछ घसिनामे मासंद छाउ
र्दे मेनामेः सीद इंद्रस्य त्वा मे जठरे सादयामि इति अस्वंत मेले बुमध्येया देवताः संतिता देवता इदं प्राशित्रं शमयंतु शांतं
कुर्वंतु भक्षितं सम्म मोदरे कमप्सु दूवनकरोतु तथा कुर्वंतु हे प्राशित्र स्वाहा कृतं मया स्वाहाकार पूर्वकं इंद्राय ममर्पितं
तस्मैं इंद्रस्य जठरं गछ अतोपमो यदुवोन भविष्यति बहुलं अदन इति धातुः मे घसिनाम दीये नादने न भक्षणेन मासंद छोः
संपर्कं माकुरु दंतस्य र्शमा कुरु इत्यर्थः मेमदीपाद्यानाभेरूर्ध्वे सीद उपरि भागे इति ए इंद्रस्य परमैश्वरस्य जठरे त्वा सादया
मि त्वां स्थापयामि कात्यायनः अन्वाहार्यमभिवायोद्वास्यांतरा ब्रह्मयजमानौ हत्वा षेधानिधायालभन्ते प्रजापते भीगा इती
ति पाठस्तु प्रजापते भागोस्यूर्जस्वान्पयस्वान्प्राणापानौ मे पाहि समानव्यानौ मे पाहि उदानव्यानौ मे पाहि ऊर्गस्यूर्जं मयि
धेह्यक्षितिरसि मा मे क्षेष्ठा अमुत्रामुष्मिंल्लोक इह चेति हे अन्वाहार्य त्वं प्रजापतेः प्रजापालकस्य भागोसि कथं भूतो भा
गः ऊर्जस्वान् रसयुक्तः पयस्वान् क्षीरसारेण ज्येनोपेतः तथाविधेत्वं मे यजमानस्य प्राणापानौ पाहि उर्ध्वो श्वो वृत्ती वायु
विशेषौ रक्ष प्रुक्तस्यान्नस्य सर्वेषु अवयवेषु समत्वेन नयन हेतुर्वायुः समानः शरीरं व्याप्य वर्त्तमानो वायुर्व्यानः तौ स

मानव्यानौ मे मद्दीयौ पाहि उत्क्रांतिहेतुरुदानः उदानव्यानौ मे मद्दीयौ पाहि समानोदानाभ्यां सह व्यानस्य द्विरभिधानं श
रीरव्याप्तिप्रदर्शनार्थं किंच त्वं ऊर्गसि रसरूपोसि अतो मयि यजमाने ऊर्जं धेहि रसं स्थापय किंच त्वं अक्षितिरसि क्षयर
हितोसि अतो मे मदर्थं अमुत्रेह च परलोके च लोकयोर्मक्षेष्ठाः क्षयं प्राप्नुहि अमुत्रेत्यस्यैव व्याख्यानं अमुष्मिन् लोके इति
सोमे क्षेष्ठाः अमुत्रेत्यस्य मंत्रभागस्य तात्पर्यं श्रुतिरिदर्शयति क्षीयते वा अमुष्मिंल्लोकेन्नमितः प्रदानं ह्यमुष्मिन् लोके प्रजा उ
पजीवंति यदैव मभिमृशति अक्षितमेवैतद्गमयति नास्यामुष्मिंल्लोकेन्नं क्षीयत इति स्वर्गलोकं अमुत्रेमानमन्नं भोगो न क्षी
यते पुनः संपादनहेतोः कृषिक्रियादेस्तत्राभावादस्मिन्नेव लोके हविःस्वरूपेण देवेभ्यो यदन्नं दीयते तद्देवफलरूपेण स्व
र्गे लब्धा प्रजा उपजीवंति यदप्यत्र ब्राह्मणेभ्यो दीयते तदप्यमुत्रोपजीवंति एवं स ... तिमंत्रेणान्वाहार्यमभिमृशति चेत्र
दानीमेतदन्नमक्षितिं प्रापयति तस्य पुरुषस्य स्वर्गेन्नक्षयो नास्तीत्यर्थः कात्यायनः एधोसीति होतानुमंत्रयत इति पाठ
स्तु एधोसीति अग्ने समिद्या वर्द्धस्व वाचयाम स्व वर्द्धिषीमहि च वयमावर्ध्यासिषीमहि हे अग्ने त्वं समिदेधा इंधनहेतुः
काष्ठविशेषोयः प्रक्षिप्यते तेन यासमिध्यालं वर्द्धस्व वृद्धिं गच्छ आप्यायस्व च अस्मानपि सर्वतो वृद्धिं प्रापयतं याच सति लस्त्र

एम

साद्ध्यंवर्द्धिषीमहिवर्द्धंप्राप्नुयामः अध्यासिषीमहिच अस्मदीयपुत्रपश्वादीन्सर्वतोभिवर्द्धान्करवाम कात्यायनः
एतत्त्रइतिचसमिदाधानंत्रिनः प्रसौतिसमिधमाधायानुमन्तु ब्राप्रशानायसंबोधितोब्रह्मामंत्रेणानुजानीयात् पाठस्तुए
तत्रेदेवसवितर्जूतंप्राहुर्बृहस्पतयेब्रह्मणेतेनयज्ञमवतेनयज्ञपतिंतेनमामवमनोज्योतिर्जुषतामाज्यस्यबृहस्प
तिर्यज्ञमिमंतनोतु अरिष्टंयज्ञं९समिमंदधातुविश्वेदेवासइहमादयंतामोंप्रतिष्ठेतिहेसवितर्दैवतेतुभ्यमेतदेव
मिदानींक्रियमाणायज्ञंप्राहुर्यजमानाः कथयंति अनुज्ञापयंतीत्यर्थः किंचत्वयाप्रेरितोदेवोनांयज्ञंयोब्रह्मातस्मैब्रह्म
णेबृहस्पतयेप्राहुः तेनकारणेनत्वंयज्ञमवपालयतथातेनैवकारणेनयज्ञपतिंयजमानमवेत्यनुवर्त्ततेतथातेनैव
कारणेनमामव अध्वर्युंपालय। किंचतेमनः आज्यस्यसंबंधिज्योतिर्जुषतांदीप्यमानरूपंसेवतांयज्ञसंबंधिन्याज्यल
दीयंचित्तंस्थापयेत्यर्थः किंचबृहस्पतिर्यज्ञमिमंतनोतुविस्तारयतु ततइमंयज्ञं अरिष्टंहिंसारहितंकुर्वासद्र ३ा
नक्षणार्थमविच्छिन्नंकरोतु किंचविश्वेदेवासः सर्वेदेवाइहयज्ञकर्मणिमादयंतांहर्षंकुर्वंतां एवंप्रार्थितः सविता
देवत्रंप्रतिष्ठेत्यनुज्ञांप्रयच्छति ओमितिअंगीकारार्थः तथास्तुप्रतिष्ठप्रयातुप्रेरयतीत्यर्थः इतिश्रीद्वितीयेध्यायेतृती

योनुवाकः तृतीये ब्रह्मसंबंधिमंत्रा उक्ताः चतुर्थे स्रुग्व्यूहादिमंत्रा उच्यंते कात्यायनः जुहूपभृतौ व्यूहत्यग्नीषोमयोरि
ति जुहूं प्राचीं दक्षिणेनोत्तानेनाग्नीषोमौ तमिती तरेणोत्तरेणानीवा प्रतीचीं यथादेवतमन्यादिति जुहूपभृतौ व्यूहनं नाम
परस्परविपरीतत्वेनापनोदनं तत्रोत्तानेन दक्षिणहस्तेन जुहूं प्राचीं प्रथममंत्रमुच्चारयन्नपनुदेत् वामहस्तेनान्य
भृतं तेनोपभृतं प्रतीचीं द्वितीयमंत्रमुच्चारयन्नपनुदेत् तुन तृतीयचतुर्थमंत्राभ्यां इंद्राग्नियागे पूर्वोक्ताग्नीषोमीययाग
वज्जुहूपभृतौ व्यूहनं कुर्यात् प्रथममंत्रपाठस्तु अग्नीषोमयोरुज्जितिमनूज्जेषं वाजस्य मा प्रसवेन प्रोहामीति अग्नि
ग्नीषोमयोर्द्वितीयपुरोडाशदेवतयोः उज्जितिमनु आविष्टेन हविः स्वीकाररूपेणोत्कृष्टं जयमनुसृत्य उज्जेषं यजमानो ह
मुत्कृष्टं जयं प्राप्नवानस्मि वाजस्यान्नस्य पुरोडाशादेः प्रसवेनाभ्यनुज्ञया मा प्रोहामि मां यजमानं जुहूरूपेणाग्रेण प्रोत्सा
यामि यद्यप्यूहतिधातुर्वितर्कार्थः तथाप्युपसर्गवशादुत्साहवाची भवति द्वितीयमंत्रपाठस्तु अग्नीषोमौ तमपनुदतां
योस्मान्द्वेष्टि यं च वयं द्विष्मो वाजस्यैनं प्रसवेनापोहामीति यः शत्रुरसुरादिरस्मान्द्वेष्टि अस्मदीययज्ञविनाशनाय द्वेषं
करोति यं चान्यमालस्यादिरूपमस्मदीयानुभावविरोधिनं शत्रुं वयं द्विष्मः विनाशनोद्योगं कुर्मः उभयविधं तं शत्रुम

एम

ग्नीषोमौदेवौऽपनुदतां निराकुर्वतां अहमप्येनं द्विषंतं भ्रातृव्यमुपप्रहृत्य वाजस्य प्रसवेन पुरोडाशदेवताया अभ्यनुज्ञ
या अपोहामि निराकरोमि इतीदं चतुर्थमंत्रद्वयपाठस्तु इंद्राग्न्योरुज्जितिमनूज्जेषं वाजस्य मा प्रसवेन प्रोहामि इंद्राग्नी
तमपनुदतां योऽस्मान्द्वेष्टि यं च वयं द्विष्मो वाजस्यैनं प्रसवेनापोहामि इति अग्नीषोममंत्रवत्तौ व्याख्येयौ ऐंद्राग्नपुरो
डाशानुष्ठाने तावेतौ स्तु गृह्य ह्नमंत्रौ कात्यायनः जुह्वा परिधीनन्क्ति यथापूर्वं वसुभ्य इति प्रतिमंत्रमिति पाठस्तु वसु
भ्यस्त्वा रुद्रेभ्यस्त्वादित्येभ्यस्त्वेति हे मध्यमपरिधे वसुभ्यो वसुदेवताप्रीत्यर्थं त्वां मध्यमपरिधिरूपमनज्मीति शेषः
एवं दक्षिणोत्तरपरिधिमंत्रौ व्याख्येयौ परिधित्रयांजनेन सवनत्रयदेवताः प्रियंतां इत्यभिप्रायः कात्यायनः संज्ञानाथा
मिति प्रस्तरं दानमिति पाठस्तु संज्ञानाथां द्यावापृथिवी मित्रावरुणौ त्वा वृष्ट्यावतां इति द्यावापृथिवी द्युलोकभूलोक
देव्यौ संज्ञानाथां आदीपमानमिमं प्रस्तरं सम्यग्गवगच्छतां हे प्रस्तर त्वां मित्रावरुणावेतन्नामकौ देवौ वृष्ट्यावतां जलवर्ष
णेन पालयतां कात्यायनः अनक्तेनं व्यंतु वय इत्यग्रं जुह्वामुपभृति मध्यं मूलमितरस्यामिति इतरस्यां इतरए ध्रुवानस्या
मित्यर्थः पाठस्तु व्यंतु वयो रिप्तो रिहाणा इति वयः पक्षिणः रिप्रः व्यत्ययेन रकारस्य रेफः लिप्तमित्यर्थः रिहाणाः प्रस्तरग

तमाज्यलेयंलिहानाव्यंतु गछंतु वीगतिप्रजनकांत्यशनाखादनेष्विति धातुः कात्यायनः मरुतामितिनी चैर्ह्लात्रणमाद
यातु प्रहरंतीति एकं तत्रणं प्रस्तयत्स्य ध्रुव रूक्षस्यतं वप्रस्तरं नीवै रौन्नसंयथान भवंतितथा घ्रत्वा वह्नौ प्रहरेत् पाठस्तु म
रुतां एषतीं गछ वशा एभिर्भूत्वा दिवं गछ तत्तीनो एव हेतिहे प्रस्तरत्वं मरुतां मरुत्वाम कानां देवानां संबंधिनां ए
षतीं वहनरूपां अश्वां वर्णां गछ प्राप्नुहि वायुवाहनवद्वेगेन गछेत्यर्थः वशा एभिर्भूत्वा वशास्वाधीना एभिः र्ल्प
तनु गौर्भूत्वा तद्रूपत्वं प्राप्य दिवं गछ द्युलोकं प्राप्नुहि कामधेनुवत्त्रिभिर्भूत्वा स्वर्गं गछेत्यर्थः ततः स्वर्गप्राप्तेरूर्ध्वं नो स्म
दर्थं वृष्टिमावह भूलोके समानय कात्यायनः चक्षुष्पा इत्यात्मानमालभत इति पाठस्तु चक्षुष्पा अग्नेसि चक्षुर्मे पाहीति
हे अग्ने त्वं चक्षुष्पा असि त्वदीयज्वालयांधकारं निवर्त्य चक्षुष्पाः पालकोसि अतो मदीयं चक्षुः पाहि प्रस्तरप्रहरणेन
प्रसक्तं चक्षुषा उपद्रवं परिहरेत्यर्थः तमेतामभिप्रायं तित्तिरिर्दर्शयति यावद्वा अध्वर्युः प्रस्तरं प्रहरति तावदस्य चक्षु
मीयते चक्षुष्पा अग्नेसि चक्षुर्मे पाहीत्याह चक्षुरेवात्मन् धत्त इति कात्यायनः परिधीननु प्रहरति यंपरिधिमिति प्रथम
मिति पाठस्तु यं परिधिं पर्यधत्या अग्ने देवपणिभिर्गुह्यमानः तं तएतमनुयोषं भरामि एषनेत्वदपचेतयातै इति हे अग्ने ह

राम

वनीयस्यअग्नेत्वंपणिभिःप्राणिभिश्चेतनात्मकैरसुरैर्गुह्यमानःगूहूसंवरणेइतिधातुःसंव्रियमाणःसंरुध्यमानः
सन्यंपरिधिंपश्चिमदिशिपर्यधत्थाःअसुरोपद्रवनिवारणायपरिस्थापितवानसितेतवजोषंप्रियंतमेतंपरिधिं
अनुभरामिअनुक्रमेणाहरामिवह्नौप्रक्षिपामिएषःपरिधिःत्वत्तःसकाशादपगतःस~त्वपचेतयातैनैवचेन
यत्तुचित्तीसंज्ञानेइतिधातुःत्वत्तोपगंतुमाजानातित्यर्थःकात्यायनःइतयैचयुगपद [illegible] ग्नेःप्रियपाथिनीतिदक्षि
णोत्तरपरिधीमंत्रेणयुगपत्प्रहरेत् पाठस्तुअग्नेःप्रियंपायोपीतमिति हेदक्षिणोत्तरपरिधीयुवांअग्नेराह
वनीयस्यप्रियमभिप्रेतंपाथोन्नंअपीतंअपिगतंअन्नमपिपाथअन्यत्रइतिहियास्कःअग्नेरन्नत्वमवज्ञाप्राप्यता
भित्यर्थःकात्यायनःसऽ·स्रवभागाइतिसंस्रवान्जुहोतिपाठस्तुसऽ·स्रवभागास्थेषाबृहंतःयस्तरेष्ठाःपरिधेय
श्चदेवाःइमांवाचमभिविश्वेगृणंतआसद्यास्मिन्बर्हिषिमादयध्वंऽ·स्वाहावाट्इति हेविश्वेदेवाएतन्नामकाः
सर्वेदेवायूयंसऽ·स्रवभागास्थविलीनमाज्यंसंस्रवरूपंस्रवतीतिस्रुस्यास्यसऽ·स्रवइत्युच्यतेसएवभागोयेषांविश्वेषां

१२

देवानांते सर्वे स्रवभागाः तथाविधानवत इत्यादूष्यमाणेन सर्वे स्ववलक्षणेनान्नेनवहंतो महात्मनः स्य किंच प्रस्त
रेष्ठाः प्रस्तरस्थायिनो देवाः परिधयश्च परिधिभाजः भागपत्न्याश्च ये देवाः संति ते विश्वे सर्वे देवा इमां मदीयां वाचमभि
गृणंतः सर्वत्र वर्णयंत अयं यजमानः सम्यग्यजनीत्येवं सर्वेषां देवानामग्रे कथयंतो यूयं आसद्यात्रोपविश्य अ
स्मिन्बर्हिषि एतस्मिन्मदीये यज्ञे मादयध्वं हृष्टा भवत स्वाहेति वाडित्येतौ शब्दौ हविर्दानार्थौ सर्वथा दत्तमित्येवमा
दरं दर्शयितुं शब्दद्वयप्रयोगः ननु बृहदारण्यके स्वाहा वषडिति शब्दद्वयेन दैविक हविर्दानमाम्नातं देवा उपजीवंति
स्वाहाकारं च वषट्कारं चेति श्रुतेः ननु वौषडित्ययं शब्दो दानार्थः श्रुतः नैष दोषः वषडित्य [illegible] स्यैव प्रत्यक्षत्वपरिहारा
य वौषडिति वाडिति च शब्दांतरेण प्रयुज्यमानत्वात् तदेतत्तित्तिरिणा विस्पष्टमनुक्रांतं यद् [illegible] षट्कुर्यात्स्मातयामास्य
वषट्कारस्याथ यत्र वषट्कुर्याद्रक्षांसि यज्ञं हन्युर्वौषडित्याह परोक्षमेव वषट्करोति नास्य यातयामा वषट्कारो भवति न य
ज्ञं रक्षांसि घ्नंतीति ननु विश्वेषां देवानां नास्ति सर्वे स्ववभोगत्वं किंतु वस्वादीनामेव तथा च तित्तिरिणोक्तं वसवो वै
रुद्रा आदित्याः सर्वे स्रवभागा इति नायं दोषः विश्वशब्देन वस्वादीनामपि विवक्षितत्वात् वस्वादीन्प्रकृत्य विश्वशब्द

राम

वाच्यत्वमपि तिस्रि रिशौ वोक्तं एते हि विश्वे देवा इति कात्यायनः घृताची इति धुरिति दधातीति शाकटस्य पार्श्वस्त्वं
जुहूपभृतौ निरध्यात् पाठस्तु घृताचीस्थो धुर्यौ पातं० सुम्ने स्थः सुम्ने माधत्तं इति हे जुहूपभृतौ युवां घृताची व
तमं च ततः प्राप्नुत इति ॥छ॥ घृताच्यौ स्थो भवथं तथा विधेयु वा धूर्यौ वनड्वाहौ धुरमर्हित इति तद्युक्तैः पातं रक्षतं किं
च युवां सुम्ने स्थः सुखरूपे भवथः तस्मात् सुखे माधत्तं आस्थापयतं इति द्वितीयेध्याये चतुर्थोनुवाकः ॥ चतुर्थेनुवा
के स्रुग्व्यूहनादिमंत्रा उक्ताः पंचमे स्रुक्स्रुवप्रग्रहादिमंत्रा उच्यंते कात्यायनः स्रुक्स्रुवं प्रगृह्णात्यग्ने दब्धायविती
ति पाठस्तु अग्ने दब्धायो शीतम मा पाहि मा दिद्योः पाहि प्रसित्यै पाहि दुरिष्ट्यै पाहि दुरद्मन्यै अविषं नः पितुं कृणु सुख
हा योनौ स्वाहा वांडिति दभ्नोतिः हिंसाकर्मा आयुरिति मनुष्यनाम अग्ने दब्धमायुरहिंसितो मनुष्यो यजमानरूपो यस्या
ग्नेः सोयमदब्धायुः अश्नू भोजन इति धातुः अशितमभोक्तृतमयद्वा अशूङ् व्याप्ताविति धातुः व्यापकतम उक्तविशे
षणाद्युक्त हे अग्ने दिद्युरितिः त्वं वज्रसमादायुधात् तस्मात् शत्रुप्रयुक्तो वज्रनाम मां पाहि ए दुरिष्टिर शास्त्रीय
यागस्तस्मात् मां पाहि दुरद्मनी दुर्भोजनं तस्मान्मां पाहि पितुरित्यन्ननाम नोस्मदीयमन्नं विषरहितं कुरु योनिरिति गृह

नामसुपहासुहुत्सदनेसमगावस्थानयोग्येयोनोगृहे यांस्थापयेतिशेषः स्वाहाकाडित्येतदुभयं पूर्ववद्व्याख्येयं कात्याय
नः दक्षिणाग्नौजुहोत्यग्नयइतिसरस्वत्याइतिचेति प्रथममंत्रपाठस्तु अग्नयेसंवेशपतयेस्वाहेति स्त्रीपुंसयोरभिलाष
पूर्वकंएकत्रशयनंसंवेशस्तस्यनियोगित्वात्संवेशपतिः हविर्दानं द्वितीयमंत्रपाठस्तु सरस्वत्यैयशोभगिन्यैस्वाहेति जीवतःपु
रुषस्यप्रशंसायशस्तस्यपशुसोभगिनीवासरूपासरस्वतीतथाविधायेहविर्दानं कात्यायनः उलूखलइतिपिष्टलेपांजुहो
ति पाठस्तु उलूखलेमुसलेयच्चशूर्पआशिश्लेषदृषदियत्कपाले उपलेतोविप्रुषः संजुहोमिसत्याः संतुयजमानस्य
कामाःस्वाहेति उलूखलादिषुपंचसुतत्तद्व्यापारकालेयद्दीपदुविरपिश्लेषसपर्यन्तः श्लिष्टमभूत्किंच उपलेषाः सर्व
यातांविप्रुषोहविर्द्रव्यस्यबिंदवोयेसंति तत्सर्वंजुहोमि यथानावशिष्यतेतथासम्यग्जुहोमितेनहोमेनयजमानस्यका
माःसत्याःसंतुयत्कामितंतत्सर्वंलभतां कात्यायनः अवदायावदायध्रुवामभिघारयत्याप्यायतामिति ध्रुवापामव
स्थितंबहुत्वंयदायदाहोतुमवद्यतितदातदाध्रुवामभिघारयतिपुनर्घृतेनपूरयेत् पाठस्तु आप्यायतांध्रुवाहविषा
घृतेनयज्ञंयज्ञंप्रतिदेवयद्भ्यः सूर्यायाऊधोअदित्याउपस्थउरुधारापृथिवीयज्ञेअस्मिन्निति देवयद्भ्यः देवान्प्रेतादी

राम

न्यंतिप्राप्नुवंतियज्ञमित्येवंविग्रहेसतिदेवयंतोयजमानस्तेभ्यस्तदुपकारार्थंयज्ञंयज्ञंप्रतियदायजमानस्तुपस्थितंततदाह
विषाहुतेन हविस्तस्मिन्नुद्दर्थंसंस्कारस्तु ऊनातेनध्रुवास्थितेनस्थापितास्तु कृ आप्यायतांसर्वतः पूर्यतां अदित्या उप
स्थेपृथिव्याः उत्संगे यासर्याधेनुरक्षितस्तुष्टुईरणांतराणमक्षरणार्थंगमनपुनरपिदोहनार्थंगृहगमनंतयस्याधेनोरस्ति
साधेनुः सर्पीतस्याऊधस्तनानांमूलभागः क्षीरपूर्णोपय आप्यायतामित्यनुवर्ततेसर्वतोवर्द्धतामित्यर्थः अस्मिन्
यज्ञे अस्माभिरनुष्ठीयमाने पृथिवी यादेवयजननरूपाविधत्तेसेयमुरुधाराबहुविधाज्यधारोपेताभवत्विति शेषः त
थासतिनकदाचिदियंध्रुवारिक्ताभवतितदेतद्वाया आप्यायनमन्वयव्यतिरेकाभ्यांनिरिदिशेयेति ध्रुवांवैरीच्यमानां
यज्ञोनुरिच्यतेयज्ञंयजमानोयजमानंप्रजाध्रुवामाप्यायमानांयज्ञोनाप्यायतेयज्ञंयजमानोयजमानंप्रजा आप्यायतां
यज्ञोनुरिच्यतेयज्ञंयजमानोयजमानंप्रजाध्रुवामाप्यायमानांयज्ञो ह्याप्यायतेयज्ञंयजमानोयजमानंप्रजा इति कात्यायनः समि
ध्रुवाद्युतेनेत्याह ध्रुवामेवाप्याययतितामाप्यायमानांयज्ञो ह्याप्यायतेयज्ञंयजमानोयजमानंप्रजाइति कात्यायनः समि
ध्रुवाद्युतेनेत्याह ध्रुवामेवाप्याययतितामाप्यायमानांयज्ञो ह्याप्यायतेयज्ञंयजमानोयजमानंप्रजा इति कात्यायनः समि

विदः त्ताहशा हे देवा गातुमित्वा र्वेदिकाशब्दैः प्रतिपाद्यत इति इति गातु यज्ञः तं विदंति जानंतीति गो यस्मदीयो यज्ञः प्रव
त्त इति विदिल्वो इति धातो र्गत्यर्थस्य ज्ञानार्थत्वमुपचर्यते गातुमित तं यज्ञं गछत प्राप्नुत यद्वा गातु र्गतं त्वो मार्गः अस्मदीयेन
यज्ञेन तुष्टाः संतः स्वकीयमार्गं गछत हे मनसस्पते देवानस्मदीयस्य मनसः प्रेरकः पालकः परमेश्वर इममनु
ष्ठितं यज्ञं स्वाहा त्वं देवे दद्यामि देवे वायुरूपे वाते धाः स्थापय यं यज्ञोपक्रमे वातात् यज्ञः प्रयुज्यतामिति मंत्रेण वातस्यय
ज्ञप्रवर्त्तकत्वमुक्तं अतः समाप्तावपि वाते यज्ञस्थापनमुचितं तदेतन्निरिदर्शयति ब्रह्मवादिनो वदंति सत्वा अध्व— स्या
त्योपयं पवते यज्ञं प्रयुक्ते तदेनं प्रतिस्थापयतीति वाताद्वाध्वर्युर्यज्ञं प्रयुंक्ते देवा गातुविदो गातुं वित्वा गातुमितेत्याह यत
एव यज्ञं प्रयुंक्ते तदेनं प्रतिष्ठापयतीति कात्यायनः बर्हिः संबर्हिरितीति जुहोतीत्यनुवर्त्तते पाठस्तु संबर्हिरङ्क्तां हविषा
वे तेन समादित्यैर्वसुभिः संमरुद्भिः संमिंद्रो विश्वेभि र्देवेभिरक्तं दिव्यं नभो गछतु यत्स्वाहेति इंद्रो देवः हविः संस्कारयुक्ते
न बर्हिषा तेन बर्हिर्देनेन समंतात्संप्रगं जनो येन करोतु स चेंद्रः केवलो न भवति किं त्वादित्यैर्वसुभिश्च द्विविधैर्गणैर्देवैः सहि
तः समंक्तामित्यनुवर्त्तते तथा मरुद्भिर्गणैर्देवैः सहितः समंगीनत्या विश्वदेवेभि विश्वनामकैश्च गणैर्देवैः सहितः समं

राम

ह्राएतद्भिरेवदेवैरक्रांतदित्यधाहारः नमद्रुत्यादित्यनामस्तुपद्यतेतदुक्तवर्हिर्दिव्यंघुलोकेवर्त्तमानंनभोगछतुआदि
त्यंप्राप्नोतुस्वाहाइदंबर्हिर्देवोदेशेन्नदत्तं कात्यायनः वेधांप्रणीतानिनयतिपरीत्यकरवेतीति परीत्यहोमस्थानात्
स्याचत्स्येत्यर्थः पाठस्तु कस्त्वाविमुंचतिसत्वाविमुंचतिकस्मैत्वाविमुंचतितस्मैत्वाविमुंचतिपोषायेति पूर्वाध्यायेअग्नेप्र
तपतइत्यनुवाकेकस्त्वामुनक्तीत्ययंयज्ञयोगमंत्रः प्रजापतिर्देवत्तायथाव्याख्यातः तथैवायंयज्ञविमोकमंत्रोव्याख्येयः
किमर्थोयंयज्ञविमोकः पोषाययजमानंपोषयितुंएतस्यविमोकस्याभावेयजमानोऽप्रतिष्ठितःस्यात् विमोकेत्वसौप्रति
ति ष्ठति तदुभयंतित्तिरिर्दर्शयति योवैयज्ञंप्रयुज्यनतस्यप्रतिष्ठेतोवसमवतिकस्त्वायुनक्तिसत्वाविमुंचतीत्याहप्रजापतिर्वै
कः प्रजापतिनैवैनंयुनक्तिप्रजापतिनाविमुंचतिप्रतिष्ठित्याइति कात्यायनः पुरोडाशकपालेनतुषानुपवपत्यधः कृष्णाजिन
ऽ रक्षसामिनीति भागोसीतिमंत्रशेषः हेकणसमूहत्वंरक्षसामयक्षितोभागोसिते पांजीवजातिस्थानिनःकृष्टकणान्
पोभागोसीति कात्यायनः मूलादुपवेषंकरोति वेषोसीति यदापलाशशाखांछित्वायजमानस्यपशून्पाहीतिव्युहतितन
हानीमेवतस्याःशाखायामूलात्काष्ठभागंछित्वातेनागेनोपवेषनामकंअंगारप्रेषणसाधनंकुर्यात् पाठस्तु वेषोसु

१५

पवेद्विषतोग्रीवाउपवेवि — तिविषयतिः कर्मनामहिशाखामूलं त्वं वेषोसि कर्मात्मकोसि तथा उपवेषोसि वेषस्य समीपग
त उपकारी भवसि द्विषतो द्वेषं कुर्वतो राक्षसादेः ग्रीवागलप्रदेशानुपवेविद्धि समीपभागस्थातिशयेन प्रविशति उत्तरमं
त्रद्वयं लिंगानुसारेणापि हिंतास्थाने विनियोज्यं तत्राद्येन मंत्रेणाग्निः प्रार्थ्यते पाठस्तु वेशंत्वमग्ने सुभगधारयेहेति सुभ
गशोभनभाग्यसंपन्न हे अग्ने इहास्मिन् कर्मणि वेशान् धारय हविषां प्रवेशायोपवेषः द्वितीयमंत्रेणापयोलक्षणं हविः
स्रुवन् जुहोति पाठस्तु कैड्डाः कर्मेणाश्रनयाषिनोपयासन् जुहोमि त्वा सुभगा सौभगाय पुरूतमं पुरू हूत अवस्यान्निति
ऋद्वा॥८ अग्निमावृत्यास्थिताः कर्मण्याः कर्मणि पूजार्हा देवाः अनयायिनः कदाचिदप्यपगताः तथा संभवंतीत्यर्थः तत्राहं
सुभगशोभनभाग्योपेतपुरूहूतवह्निभिर्यजमानैराहूतवह्ने त्वां अवस्यन् स्रुवन् सौभगाय यजमानस्य सौभाग्याभिवध्य
र्थं पुरूतमं अतिशयेन प्रभूतं हविर्जुहोमि इति द्वितीये पंचमोनुवाकः पंचमेस्तुक स्रुवप्रग्रहादिमंत्राउक्ताः षष्ठे याजमा
नमंत्रा उच्यंते कात्यायनः पूर्णपात्रं निनयति परीलसंततं यजमानोंजलिना प्रतिगृह्णाति सं वर्चसेति मुखं विमृष्ट इति पा
ठस्तु संवर्चसा पयसा संतनूभिरगन्महि मनसा स— शिवेन त्वष्टा सुदत्रो विदधातु रायोनुमार्ष्टु तन्वो यद्विलिष्टमिति व

राम

~~सं व~~र्चसा ब्रह्मवर्चसेन समागन्महि वयं संगता मनसा मः तथा पयसा क्षीरादिरसेनागन्महीत्यनुवर्त्तते
तनूभिरनुष्ठानक्षमैः शरीरावयवैः समगन्महि शिवेन समीचीनेन कर्मणा श्रद्धायुक्तेन मनसा समगन्म
हि। किंच सुदत्रः सुष्ठु शोभनदानोपेतः त्वष्टा नोस्माकं देवो रायो धनानि विदधातु संपादयतु तन्वः शरीर
स्यास्मदीयस्य यद्विलिष्टं विशेषेणान्यूनमंगं यद्दत्तितद्विलिष्टोपः अनुमार्ष्टु न्यूनत्वपरिहारेणानुकूलं क
त्वा शोधयतु कात्यायनः यत्र शं च तत्र इति वेदिमालभत इति पाठस्तु यत्र शं च तत्र उपच शिवे मे संतिष्ठस्वारि
ष्टे मे संतिष्ठस्व स्विष्टे मे संतिष्ठस्वेति शमिति सुखं उपेत्युपचयोभिरद्धिः चकार एवान्योन्यसमुच्चयार्थौ अस्वि
नध्याहारः हे यज्ञ ते तव सुखमस्तु उपच अभिवृद्धिरप्यस्तु किंच मे मम यजमानस्य शिवे शांतिनिमित्तं संति
ष्ठस्व हे यज्ञ शांतो भव अरिष्टे मे अरिष्टिरहिंसा हिंसारहिते निमित्तं मे मम एतत्सिध्यर्थं संतिष्ठस्व तथा स्विष्टेऽ
भीष्टे संतिष्ठस्व कात्यायनः विष्णुक्रमान् क्रमते दिवि विष्णुरिति मंत्रमिति विष्णुपादत्वतुल्यस्वकीयपादस्य
न्यासौ प्रक्षेपाः विष्णुक्रमाः प्रथममंत्रपाठस्तु दिवि विष्णुर्व्यक्रं— स्त जागतेन छंदसा ततो निर्भक्तो योस्मान्द्वेष्टि

पंचवयं द्विष्म इति विष्णुशब्दाभिधेयो यज्ञपुरुषः जागतेन छंदसा जगती छंदो रूपेण स्वकीयपादेन दिवि द्यु
लोके व्यक्रंस्त विशेषेण क्रमणं कृतवान् तथा सति ततो द्युलोकात् निर्भक्तः अंशभागरहितं कृत्वा शत्रुर्निःसा
रितः कोऽसौ शत्रुः योऽस्मान्द्वेष्टि यश्चास्माभिर्द्विष्यते द्विविधोप्यसौ शत्रुः द्वितीयतृतीयमंत्रयोः पाठस्तु अंतरि
क्षे विष्णुर्व्यक्रंस्त त्रैष्टुभेन छंदसा ततो निर्भक्तः योऽस्मान्द्वेष्टि पंचवयं द्विष्मः पृथिव्यां विष्णुर्व्यक्रंस्त गायत्रे
ण छंदसा ततो निर्भक्तः योऽस्मान्द्वेष्टि पंचवयं द्विष्म इति एतौ द्वौ मंत्रौ प्रथममंत्रवद्व्याख्येयौ कात्यायनः अ
स्मादन्नादिति भागमवेक्षत इति योयजमानस्य हविर्भागस्तमवेक्षते अस्मात्पुरतो वर्णितादन्नात् यजमानसं
बंधि हविर्भागान्निर्भक्त इत्यादिको वाक्यशेषोनुवर्त्तनीयः कात्यायनः अस्यै प्रतिष्ठाया इति भूमिमिति इत आर
भ्य पंचसु मंत्रविनियोगेष्ववेक्षत इति पदमनुवर्त्तते अस्यै पुरतो दृश्यमानायै प्रतिष्ठायै प्रतिष्ठा हेतोः यत्रम
मे निर्भक्त इत्यादि पूर्ववत् इदमनुवर्त्तनीयं कात्यायनः अगन्म स्वरिति प्राङिति पूर्वस्यां दिश्यवस्थितः स्वर्गलो
कः स्वरित्यभिधीयते तं लोकमगन्म यज्ञानुष्ठानेन वयं प्राप्तवंतः कात्यायनः संज्योतिषेत्याहवनीयमिति अभू

एम

मेतिमंत्रशेषः ज्योतिषा आहवनीयलक्षणेन सममनभ्रमवयं संगता अभूमा कात्यायनः स्वयंभूरिति सूर्यमिति अ
सि श्रेष्ठो रश्मिरितिमंत्रशेषः हे सूर्य त्वं स्वयंभूः स्वतः सिद्धः श्रेष्ठोसि त्वं प्रशस्तः रश्मिरसि दीप्तिरूपोसि कात्यायनः
वर्चोदा इति यं कामं कामयते इति तं काममुद्दिश्य सूर्यमवेक्षत इति शेषः पाठस्तु वर्चोदा असि वर्चो मे देहीति तेजोवा
चिना वर्चः शब्देनापेक्षितः कामः सर्वोप्युपलक्ष्यते हे सूर्य त्वं वर्चोदायत अपेक्षितफलप्रदोसि अतो मे मह्यं वर्चो
देहि अपेक्षितं प्रयच्छ कात्यायनः सूर्यस्येत्यनुवर्त्तते अदक्षिणमिति आवृतमन्वावर्त्तत इति मंत्रशेषः सूर्यस्य संवंधि
आवृतं पदावर्त्तमानमस्ति तदनु त्वाहमपि आवर्त्ते प्रादक्षिण्येनावर्त्तनं करोमि कात्यायनः गार्हपत्यमुपतिष्ठते
ग्ने गृहपत इतीति पाठस्तु अग्ने गृहपते सुगृहपतिरहं त्वया गृहपत्या भूयासं सुगृहपतिस्त्वं मया गृहपत्या भूयाः
अस्थूरि णो गार्हपत्यानि संत्विति गृहपते मदीयगृहस्य पालक हे अग्ने गृहपत्या गृहपालकेन त्वया त्वत्प्रसादेने
त्यर्थः अहमपि सुगृहपतिः सुष्ठु गृहस्य पालको भूयासं तथा त्वमपि गृहपत्या मया मदीयसेवयेत्यर्थः गृहपति
र्भूयाः गृहपालको भव एवं सति नोस्माकं गार्हपत्यानि गृहपतीभ्यां स्त्रीपुरुषाभ्यां निष्पाद्यानि कर्माणि अस्थूरि शब्दे

नस्थूलत्वमनुष्ठानाभ्यासलक्षणमभिधीयते तद्रहितं यथा भवति तथा सम्यगनुष्ठितानि भवंति त्विस्पर्थः कात्यायनः
शतं॰ हिमा इति ब्रूयादिति पाठस्तु शतं॰ हिमाः शिमेन स्तेजसा सं॰ सिशाधीति हे सूर्य शतं॰ हिमाः शतसंख्याका
ति च वर्षाणि शतं॰ हिमा इति शतं वर्षाणि जीव्यासमित्येवैतदाहेति काण्वः हिमशब्दो हेमंतऋतुमाचष्टे तथा व
त्रित्रिरिर्याचष्टे शतं॰ हिमा इत्याह शतं ताहेमंतानिधिषीयेति वा धैनदाहेति हिमशब्दः सूचितैर्हेमंतैस्तद्युक्ताः
संवत्सरा लक्ष्यंते शतसंवत्सरे सुनिरंतरं नो अस्मान् तिमेनतीक्ष्णोनतेजसा अनुष्ठानादिप्रकाशनेन संशिशाधि स
म्यकूशिक्षय कात्यायनः सूर्यस्येत्यावर्तते प्रदक्षिणमिति आवृतमन्वावर्ते इति मंत्रशेषः पूर्ववद्व्याख्येयः कात्या
यनः गच्छतिप्राङुनु विज्ञवितीति पाठस्तु गुरुविक्षोकमसोनु त्वपायनस्कधि वतं वतयोने पिवप्रयज्ञपतिं तिर न
तोस्मितं गुरुरस्यनुमात नुहि अस्मिन्यजे स्योनं॰ साधु कृत्यायामस्मिन्नस्मिं लोक इति हे विष्णो उरुविक्रमस्त्वमह
घथा भवति तथा यज्ञविघातकासुरविनाशेन परक्रमं कुरु नो अस्माकं क्षयाय निवासार्थमुरु कृधि विस्तीर्णं स्थानं
एम
कुरु हे व्रतयोने घृतमेव योनिर्जीवनोत्पत्तिकारणं यस्यासौ घृतयोनिः तिरग्निः तथा च मंत्रांतरमन्यत्राम्नातं व्रतप्रतीको

व्रतयोनिरग्निरिति अतोग्निरूपहे विष्णो व्रतं पिबपीत्वाचयत्रपतिं यजमानं प्रतिरप्रकर्षेणवर्द्धयतिरधातुर्व
ध्यर्थः ततोसि हे विष्णो त्वं विस्तृतोसि तथानंतुरसि व्रह्मादिसंततिरूपोसि अनुमातनुहि विस्तृतं स्वरूपमनुसत्या
मामप्यभीष्टप्रदानेन विस्तारयकस्मिन्विषयइत्याकांक्षायामिदमुच्यते तथास्मिन्ननुष्ठीयमाने यज्ञे तथास्यां श्रि
ष्टैरनुष्ठीयमानायां साधुकृत्यायां विद्याविनयादिरूपक्रियायां तथास्मिन्नन्ने दृश्यमाने भोज्यवस्तुनि तथास्मिंल्लो
केइदानीं वर्त्तमाने वंधुपुत्रवस्त्रादिषु कें मनुष्यलोके एतेषु सर्वेषु विषयेषु मां वर्द्धयेत्यर्थः कात्यायनः पुत्रस्यना
मगृह्णातीदं यइत्यास्मिन्निति स्वस्यपुत्रस्तन्नामोच्चारयेत् पाठस्तु इदं मे कर्म्मेदं वीर्यं पुत्रोनुसंतनोत्विति इदमि
दानीमनुष्ठीयमानं मे मदीयं कर्म्म अस्ति एतदपीदं वीर्य्यमेतत्कर्म्मफलमस्ति तदुभयं पुत्रो मदीयो देवदत्ताख्य अनुसं
तनोतु अनुक्रमेण संततं करोतु कात्यायनः व्रतं विसृजते येनोपेयादिति आदौ व्रतोपायनकाले येन विकल्पितेना
ग्नेव्रतपत इदमहमितिवा व्रतं स्वीकृतं समाम्नावपितदनुसारेण द्वयोरन्यतरेण व्रतं विसृजेत् अत्रायं प्रथममं
त्रे पाठविशेषः अग्ने व्रतपते व्रतमचारिषं तदशकं तन्मेराधीति व्रतपते व्रतस्य कर्मणः पालक हे अग्ने व्रतम

चारिणं कर्मानुष्ठितवानस्मि तत्त्वं अग्ने शक्तं त्वदनुग्रहात्तत्कर्मणि शक्तोऽभूवं त्वं याचमे मदीयं तत्कर्मफलमराधि साधितं
द्वितीयमंत्रपाठविशेषस्तु इदमहं य एवास्मि स एवास्मीति उपक्रमवेलायामिदं व्रतमहं करिष्य इति संकल्पयः
स्थितोस्मि स एवाहमिदानीं त्वत्प्रसादात् संकल्पितकर्मसमाप्तिं कृत्वा स्थितोस्मि इति द्वितीयेऽध्याये षष्ठोनुवाकः
षष्ठे यजमानमंत्रा उक्ताः तावता दर्शपूर्णमासेष्टिः समाप्ता अथ सप्तमे पिंडपितृयज्ञमंत्रा उच्यंते कात्यायनः सा
रं तंडुलमपूर्णं ॐ अपयित्वाभिघार्योद्वासयेत्क्षेणोनजुहोत्यग्नय इति सोमायेति चेति वपाठस्तु अग्नये कव्यवाहना
य स्वाहा सोमाय पितृमते स्वाहेति पितृणामग्निः कव्यवाहननामकः तथा च तित्तिरिणा समाम्नातं त्रयो वा अग्नयो व्य
वाहहनो देवानां कव्यवाहनः पितॄणां ॐ सहरक्षा असुराणामिति कवयः क्रांतदर्शिनः पितरस्तेषां संबंधि कव्यं ह
विः तद्वोढुमधिकारो यस्यास्ति स कव्यवाहनः तस्मा अग्नये स्वाहा हविर्दत्तं पितृमान् पितृसंयुक्तः तस्मै सोमाय सोम
नामकाय देवाय स्वाहा हविर्दत्तं कात्यायनः दक्षिणेनोल्लिखत्यपहता इतीति पाठस्तु अपहता असुरा रक्षांॐ सि
वेदिषद इति वेद्यां सिदंतीति वेदिषदस्तथाविधा असुरा अपहताः वेदेः सकाशाद्दयनीटावारितावेधा रक्षांस्यपहता

राम

नि असुरत्वं रक्षस्त्वं चेवेत्येनौ देवविरोधिजातिविशेषौ कात्यायनः उल्मुकं पुरस्तात्करोतिये रूपाणीति पाठस्तु ये
रूपाणि प्रतिमुंचमाना असुराः सन्तः स्वधया चरंति परापुरो निपुरो ये भरंत्यग्निष्टांल्लोकात्प्रणुदात्यस्मादिति अ
सुरा देवविरोधिनः संतः स्वधया पैतृकनिमित्तेन रूपाणि प्रतिमुंचमानाः पितृसमानरूपाणि स्वीकुर्वन्तः चरन्ति
पितृयज्ञस्थाने संचरंति परापुरः पराक्रांतान्देहान् स्थूलशरीराणीत्यर्थः निपुरः न्याभूतान्देहान् सूक्ष्मशरीराणीत्य
र्थः ये स्वयमसुराः संतो पितृस्वकीयमसुरत्वं प्रच्छादयतानि द्विविधानि पितृशरीराणि भरंति धारयंति तानसुरानग्नि
रुल्मूकरूपोस्माल्लोकात्पितृयज्ञस्थानात्प्रणुदाति प्रकर्षेण नयसारयति कात्यायनः अत्र पितर इत्युक्त्वोदङ्ङास्त
आतमनादासित्वामीमदंतेति जपतीति आतमनात् ग्लानिपर्यंत पाठस्तु अत्र पितरो मादयध्वं यथाभागमावृषा
यध्वं अमीमदंत पितरो यथाभागमावृषायिषतेति तदिदं मंत्रद्वयं अग्रे वाजजित्यनुवाके यथाव्याख्यानं तथात्रैवा
पि व्याख्यातव्यं कात्यायनः नमो व इत्यंजलिं करोतीति पाठस्तु नमो वः पितरः शुष्माय नमो वः पितरस्तपसे नमो वः
पितरो पजीवं न स्मै नमो वः पितरो रसाय नमो वः पितरो घोराय मन्यवे स्वधायै वः पितरो नम इति हे पितरो वो युष्मा

वंधिनेशुष्मायवलायवैयेभिमवसामर्थ्यायनमोनमस्कारोस्तु उत्तरेष्वपिपंचसुमंत्रेषुनमोवःपितरइतिपदंपूर्वव
घोऽयं तपसेवैरिषुप्रयुक्तायसंतापाय यज्ञोवमस्क दीयंजीवनंभवद्भिरनुग्रहीतमस्तितस्मैजीवनायरमायभव
त्प्रसादलब्धायतथापयोवृत्तादिरूपाय वोरायशत्रुवधहेतुत्वेनतीव्रायमन्यवेक्रोधाय स्वधायैभवदीयान्नाय
स्वधावैपितृणामन्नमितिश्रुतेः शुष्मादीनांनमस्कारेणास्वेस्वानुग्रहायतत्संपत्तिःप्रार्थिताभवति कात्यायनः ए
तद्वइत्युपास्यतिसूत्राणिप्रतिपिंडमूर्णादशावावयस्युत्तरेयजमानलोमानिवेति पाठस्तु एतद्वःपितरोवासोगृहा
न्नःपितरोदत्तेतीति हेपितरोवोयुष्माकमेतद्वासोमयादीयमानमिदंसूत्रमेववस्त्रं हेपितरस्तथायूयंनोस्मभ्यंगृ
हान्सर्वोपकरणसहितान्दत्तप्रयच्छत कात्यायनः उदायुषेत्युत्थानमिति पाठस्तु उदायुषास्वायुषोदयर्जेन्यस्यधाम
भिःउदस्याममृताँ अनु प्रथमआयुःप्राणोन्नवाचीद्वितीयोजीवनवाचीस्वायुशोभनमायुर्जीवनंयेनभवतितथा
युः तथाविधेनआयुषान्नेनयुक्तोहंउदस्थां उत्थितोस्मिउत्ततथापर्जन्यस्यवृष्टिहेतोर्मेघस्यसंबंधिभिर्धामभिःस्था एम
नविशेषैर्युक्तोहमुदस्थां अमृतानमरणरहितान्पितॄननुसृत्यतत्सेवार्थमस्थां कात्यायनः आधत्तइतिमध्यमपिं

यं पत्नी प्राश्नाति पुत्रकामेत्नीति पाठस्तु आधत्त पितरो गर्भं कुमारं पुष्करस्रजं यथेह पुरुषोऽसदिति हे पितरः पुष्करस्रजमश्वि
न्योर्देवाभ्यां समानं अश्विनौ देवौ पुष्करस्रजौ पद्ममालिनौ देवानां भिषजौ तत्साम्यकथनेन रोगरहितमित्युक्तं भवति तथावि
धं कुमारं पुरुषरूपं गर्भमाधत्त संपादयत इहास्मिन्नेव काले तौ पुरुषो देवपितृमनुष्याणामपेक्षितार्थस्य पूरयिता यथा
ऽसत् येन प्रकारेण स्यात् तथाधत्तेति पूर्वेण संबंधः कात्यायनः ऊर्जमित्यथो नि षिंचतीति पाठस्तु ऊर्जं वहन्तीरमृतं घृ
तं पयः कीलालं परिस्रुतं स्वधास्थ तर्पयत मे पितॄनिति हे आपो यूयं स्वधास्थ पित्र्यहविः स्वरूपा भवथ अतो मे पितॄंस्त
र्पयत कथंभूता आपः परिस्रुतं वहन्तीः पुष्पेभ्यो निःसृतसारं वहन्त्यः तच्च सारं त्रिविधं ऊर्जशब्देन च घृतशब्देन पयःश
ब्देन चाभिधेयं तत्रोर्जशब्देनान्नगतं स्वादुत्वमभिधत्ते घृतपयसी प्रसिद्धे तच्चामृतं मधुरं पयोपि कीलालं ईहशास्पनि
विधस्य सारस्य वाहनात्पापिन्तर्पकत्वमुपपन्नं ॥ इति द्वितीयेऽध्याये सप्तमोऽनुवाकः अत्र विनियोगसंग्रहः सप्तानु
वाकाध्याये द्वितीये र्थस्तु वर्ण्यते स्रुचामासादनं तु व्याघोरे प्रहर्षे मंत्रकाः स्रुग्व्यूहाद्यास्त्यजहाय्ययाजमाना स्त्रयेन्त्रकाः
कृष्णस्त्वेष्ट्यं वेदिर्वेदिं बर्हिर्वेदिः समुद्रसीति अभिषिंचेदनं मूलेविसोः प्रस्तरधारणं ऊरौ तिस्रः गाने वेदिं म त्रिभिस्सिन्नमर्शनं

गंधे द्रुमिश्चैव त्रयपनापरिधीन्निकृत्य वेस्निपेत् आघारसमिधौ वीतिसमिद्भ्यां क्षिपेत्पुरः॥ सूर्योज्जपेत् समिस्थाप्यतिरश्ची
नंतथाद्वयं प्रस्तरास्तरणं तृणं मात्रातस्य प्रसारणं छेतत्रिभिः स्रुचा स्थाप्य प्रियेणयहविषास्थितिः हविस्तु चैव ध्रुवश्चेहि स
चतुर्विंशतिः खलु अग्ने परिधिसंमार्गो स्यंजलिदौ नमः स्वधा स्रुव स्रुवौ समादायोधिरणा दक्षिणो दिग्रतिः वसुस्थिले
तद्वंद्वेति होमः संस्थाध्रुवांजने अत्रामीत्वा मित्रयावुयाग्नेगीप्रदत्त द्वयान् नपिस्वा मित्रपोथाग्नेमार्ष्टिमंत्राश्चतुर्दश दे
वब्रह्मा वेदैः स्थाने तृणानि च निरस्यति इंद्र ब्रह्मोपविष्टः स्थामित्रं प्राशित्रमीक्षते देवस्य प्रतिरक्षा निरधिव्यास्वेविषा
दयेत् देवस्य पुनराद घादग्नेस्य मक्षयेदिदं पात्रे प्रक्षालने नाभिमन्वाहार्ये एष शेष प्रताः एषा होता मंत्रयेन ब्रह्मानुज्ञैतदि
स्यतः अनुवाके तृतीये स्मिंमंत्रा द्वादशाव र्णिता अग्नीद्वयान स्रुचौ व्यूहेदिंद्राग्नि द्वयताणि च वसुत्रयेणापरिधानंज्या
त्संप्रस्तरग्रहः नमंज्यात व्यंतु मरुतो प्रहरेच स्रुरिस्यतः संस्र्शो दाधंपरिधिमध्यमं प्रहरेदथाद्रतरौ प्रहरेद ग्नौ संस
संस्रव होमकोः वृत्तानुष्ठतिः स्रुचौ दध्या मंत्राः पंचदशेरिताः स्रुक स्रुव प्रग्रहश्चैव मेहेमां स्वे प्रसर द्वयान् लेपान् जुहोत्या
या ध्रुवा माप्यायये तत्स दास मिष्ट होमो देवेति संवर्हि ऊतिः भवेत् प्रणीतानि नयेत् कस्मोकणात्रस्य ः परित्यजेत् उपवेषक

एम

निर्वपो वैश्वानराग्निं कश्चिदिङ्गं जेत् पयोहोमः कश्चिद्दूद्वामंत्रा द्वादश वर्णिताः प्रमुखं संवर्च विशेष्य यज्ञवेदिस्थ शोत्क्रमात्
क्रमादिवित्रयेणास्मात् प्राङ्गागमवेक्षते अस्यै भूमिमवेक्षे वेतागन्म प्राणी क्षतेतथा संज्योपूर्वाग्निमीक्षिताय संसूर्यमवे
क्षते वर्चः पश्येंद्र विकामी सूर्यो हन्तिः प्रदक्षिणा अग्नये इत्यग्निमाग्नी शांतं भ्रूयात्तथा पुनः सूर्यप्रदक्षिणावृत्तिरुहग
क्षेदिदं विति स्वपुत्रनाम ग्रहणं पश्चादग्ने रुद्रंद्वयोः एकोनव्रतसप्तागो मंत्रा एकोनविंशतिः अग्ने सोमद्वयाद्धोमोप
हनादक्षिणो लिखेत् येरूपो ल्मुकेमाधाय छामानि द्वयं जपेत् षड्भिर्नमोंजलिं कुर्यादेतत्सूत्रमुपास्यतिउ दोत्रिष्ठेन्मध्य
पिंडमथ प्राश्नातित्तद्धः सिंचेदूर्जमयो मंत्राः षोडशान्त्रोपवर्णिताः वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् पुमर्थां
श्चतुरो देयाद्विद्यातीर्थमहेश्वरः इति श्रीमद्राजाधिराजपरमेश्वर वैदिकमार्गप्रवर्तक श्रीवीरबुक्कभूपालसाम्रा
ज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये काण्ववेदार्थप्रकाशे काण्वसंहितापारव्य द्वितीयोऽध्यायः यस्य नि
श्वसितं वेदा यो वेदेभ्यो खिलं जगत् निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं प्रथमद्वितीययोरध्याययोर्दर्शपूर्णमासेष्टि
विषयमंत्रा उक्ताः आधरतीये अग्न्याधानविषयमंत्रा उच्यंते तत्र कात्यायनः अमावास्यायामग्न्याधेय इत्यादिना कालवि
शेषादीनि वह्लोदनपाकपर्यंतान्युक्त्वा पान्युक्त्वा पश्चादिदमाह तं चतुष्प्राश्यं पवंतुद्वाप्यासेवनं मध्ये कृत्वा सर्पिरासि

चाङ्क्ष्वाक्षीतिस्रः समिधो घृताक्ता आदधाति समिधाग्निमिति प्रत्यृचमिति अस्यार्थः चतुर्भिरस्त्रिभिः प्राशितुर्योग्य
मोदनं पक्त्वा बहिरुद्वास्यतस्यौदनस्य मध्ये घृतसेचनाय स्थानं निम्नं कृत्वा तत्सर्पिषा पूरयति स्रः समिधस्तस्मिन्सर्पिषि अ
भ्यज्यति स्त्रुग्भिः श्रीर्ग्रावभ्यामादध्यादिति करोवापितमर्थं दर्शयति तस्य सर्पिरासेचनं कृत्वा सर्पिषा सिच्याश्वच्छी
त्तिस्रः समिधो घृतेनान्वज्य समिद्वतीभिर्घृतवतीभिर्ऋग्भिरादधातीति तत्र प्रथमायाः ऋचः पाठस्तु समिधाग्निं दुव
स्यत घृतैर्बोधयतातिथिं अस्मिन् हव्या जुहोतनेति समिध्यते दीप्यते वह्निर्यया काष्ठरूपया सा समित् तया समिधा
ग्निं पुरोवर्तिनं दुवस्यत परिचरत दुवस्यतिः परिचरणार्थे तेन पठितः अतिथिमातिथ्यकर्मणा पूजनीयमग्निं घृतैर्बो
धमाने बोधयत प्रज्वालयतेत्यर्थः अस्मिन्प्रज्वलितेऽग्नौ हव्यानानाविधानि हवींषि जुहोतन हे अनुष्ठातारः सर्वतो जु
हुत द्वितीयस्या ऋचः पाठस्तु सुसमिद्धाय शोचिषे घृतं तीव्रं जुहोतन अग्नये जातवेदस इति सुसमिद्धाय शोभया सम्यग्दी
प्ताय अत एव शोचिषे शोचिष्मते दीप्तिमते जातवेदसे जातं वेदयतीति वा जातवेदाः तथाविधायाग्नये तीव्रं घृतं स्वादु त
मं समग्रं वाज्यं जुहोतन जुहुत तृतीयस्या ऋचः पाठस्तु तं त्वा समिद्भिरंगिरो घृतेन वर्धयामसि बृहच्छोचा यविष्ठ्येति हे अं
गिरः अंगति गत्यर्थाः रसप्रत्ययो मन्वर्थीयः तत्र या गेषु मति मन्त्रेतं त्वां तथाविधं वा समिद्भिर्यत्र ॥ श्रीरामराम॥

राम

त्वाष्ट्रो दशकपालः। इ सेता दश हवींषि पंचसु भवंति। तत्र उद्धृत्य मित्रविंदार्थमिति। मित्रविंदया हं यक्ष्य इति वरणे। पात्रा
सादने। भूर्यो ग्निहोत्रहवणी। स्फ्यः कपालान्येकपंचाशत्। सहस्त्रिंशद्वा। वारुणा च रुपक्षे दशभिर्न्यूनानि। चरुस्थाल्यः
पंच षड्वा। शम्या कृष्णाजिनमित्यादि। दृषदिग्नित्यादरभावः। समानं तु तत्र। चत्वारि दशे ध्मकाष्ठानि। अत्र तावदुन्नानानंतरं मेक्ष
णं। पात्र्यः पंच च तस्रो वा। शेषं प्रकृतिवत्। वाबाबीजधर्मादिकाः। अग्नये सोमाय अग्नये जुष्टं सोमाय वरुणाय मित्रा
य। इंद्राय। बृहस्पतये। सवित्रे। पूष्णे। सरस्वत्यै। त्वष्टृं जुष्टमिति प्रोक्षणीं त्वा जुष्टमिति एकबीजपक्षे करणं तेवि
भज्य आलंभः। इदमग्नेर्वरुणास्य इंद्रस्य सवितुः पूष्णस्त्वष्टुश्च इदं सोमस्य मित्रस्य बृहस्पतेः सरस्वत्या श्च। यथोक्तमस्मी
धः कपालोपधानं दशकपाले चत्वार्युपधाय षड्कं समं विभज्य त्रीणि दक्षिणतः स्त्रीणि चोत्तरत इति पिष्टानां तंडु
लानां चेक्षणं। ईक्षणं तु पूष्णो विभागः। इदमग्नेर्वरुणास्य इंद्रस्य सवितुस्त्वष्टुश्च। इदं पूष्णः। चरूणां तंडुलान् वि
भज्य आलंभः। इदं सोमस्य। इदं बृहस्पतेः। इदं सरस्वत्याः। वारुणा चरुपक्षे तस्यापि चरुमध्यकीर्तनं एतेन। सोपवने

३९

देवप

१९ २५

तेपुरोडाशानां।प्रागादानीत् अग्निं।छ।सोमंग।मित्रं।इंद्रं।बृहस्पतिं।सवितारं।पूषणं।सरस्वतीं।त्वष्टारं।गछ।स्व।पंच

शोनवज्ञेनेगे स्रुवाधनं।उत्तमेप्रयाजे।इदमग्नये।सोमाय।वरुणाय।मित्राय।इंद्राय।बृहस्पतये।सवित्रे।पूष्णे।सरस्वत्यै।त्व

ष्ट्रे।देवेभ्यइत्यादि।ततः आज्यभागौ।प्रधानयागे।अग्नये।सोमाय।वरुणाय।मित्राय।इंद्राय।बृहस्पतये।सवित्रे।पूष्णे

सरस्वत्यै।त्वष्ट्रे।उपांशु।अनुब्रूहि।इति।प्रथमस्वरेण।ततोऽग्नीध्रमुपस्तारः।क्रमेण।सर्वेषां मध्यात् पूर्वार्द्धात् द्विरवदाय।अभि

घारः।प्रत्यभिघारः।अतिक्रम्य।आश्राव्य।अग्निं।सोमं।वरुणं।मित्रं।इंद्रं।बृहस्पतिं।सवितारं।पूषणं।सरस्वतीं।त्वष्टारं।उपांशु

यजेति।प्रथमस्वरेण।१२।द्वाशीरेकंडिका।।ततउपविश्य आज्यस्थाल्याः स्रुवेणागृहीत्वा।अग्निरन्नाद इत्यादि

भिर्दशभिर्मंत्रैः स्रुवाहुतीर्जुहोति।इदमग्नयइत्यादि।प्रधानदेवताभ्यस्त्यागाः।ततः स्विष्टकृदादि।प्राशित्रादि

सर्वेषां।दक्षिणालंभेदशगावमसीनिवा।अस्याः मित्रविंदायाः समृद्ध्यर्थं दशगाः दक्षिणाः ब्रह्मणेदद्यात्।बृह

ने।अग्नेः सोमस्य वरुणस्य मित्रस्य इंद्रस्य बृहस्पतेः सवितुः पूष्णः सारस्वत्याः त्वष्टुः हृज्जितिं।अग्नि।सोमोयरुणे

राम०

१३

मित्रइंद्रोवृहस्पतिः सवितापूषासरस्वतीत्वष्टातमपनुदंतु। प्रस्तरहोमे। इदमग्नयेसोमायवरुणायमित्रायइंद्रायवृ
हस्पतयेसवित्रेपूष्णेसरस्वत्यैत्वष्ट्रेदेवोभ्यइत्यादि। शेषंप्रकृतिवत्॥ इयंमित्रविंदाचांद्रायणप्रसाम्नायेत्वेनापि
स्मृतिषुविहितास्ति॥ ॥इतिमित्रविंदासमाप्ता॥ ॥अथास्याहोत्रंलिख्यते। कंप्रपद्येइत्यादि। पंचदशसामिधेन्यः
आवाहनेआज्यभागानंतरं अग्निंसोमंवरुणंमित्रंइंद्रंवृहस्पतिंसवितारंपूषणंसरस्वतींत्वष्टारंइंद्रपाभुम्आ
वहइहसुचैः। उत्तमेप्रयाजेयेहेस्वाहाग्निंस्वाहासोमंस्वाहासोमंअग्निंसोमंवरुणंमित्रंइंद्रंवृहस्पतिंसवितारंपू
षणंसरस्वतींत्वष्टारंइंद्रपाभुस्वाहादेवाइत्यादि। पुष्टिमंतावाज्यभागो। अग्निनारयिमश्नवत्‌तमोउपेउयजामहे
ग्निंजुषाणाइति। सोमापानु॥ गयस्फानोअमीवहाभवाउ। येउमहेसोमंजुषाणाइति। प्रधानयागेपुरोनुवाक्या
अग्निःसोमोवरुणोमित्रयज्ञोयेउमहेसत्वष्टारूपाणिइति। अग्निर्वैघृतपाज्यावदेशेरपथासंप्रेषितंवेति
शांखायनः। तेनानुक्रमेणापिदेवतादेशतंभवतिनिगमेषुपुरोनुवाक्यावत्। प्रेद्धोअग्नइध्मोअग्निरितिविएजोस्वि

राम

घृकृतः सहस्रवल्शीवा। नूनोराद्स्वदितिपुरोनुवाक्या। येऽ३यजामहेऽग्निं स्विष्टकृतमयाडग्निरग्नेः प्रियाधामान्ययाट्सोम
स्यऽन्ययाऽग्नेः सोमस्य वरुणस्य मित्रस्येंद्रस्य बृहस्पतेः सवितुः पूष्णः सारस्वसास्त्वष्टुःऽपांशु। प्रियाधामान्ययाद्देवाना
मिलादि स्रुक्तवाके आज्यभागानेतरं अग्निः सोमो वरुणो मित्र इंद्रो बृहस्पतिः सविता पूषा सरस्वती त्वष्टाऽपांशु।
हविरजुषंतावीवृधंतमहोज्यायोकृत। देवा आज्यपाऽस्पादि। १३। त्रयोदशी कंडिका॥ ॥इतीष्टीयाज्ञिकदेवकृतसू
त्रपद्धतौ पंचमोध्यायः॥ सं १८०३ ज्येष्ठकृष्णषष्ठ्यां भीमसेन शं कार्मुहकेन लिखितं॥ ॥श्रीअन्नपूर्णायै नमः॥ अ
थ निरूढपशुबंधस्य पद्धतिर्लिख्यते॥ स च ऐंद्राग्नो दैवतो वा सूर्यदैवतो वा प्रजापतिदैवतो वा प्रतिवर्षं वर्षास्वेतो श्रा
वणादिचतुर्णां पर्वणां मध्ये अन्यतरस्मिन्भवति। अथवा दक्षिणायन हिते ऽन्तरपराह्दिने च। अस्मिन्पक्षे एकस्मि
न्वर्षे पशुद्वयं भवति। तत्र प्रयनप्रयोगे मातृपूजापूर्वकमाभ्युदयिकं कृत्वा। अन्वारंभणीया च। पशोः सात्राप्यवि
कारत्वादनुदितेप्रारंभः। तत्र पूर्वं कृत्विग्वरणं। पशुदक्षिणा न धेनुर्दक्षिणा नवा वरो दक्षिणा नवा गोत्रशर्मन् ऐंद्राग्नेन

कर्मापवर्गांतेवरुणप्रघासवत।वृहने।अग्नेःसोमस्यसवितुःसरस्वत्याःपूष्णोमरुतांस्वतवसांविश्वेषांदेवानां।
द्यावापृथिव्योःइंद्राग्न्योर्वरुणस्य।कस्य।अग्नेरनीकवतोमरुतांसांतपनानांमरुतांगृहमेधिनांमरुतांक्रीडिना
मदित्यामहेंद्रस्य।विश्वकर्मणःशुनासीरयोः।वायोःसूर्यस्येति।अग्निःसोमः।सविता।सरस्वतीपूषामरु
तःस्वतवसो।विश्वेदेवाद्यावापृथिव्यौइंद्राग्नीवरुणः।कःअग्निरनीकवान्मरुतःसांतपनामरुतोगृहमेधि
नोमरुतःक्रीडिनोदितिर्महेंद्रोविश्वकर्मा।शुनासीरौ।वायुःसूर्यस्सामपनुदंत्विति।अत्रोपांशुदेवतानांउपांशू
च्चारणंअन्येषामुच्चैः।मरुतामुज्जितिं।मरुतस्तमपनुदंत्वितिप्रतिप्रस्थातानुर्व्रूहतं।सूक्तवाकांतेवाजिनयागः।
समीष्टयजुरंतेवभृथः।ततःप्रसेसप्रमिदाधानं।ततोवर्हिर्होमादि।नमःकृत्वापेयंतंवरुणप्रघासवत्समापनीयं।अं
तेचत्वारिशतानिब्राह्मणान्भोजयेत।।इसेष्टिकान्येकाह्निकानिचातुर्मास्यानि।। ।।अथपाशुकान्येकाह्निकानिचा
तुर्मास्यानिलिख्यंते।तत्रसमारोपादिकर्मापवर्गांतंपाशुकवरुणप्रघासवत।विशेषः।प्रथमजगवधेन्वृषभे।एरा

३१

वैदप॰
१३३

म्वदक्षिणाः सपशोरेकादशिकेष्वातुर्मास्येष्वर्हयज्ञेषु इति वरणाः ब्रह्महोत्रध्वर्युमैत्रावरुणप्रतिप्रस्थात्राग्नीध्राणां वर
णाः अहतवासःपरिधानं समारोपः उद्वसानं मथनं सपशोरेकादशिकचातुर्मास्यार्थं इष्टिपुरुषाणां सर्वेषु समंत्रकम
ग्न्यन्वाधानं ब्रह्मवरणं व्रतग्रहणं करंभपात्रमेवमेषीकरणं यथोक्तं यूपाहुत्यादि षड्होता यदुत्स्यते वेदिमान
उभयोः संमर्शनांते चालालमानं उभयोर्हृपपमन्नुपनिर्वपनांतं। सघो ध्वहेवा पशुर्भवति। तच्च हविःपक्षे उत्तरवे
दिच्छादनांते पूर्वेद्युः प्रातरग्निप्रणयनं होष्पनिर्वपनांते। ततः प्रणीताप्रणयनादि प्राग्गकृतं चेदत्र व्रतग्रहणं अ
ध्वर्यो प्रतिप्रस्थातुश्च पाशुकवरुणप्रघासवत् पात्रासादनादि वपामार्जनांतो विशेषः। ऐंद्राग्नः पशुः। तत्राग्निभ्यां
जुष्टमिति निरुक्तवत्प्रयोगः। संमार्गप्रैषानंतरं करंभपात्रहोमः। वपामार्जनांते पशुपुरोडाशः ऐंद्राग्नो द्वादशकपालः॥
तमनु सर्वेषां चातुर्मास्यहविषां निर्वापः। तत्र पूर्ववद्ध्रुवस्थाने शकलपरिधिनिधानं उभयोः श्रपणं वा छेदनादि पैष्टिक
वत्तवत्सापाकरणं शाखया पशुग्रहणांते। ततो यजमानवाचं यच्छेति प्रैषः। ततः पात्राणामासादनं। शूर्पकृष्णाजिनरष्ट

राम॰
१३३

सप्तत्रिंवोकपालानि। स्थाल्यः सप्त। उलूखलमुसले। पात्री धान्यं। शाखोपवेषः। संयवनोदकं। दोहनचतुष्टयं। न
त्रस्थाल्यः स्रिस्त्रः। भक्तावदानमेक्षणो। वाजिनभांडद्वयं। द्वादशपुरोडाशपात्र्यः। शमीपत्रकरीरशिरा। कर्मीपवर्गं
चेति। प्रतिप्रस्थातुः पात्रासादनं। दोहनचतुष्टयं। भक्तावदानं। वाजिनभांडे शमीपत्रकरीराणि। ततो हविर्ग्रहणा
दि। इंद्राग्निभ्यां जुष्टमिति पुरोडाशग्रहणं। ततः आग्नेयपात्रीं नासौर्यांतानां। आग्नासंतेवाजिनपात्रे पुरोडाशपात्री
भक्तावदानमेक्षणा संमार्गः। संमार्जनापासनं विभस्मीकरणाधारलंभनांतं। पश्चाद्वक्तं चेदिह निर्मोगत्तो मथ
नं। एतदर्थं होतृमैत्रावरुणावितिप्रैषः। स्रुक्चावाद्यापोभयोर्यजप्रैकवाज्यभागौ। ततः प्रतिप्रस्थातास्रुक्पाणिरासे
। आध्वर्योः पूर्वं पशुपुरोडाशयागः। ततः आग्नेयाद्विभिः सौर्यांतैः। ततो यजप्रैषः स्रुग्गणः स्विष्टकृद्यायः। प्राशित्रह
रणादिभागपरिहरणांतं। ऐषिकवद्दक्षिणादानं। प्रथमजगवधेन्वभावे एकाम्बमसीनि। स पश्वैकाहिकानां वा
तुर्मास्यानामिति च। शांखायनमते पशुदक्षिणापि भवति। ततो दर्विहोमः। ततः पशुविशसनादिक्रिः प्रत्यावस्था

दिसंतं ॥ ततः पिष्ट्वाः तत्तद्वेयं क्काऽदकोपस्पर्शनांता ॥ ततोजुहुयात्पृषदाज्यमादायोपनिष्क्रम्यपश्चात्तीसादिधारागु
पाजोतं ॥ वृक्षेनेइ दुम्मोर्वनस्पतेहज्जितिं ॥ उंद्रुग्मीवनस्पतिस्तिमनुदेलिति ॥ अग्नेतिपादीनामावाहनादिविवक्नह
नेपिसंकीर्त्तनाभावः ॥ सहस्राख्यपाप्त्रस्तरानुप्रहरणं ॥ परिधिभिः सहोपवेषहोमः ॥ उत्तापभूजावभृथसमिदाधानं ॥
नेवपनं ॥ पाशुकबहरणाप्रघासवत्सर्वकर्मापवर्गांते ॥ चत्वारिंशत्तानिब्राह्मणभोज्याः ॥ ॥ इत्येकाह्निकानिपाशुक
चातुर्मास्यानि ॥ ॥ सांवत्सरिकचातुर्मास्यकरणाशक्तोसंसाप्रयासर्वासांपर्वाणपुत्कृष्यभुनासिरीपकालेकालु
न्योवावसंतेवातत्रापिपौर्णमास्यांकार्याणि ॥ पदाचापकृष्यकालेवासर्वाणिक्रियंतेतत्रापिप्रतिपर्वपंचककार्यणीतिज्ञ
यं ॥ ११ ॥ एकादशीकंडिका ॥ ॥ अथमित्रविंदा[illegible]च्यते ॥ साचश्रीकामराष्ट्रकाममित्रकामायुःकामानांभवति
॥ तत्रदशहवींषिभवंति ॥ आग्नेयोष्टाकपालः ॥ सौम्यश्चरुः ॥ वारुणोदशकपालः ॥ पवमयश्चरुर्वा ॥ अथवाव्रीहिमयश्चरुः ॥
मैत्रश्चरुः ॥ ऐंद्रएकादशकपालः ॥ वार्हस्पत्यश्चरुः ॥ सावित्रोद्वादशकपालोष्टाकपालोवा ॥ पौष्णश्चरुः ॥ सारस्वतश्चरुः ॥

न्मः॥ तथाचापस्तंबः॥ पद्यश्नन्दैवतं हविर्व्यापद्येताथान्यद्धविस्तद्दैवतं निर्वपेत न्वस्कृगाहापनअभ्रतयोमं
त्रा आवर्त्तेत यदि मन्त्रदैवतमाज्येन संस्थापयेदिति॥ यदि हविःषु केशमक्षिकामूषिकपुरीषमशकदंशयु
कास्तक्ष्मपिपीलिकाभिषाऽमेध्यजीवलोकमनखादीनि पतितानि दृश्यन्ते तदा तानि पतितमाचाणि केशा
हीन्युद्धृत्य भस्मप्रक्षेपणेन भस्मप्रक्षेपणं वा सलिलेन प्रोक्षणं वा कृत्वा तेन यागं कुर्यात्॥ चिरपतितेषु तु तद्द्रव्य
संलग्नं हविर्द्रव्यमुद्धृत्या॥ भिरभ्यद्रव्यभस्मनवकीर्यमिधारणं कोचनरजतवैडूर्यप्रवालादीनामेकतम
संस्पृष्टाभिरद्भिर्मेचवस्त्रोक्षितं पर्यग्निकरणादित्यदर्शनमेतं वा चामप्रशस्तमुपयुंजीतं केशादिभिः सहप
क्वानां हविषां परित्यागः॥ पतितजग्धं विडालादिभिरवलीढं गवाघ्रातं मुखश्वासेनोपहतमुत्रपरिष्टात्
कृतहुतवासनसावधूननं कीटपतंगेरुद्रव्ययापतितेःक्लीबादिभिरभिज्ञातैः सैर्नास्तिकैः श्वाडालेन शुना
बैडालव्रतकादिभिश्च दूरतो दृष्टमीषत्तदुपहतं च यदा भावेत्॥ तदा सलिलेन सहमन्त्रा॥ भस्मनोरन्यंतरयसे

हेव०२५
॥३४॥

येशुद्धिः। एभिरेव सन्निकृष्टैर्दोषैरुपहतं वा मनुष्यस्य किंचिदुद्धृत्य भस्मना सलिलेन मृदा संसृज्योत्सुकेन सुवर्णेन
रजतेन वोपस्पृशेत्। अजं वा वघ्रापयेत्। मधूदकपयोविकारसर्पिषां दोषास्यात्तान्तरे स्थापितानां पावमानीभि
रुदकेनाभ्युक्षणं। एतस्य श्ववायसप्रभृतिस्पर्शनोपहतानां मुच्छिष्टस्य शेषत्वेन दधिकं। उदके प्रक्षिप्योद्धृत्योप
योजयेत्। श्ववायसाखुबिडालनकुलमर्कटघ्राहिकृतमक्षणघ्राणस्पर्शादिभिरुपहतानां शृतानां पुरोडाशा
दीनां त्यागः। भक्षणेनैव मधूदकपयोविकारतैलसर्पिःप्रभृतीनां च त्यागः। स्नेहाक्रान्ते श्लेष्मकर्णविट्दूषिकाऽस्र
ग्वसामानुषास्थिशरीरेतोमूत्रप्रभृतिभिरुपहतानां हविषां परित्यागः। अवहस्ततस्त्युदक्यादिसंस्पृष्टानां चैतत्त्ये
वमाद्दोषो हविषां दोषाः। न चेहापेदुष्टस्य हविषो प्सु प्रक्षेपनं। उष्णे वा भस्मनि निष्प्रक्षेपं कृत्वाऽनादिष्टहोमं सर्वके
स्तोत्रिपानि केरंगे कृत्वा हननं कृत्वा तेन यागः कर्त्तव्यः॥ ॥अथवाऽनायाविनष्टानां हविषां देवताः प्रति संख्यया
परिगणय्याज्येन विनष्टहविर्देवतानां यागः कर्त्तव्यः। आज्यसंस्कारात्पूर्वमस्यानिमित्तस्यपाते आज्यसंस्का
रं वेदिसंस्कारमग्निसंस्कारं च कृत्वाज्येनोपांशुयाजवद्विनष्टहविर्देवतानां यागः कर्त्तव्यः। पुनः क्रियायां चैवेदा।

॥३४॥

दिसंस्कृतमेवतस्यागप्रधानार्थत्वादितियाज्ञिकाः।पुनस्तत्क्रियायांतेसर्वमपवर्गान्तमादितइतिकारिकाकाराः।
तथाचमानवे।यदिहवींषिनष्टेयुर्दुष्येयुरपहरेयुर्वाआज्येनसंस्थाप्यपुनर्यजेतेति।आपस्तंबसूत्रे।यस्यस
र्वाणिहवींषिनश्येयुरपहरेयुर्वाआज्येनतादेवताःप्रतिसंख्याययजेताऽन्यामिष्टिमनुल्बणांतन्वीतयज्ञोपत्
स्यप्रायश्चित्तिरिति।आश्वलायनब्राह्मणे यस्यसर्वाणिहवींषिदुष्येयुर्वापहरेयुर्वाकांतत्प्रायश्चित्तिरिति।आ
ज्यस्यैवानिरुप्यादेवंप्रतिकल्प्यतयाज्याहविषिष्ट्वायजेतसोऽन्यामिष्टिमनुल्बणांतन्वीतयज्ञोयज्ञस्यप्राय
श्चित्तिरिति।आश्वलायनसूत्रे।हविषांव्यापत्तौल्हासुदेवतास्वाज्येनेष्टिंसमाप्यपुनरिष्येतेति।तथाआपन्ना
निहवींषिकेशनखकीटपतंगैरन्यैर्वाबीभत्सैर्भिन्नसिक्तानिवापोऽभ्यवहरेयुरिति।अथर्वणसूत्रे।सर्वाणिहवींषि
अपहरेयुर्वाज्येनतद्देवतायजेताथान्यामहीनामिष्टिंतन्वीतेति॥बहुषुहविष्षुमोहेजातेमानवेविशेषः।यदि
हवींषिमृत्येपुःपान्यांसमिधाविभज्यानुपूर्वेणप्रचरेदिति।एवंयाबहूनामन्यभागानंतरेअस्मिन्नेवविहारेतेषां
विनष्टानांहविषांपुनःकरणमादितआरभ्यकर्मापवर्गांतंभवति।तथाचकारिकायां।अथवादुष्टहविषांत

देव०२५ स्मिन्कर्मणि देवताभ्य आज्येनेष्ट्वा विनोपांशुयागं सर्वं समाप्यते। पुनस्तां क्रियतः सर्वं प्रपवर्गान्तमादितः इति। उपा

॥२५॥ शुयाजस्यासाधारणहविषोऽभावात्तद्विनाशनिमित्त आज्ययागो न भवतीत्यभिप्रायः। अत्रैवं कर्मरचना।

सर्वहविर्नाशे दोषेवादुष्टानामप्सु भस्मनि वा प्रक्षेपः। संस्कृते आज्ये अविनष्टे निमित्तपाते ध्रुवायामाज्ये

गृहीते तत्राज्यग्रहणं। इध्मप्रोक्षणादि ध्रुवास्थापनांतं उत्स्रुवोदूहनवर्जं। ततः स्थालीमासाद्य ध्रुवास्थाल्या

राल्लंभः। आत्मालंभादिहोतृवरणांते स्रुवाधारस्निक्स्रुवोत्तराधारवर्जं। ध्रुवातप्याप्याय्याप्य चतुरवत्तं कृत्वाया

ज्यापुरोनुवाक्याभ्यां विशिष्टहविःसंबंधिदेवतानां यागं कुर्यात्। नस्विष्टकृत्। नाज्यादश्नोपादितिन्यायाच्च।

ततः प्रतिपत्तिरूपं कर्मसमापनीयं। पवित्रप्रतिपत्तिः। अग्निसंमार्गः। व्यूहनं। परिध्यंजनं। सूक्तवाकः

प्रैषः। प्रस्तराहानं। दिहोमांते। अनुप्रहरेति प्रैषः। तृणानुप्रहरणं। आत्मालंभः। उदकालंभः। नसंवरादिप

रिधिप्रक्षेपः। सान्नाय्ये इष्टिश्चेद्द्रुपवेषहोमः। संस्रवाहुतिः। धुरि निधानं। वेद्योस्तु विमोकः। आवेदेस्तरणं। ॥२५॥

समिष्टयजुर्होमः। बर्हिर्होमः। प्रणीताविमोकः। व्रतविसर्ग इति। अथ परिस्थाल्यमाज्यमत्येंत दुष्टे तदा

तावन्मात्रमाज्यमासादनादिभिः सांनिपातिकैः संस्कारैः कृत्वा ध्रुवेदिमानेन च कृत्वा ध्रुवाग्रहणादि सर्वं व
द्यागं कुर्यात्। अथ यदि सर्वमाज्यं निर्वापं निमित्तमापद्यते तदा निरूप्याज्यमधिश्रित्य पर्यग्नि कृत्वा वेदि
मानादिस्योदकग्रहणवर्ज्यं पत्नीसंनहनांतं कृत्वाज्यमुद्वास्यावेक्ष्योत्पूयावेक्ष्य ध्रुवाग्रहणादि सर्वं विधा
गं कुर्यात्। अनेन प्रकारेणाज्येन देवताद्विष्टा पुनस्तस्मिन्नेव विहारे समस्तैरंगै रुपेतं प्राकृतं कर्म कुर्यात्। त
स्मिन्पक्षे आध्वर्यवाभावः। बहूनां हविषां मध्ये एकैकस्य नाशे दोषे वा आध्वर्यव हुत्वा सांनिपातिकैरंगैः
पुनस्तत् कुर्यात्। आज्यग्रहणोत्तरकाले निमित्ते चेन्न दापात्रासादने। अग्निहोत्रहवणी वज्ज्र वर्जितो दशग
णः। पात्रीधान्ये। उपवेषः। संयवनोदके। स्फ्योपहितपात्रीकरणादि हविरासादनांता पात्रप्रोक्षणे। कृष्णाजि
नदानादि कुकुटाहननवर्जं कं डूने। कपालोपधानं। उपसर्जन्यधिश्रयणे। कृष्णाजिनदानाद्यास्योदकदानांता
इध्मप्रोक्षणादिमा कृते कर्म कुर्यात्। अथवा यस्य हविषो नाशे दोषे वा तद्हविर्देवताया आज्येन यागं कृत्वा पुन
र्द्रव्यांतरमुत्पाद्य तदैः सह यागः कर्तव्यः। बहुषु हविःषु एकैकहविर्नाशेपीदं प्रायश्चित्तं भवत्येव। ससान्नाय्य

दे० वृ० २५।
॥३६॥

केः पुनःशाखा छेदनादितरासीमेवसायंदोहेकृत्वाबहुनालौकिकोनदध्यात्मातम्रहृधिसमारयेत्।ततःप्रातर्दोहा
र्थंवत्सापाककरणंकृत्वाप्रज्वलनादिप्रकृतिवत्सर्वंकुर्यात्।अग्निहोत्रार्थमुद्धृतेष्वंतरागमनेकृतेप्रायश्चि
त्तेनाद्रियेत।अंतरागमनेकुर्याद्वा।कथंचिन्मध्ये।त्वांतरागमनेकृतेप्रायश्चित्तंस्यान्नावः।श्वैडकवराहेषुगार्ह
पत्याहवनीययोरंतरालेगतेषुगार्हपत्यादारभ्याहवनीयंयावत्तदुदकधारांसंततांनिनयेदिदंविष्णुर्विचक्रम
इतिमंत्रेण।भस्मनोवाधारांनिनयेदनेनैवमंत्रेणा।ऽस्मिन्पक्षेगार्हपत्याद्भस्मादायाहवनीयपर्यंतंसंततंनियेने
ताभ्यां।कुक्कुरः।एवं।कोमेषः।वराहोऽथमश्चूकरोविड्वराहः।एतरप्यग्निहोत्रार्थमुद्धृतेष्वेवा।चकीवातेगर्ह
मेगार्हपत्याहीनंचांतरालेगतेअग्नयेपथिकृतेऽष्टाकपालःपुरोडाशोऽग्न्यन्वाधानादिकर्मार्यवगौतनः।।
पथिकृत्यनड्वाहान्दक्षिणेत्यापस्तंबाश्वलायनौ।सांख्यायनमते।पथिकृतोंतरेण।विहारंचकीवतिहृते।
तन्त्राप्यचक्रीत्वथ्वप्यतदिति।व्यारभ्यातन्।सि।त्तातद्व्याख्यानमुक्तमिवाभाति।सर्वविषयमेतदसंयुक्तवि
धानादितिसर्वेककारिदयः।अग्निहोत्रनेमितिकमध्येविधानानदप्यग्निहोत्रविषयमेवेतियाज्ञिकाः।आ

३६

श्वलायनब्राह्मणे। नशकुर्यस्य गार्हपत्याहवनीयावंतरेणानोवा रथोवाश्वोवा प्रतिपद्येतेकानत्र प्रायश्चि
त्तिरितिनैनन्मनसिकुर्यादित्याहुरात्मन्यस्यहितावभवंतीतितत्त्वमनसिकुर्वीतगार्हपत्यादवछिन्नामुदक
धारांहरेत्तंतुंतन्वन्रजसोभानुमन्विहीत्याहवनीयात् इति॥ ॥पक्षान्तेष्टिपशौच। प्रक्षान्तानित्याः। नित्या
नांदर्शपूर्णमासचातुर्मास्याग्रयणेष्टीनां कालातिक्रमे प्रायश्चित्तत्वेनाग्नयेपथिकृतेष्टाकपालःपुरोडाशो
भवति। नित्याःवैष्टिषुकालातिक्रमोभवतिनाऽनित्यासुतासामप्रतिपतकालत्वात्। नैनानेमितिकेष्टीना
मवश्यकर्त्तव्यानांनिमित्तकालातिक्रमेपिनपथिकृत्। किंतुयदाकदाचिदाध्वर्यवसूत्रकेनासामेवानुष्ठा
ने। सूत्रेइतिष्टियहणात्पशुसोमकालातिपतेपथिकृत्। अत्रमतभेदोस्ति। मुख्या। कालातिक्रमेत्राध्व
र्यवहुत्वागौणकालेनुष्ठाने। गौणमुख्ययोरुभयोरप्यतिक्रमेचतत्कृत्वा तेनतत्रत्यान्ना। यत्वेनप्रथिकृन्मव
तीतियाज्ञिकदेवभट्टगदाधरकारिकाकाराः। अपरेतुमुख्यकालातिक्रममात्रेप्रायश्चित्तरूपैवेयंमिष्टिरि

दे॰व॰२५
।२८।।

स्याहुः। तच्चयुक्ततरं सर्वेषु शाखांतरसूत्रेषु तथैव दर्शनात्। प्रत्याम्नायपक्षस्यावचनाभावादुपेक्षणीयः।
तेन दर्शपूर्णमासयोरेकैकस्य मुख्यकालातिक्रमे पथिकृतं कृत्वा गौणकाले करणं। चातुर्मास्येष्वस्यैकै
कपर्वणो मुख्यकालातिक्रमे पथिकृतं कृत्वा गौणकाले करणं गौणकालस्याप्यतिक्रमे तु नित्यकर्मलोपनि
मित्तं प्रायश्चित्तमेव भवति। न तु तत्कर्मकर्मान्तरेण तत्कालस्य रुद्धत्वादिति। तथा च निदानसूत्रे। सर्वमहः
प्रातराहुतेः स्थानं। सर्वा रात्रिः सायमाहुतेः।। सर्वः पक्षो दर्शस्य कृष्णपक्षः पौर्णमासस्य।। तथा पशुरप
र्ये संवत्सरे सोमश्च।। व्यवाये तु प्रायश्चित्तमेव क्रियते उत्तरेस्याधिकारार्थमकाले कृतमकृतमिति न
क्रियते तत्कालमनाऽन्यस्य कर्मणः कालो वरुद्ध इति। मानवे च पर्वातिपत्तावपि पथिकृदुक्ता। कालाति
पत्तौ पथिकृती पशोर्दर्शपूर्णमासयोश्चातुर्मास्यपर्वसु नवाशने वाग्रयणस्येति।। काठके।। अग्नये पथि
कृते ष्टाकपालं पुरोडाशं यस्य पौर्णमासी वामावास्यां वातिपद्यते न्यूनो ह्यनेन पौर्णमास्यतिपन्नो पश्चाद
र्शनेनामावास्या प्रक्रान्ता चेदिति पंक्तिविंध्याहाग्नेयमेवाग्नये पथिकृते कुर्यात्तस्य याज्यानुवाक्ये वेत्थाहि

प्रा॰प्र॰
३७

निर्द्देतुल्यासेनिष्टते। उभयातिपत्तौ चतुर्होत्राहुत्वान्वारंभणीयामिष्ट्वा पुनर्दर्शपूर्णमासावारभे
तेति॥ ॥ आपस्तंबसूत्रे अग्नये पथिकृतेऽष्टाकपालं पुरोडाशं निर्वपेद्यो दर्शपूर्णमासयाजी सन्पौर्ण
मासीममावास्यां वातिपातयेत्। समानतंत्रे वा मुख्यः कार्योऽग्न्येकेषां विकार एतस्यायज्ञ भिद्यते यस्य
हेमंते तरेन्यामिष्टिं निर्वपेदिति य एवासावाग्नेयोऽष्टाकपालः पौर्णमास्यां यो मावास्यायां तमग्नये पथिकृ
ते कुर्यात् नैव पुनः पंथानमवैति न यज्ञविच्छि नतिइति बित्तायतने संयाज्ये एव वा पथिकृती स्यातामित्युपमितिमा
नवेच। कालमतीतेस्यात्स्वा ह्याग्नेयमष्टाकपालं पथिकृता वाजयति इति। पशुसोमयोः करणाशक्तौ मनुनातस्मा
त्याम्नाये वैश्वानरेष्टिरभिहिता। इष्टिं वैश्वानरीं नित्यां निर्वपेदब्दपर्यये। क्लृप्तानां पशुसोमानां निष्कृत्यर्थमसंभ
वात्। अस्यार्थः शक्तौ क्लृप्तानामारब्धानां नित्यानां पशुसोमानामसंभवे द्रव्याद्यभावात्करणासंभवे तेषां निःकृत्यर्थं
तत्प्रत्याम्नाये प्रतिनिमित्तं वैश्वानरीं चक्रं कृतान्तद्यात्ततः समाप्तौ समकृद्यपि तां कुर्यादित्यभिप्रायः। अवइतिहि
क्षितगदाधरः। याज्ञवल्क्योपि। प्रतिसंवत्सरं सोमः पशुः प्रत्ययनं तथा। कर्त्तव्याग्रयणेष्टिश्च चातुर्मास्यानि

दैव०२५
३८॥

चैवहि। एषामसंभवे कुर्याद्दिष्टिं वैश्वानरीं द्विजः। एषां द्रव्याद्यसंपत्त्या असंभवे स्वस्वकाले तत्स्थाम्नायेवैश्वा
नरीं कुर्यात्। शांखायनः। नाहोमेनानिज्यया वाग्नीनुत्सृजेत् प्रायश्चित्तं तु कृत्वाऽतीतानि कर्माणि समापयेदित्यादि
ति। कालातीतेषु सर्वेषु प्राप्तवत्स्व परेषु च। कालातीतानि कृत्वैवाविदध्यादुत्तराणि चापरस्मादि:पिंडयज्ञादिम
माहादकृते यदि। प्रायश्चित्तं ततो हुत्वा कर्त्तव्यं तद्दिनोत्तरे। लुप्तकर्मणि सर्वत्र प्रायश्चित्तं विनिर्दिशेत्। प्रायश्चि
त्ते हुते पश्चान्नित्यं कर्म विधीयते॥ पिंडपितृयज्ञस्याकरणेनु विशेषउच्यते। पिंडपितृयज्ञस्यत्वमावास्याया
मननुष्ठाने तत्प्रायश्चित्तत्वेन वैश्वानरेष्टिरेव भवति। न पिंडपितृयज्ञः॥ यथाच कात्यायनः॥ परेणाग्नौ हुते
स्वार्थं परस्याग्नौ हुते स्वयं। पितृयज्ञात्यये चैव वैश्वदेवद्वयस्य च। अनिष्ट्वा नवयज्ञेन नवान्नप्राशने तथा
। भोजने पतितान्नस्य चरुर्वैश्वानरो भवेत्॥ अनाहिताग्नेश्चरुः॥ आहिताग्नेस्त्विष्टिरेव यएवाहिताग्नेः पु
रोडाशास्त एवानाहिताग्नेश्चरव इत्युक्तत्वात्। तथा च कारिकायां। मुख्यकालेयदा नस्यात्पौर्णमासः कथं
चन। कृत्वानाहिष्टमादर्शात्कर्त्तव्यो यत्र कुत्रचित्। नचेत्प्रागदर्शात्तत्स्यादर्शेन सहतत्क्रिया॥ तत्राज्यभागसंयाज्ये

३८॥

हार्शिके तत्प्रधानतः। तत्रेणांगानि भेदेन प्रधानानि भवंति च। यदि दर्शोऽप्यतिक्रांतस्तदा पथिकृतीं भवेत्। एवं दर्शोऽतिपन्नः प्राक् पौर्णमास्य चेत्कृतः पितृयज्ञे विनासोऽपि कर्तव्योयत्र कुत्रचित्। पितृयज्ञः स्वकाले स्यादभावाद्गौणकालतः। नचलंपद्यते तत्र प्रायश्चित्तं भवेत्क्वचित्। न पौर्णमासतंत्रे स्याद्दर्शो भिन्नप्रयोगतः। पौर्णमासेप्यतिक्रांतेऽतिपत्तिः पथिकृत इति। कात्यायनः। पौर्णमासात्यये हव्ये होता वायदहर्भवेत्। तदहर्जुहुयाद्देवममावास्यात्ययेऽपि च। आहूयमाने नष्टं श्वेत्तत्काले समाहितः। संपन्ने तु यथा तत्र हूये यदि होष्यते। आहुताः परिसंख्याय पात्रे कृत्वाहुतीः सकृत्। मेचेण विधिवद्धुत्वै एवमेवापरा अपि। तथा स्वकाले सायमाहुतेरप्राप्तौ होतव्ये हव्ययोः। प्राक् प्रातराहुतेः कालः प्रायश्चित्ते हुते स्वति। प्राक् सायमाहुतेः प्रातर्होमकालानतिक्रमः। प्राक् पौर्णमाद्दर्शस्य प्राग्दर्शादितरस्य तु। वैश्वदेवत्वतिक्रांते अहोत्रमभोजने। प्रायश्चित्तमपोगुहृत्वा पुनः संतनुयाद्धुतं। होमद्वयात्यये दर्शपूर्णमासात्यये तथा। पुनरेवाग्निमादध्यादिति भार्गवशासने। अत्र त्रिकांडमंडनः। मुख्यकाले यदावश्यं कर्म कर्तुं न शक्यते। गौणकालेऽपि कर्तव्यं गौणोऽप्यत्रेदृशो भवेत्। २। कर्मणां गौणकालपरिमाणमपि स एवाह। आसायमाहुतेः

देव० २५
॥ २७ ॥

कालः कालोऽस्तिप्रातराहुतेः॥ मातराहुतिकालोऽप्राक्कालः स्यात्सायमाहुतेः। पौर्णमासस्य कालोऽस्ति पुरा दर्शस्य
कालतः॥ पौर्णमासस्य कालोऽप्राग्दर्शकालोऽपि विद्यते। वैश्वदेवस्य कालोऽस्ति प्राक्प्रघासविधानतः। प्रघासानां च
कालोऽस्याः साकमेधीयकालतः। स्यात्साकमेधकालोऽप्यशुनासीरीयकालतः। शुनासीरीयकालोऽप्या वैश्वदेवक
कालतः। श्यामाके व्रीहिभिश्चैव यवैरन्योन्यकालतः। प्राग्पक्षं युज्यते वर्षं पनत्वं चाग्रायणात्ययः। दक्षिणा
यनकाले षाश्चिज्यायोत्तरायणे। अन्योन्यकालतः सर्वेषु युक्तेन कर्मे अपि एवमागामियागीयमुख्यका
लाद्धस्तनः। स्वकालादुत्तरो गौणः कालः स्यात्पूर्वकर्मणः। यद्यागामिक्रियामुख्यकालस्याप्यंतरालवत्॥ गौ
णकालत्वमिच्छंति केचित्प्राक्तनकर्मणि। गौणेष्वेतेषु कालेषु कर्मचोदितमाचरेत्। प्रायश्चित्तप्रकरणप्रो
क्तो विश्रुतिमाचरेत्। प्रायश्चित्तमकुर्वाणो गौणकाले समाचरेत्। नित्येष्टिमग्निहोत्रं च भरद्वाजीयभाष्यतः ॥ ३७ ॥
मुख्यकाले हि मुख्यं चेत्साधनं नैव लभ्यते। तत्कालद्वययोः कस्य मुख्यत्वं गौणतापि वा॥ मुख्यकालमुपाश्रि
त्य गौणमप्यस्तु साधनं। न मुख्यद्रव्यलोभेन गौणकालप्रतीक्षणं। होमे तु विशेषमाह सएकादशकपक्षे गतो या

वान्होमसंधोपि पद्यते। पक्षहोमविधानान्तं हुत्वा तं तु मतीयजेत्। स्वकालोत्कर्षितः कश्चिद्गौणकाले
निरूपितः। अपकर्षादथान्योपि गौणकालान्निरूप्यते। आमयाव्यार्त्तिमान्वा पद्भ्रतो वाध्वगतोपि वा राष्ट्र
भ्रंशे यथाभावे गुरुकर्गेहे वसन्नपि। अन्येष्वेवं प्रकारेषु निमित्तेष्वागतेषु च। समासमग्निहोत्राणां यथासंभ
वमाचरेत्। अनातुरो प्रवासी च निश्चिंतो निरुपद्रवः। पक्षहोमं तु यः कार्यात्स चरेत्पतितं स्मृतं। निमित्ताना
मिहैतेषां निर्दिष्टं यत्कियदुच्यते। तत्सर्वेषु निमित्तेषु जानीयात्प्रातिपादिकं। पक्षहोमानशेषान्वा शेषहोमानथा
पि वा। समस्य जुहुयात्तत्र प्रयोगोपनिरूप्यते। प्रतिपद्यस्तेयेन्या यमापद्याय तत्र वा दिने। यावंत्यौपवसथ्याहान्प्रातर्दिना
निभवंति हि। तावंति परिगृह्णीयाच्च तु रुन्नयनानि च पात्रांतरं महायां वा नित्यायां प्रकृतस्रुक्। विस्खुलस्रुगं
तरं वापि कृत्वा तत्र समुन्नयेत्। एकासमित्सकृद्धोमः सकृदेव निमार्जने। उपस्थाने सकृत्कार्यं शेषा प्रकृतिरिष्य
ते। एवमेवोत्तरत्राद्विमातर्होमात्समस्य तु। जुहोत्यौपवसथ्याहः। प्रातर्होमावधीत्सकृत्। समारोप। विधानेन स
मारोपयते नलात्। नेधार्थनेय पाधार्यान्धारयसे वर्ह्र्वत्। एवं प्रतिपहोन्यत्र यत्रापद्रुपजायते। तथैवोपसथ्या

हे·व·२५
॥४०॥

त्याकृत्यत्रत्यापद्दिनत्रपति। तृतीयायांचतुर्थ्यांवांपंचम्यांवापरत्रवा। तद्दादीनातंदतांनांहोमानांस्यात्समा
सता। अपरेवावधिर्होमसमासस्याभ्युपपद्यते। तस्मात्कदाचिदारभ्ययावत् तत्तावतोपिवा। आपत्कालेस
मान्होमान्समस्येदेकपक्षगात्। अतएवद्विरात्रायत्रिरात्राद्याधिकायवा। समस्यजुहुयाद्धोमनित्येवेप
क्तेकठैः॥प्रवासिनोग्निहोत्रस्यपंचाहेसप्तवापुनः। सायंप्रातःपृथग्घोमएकस्मिन्नहनीतिच। एवमे
कत्रपक्षेयेहोमास्तेषामशेषतः। न्यूनानांवासमासःस्यान्नपक्षांतरवर्त्तिभिः। सर्वथोपवसथ्याहेसायं
होमःपृथग्भवेत्। तथैवयजनीयाहेप्रातर्होमःपृथग्भवेत्। दर्शेपिवास्त्वश्वस्त्यंचेत्सामंकेनापिहेतुना। तदात
त्सायहोमोपिपूर्वैःसहसमस्यते। तावतानापगच्छेच्चेदापत्पक्षांतरेपिच। पुनस्तत्रापिकर्त्तव्यःसमासःपृ
थगेवहिनतुपक्षांतरस्थानांसमासश्चोद्यतेमिथः। एवमापद्गतःपक्षेपक्षेचैवंसमाचरेत्। तृतीयेनेत
रेपक्षेसमासमाचरेत्। कठैःपक्षद्वयेत्वेवंपक्षहोमेनियम्यते। आपच्चेदनुवर्त्तेतदीर्घकालंकथंचनया
वज्जीवम। विच्छिन्नापक्षहोमान्समाचरेत्। आपदेवावधिस्तत्रनपक्षगणनावधिः। अथापरःसमासस्य

मा·प्र·२५
॥४०॥

प्रकारः प्रतिपाद्यते। सायंप्रातस्तनौ होमावुभौ सायं समस्यतु। आपन्नो ऽनुहुयात्तत्र समिदेकाथवा द्वयं। सायंहो
मस्य मुख्यत्वात्तद्धि येते च मिष्यते। आपद्गुरुत्वमाल्लोप्य कदाचित्सायमेवते। उभयेपि समस्यंते सायंप्रात
स्तना अपि। ज्ञातदुर्श्ममादिकायद्वाभृतश्चेदपहागता। तथा सूर्यापराह्णकाहोनिमित्तेस्मृति चेष्यते। दीर्घ
कालापदं मत्वा पक्षहोमेहुतेस्मृति। तत्रांतरालेयद्यापत्कदाचिदपगच्छति। कालेकाले पुनर्होमाज्जुहुया
त्साग्धुतानपि। कटेषेवं विदुः केचित्कैच्छत्यन्ये पुनर्हुति। अनिवर्त्स्य महायज्ञान्यो भुंक्ते प्रत्यहं गृही। अना
तुरः समिधेने कृच्छ्रार्द्धेन विशुध्यति। अकृत्वान्यतमं यज्ञं पंचानामधिकारतः। उपवासेन शुध्येत पातकं
संस्थासु चैवहि। गोध्रं व्रतं चरेत्यागे चांद्रं न एव परिग्रहे। कामादकामतः कृच्छ्रं स्मार्त्ते श्रौवेदिके पिवा।। दर्शेच
पौर्णमासे च परान्निपक्कभाजने। आधानादिकृतं नस्य छौनेस्मार्त्तं न थैव च। अकृत्वैश्वदेवं वेदस्तु मेतिग
न्स्तिमान्। वैश्वदेवं ततः कृत्वा सायंहोमं समाचरेत्। स्तोत्रमोह अग्नये पथिकृदिष्टिर्भवति। मोहोऽन्यथा
क्रियास्तोत्रसंबंधी मोहः स्तोत्रमोहः। अन्यस्य स्तोत्रं पवमानादेः स्थाने न्यस्य गाने अन्यास्ट्टक्षपा।। तस्य

दे॰व॰२५
॥७१॥

वत्सस्तुसामांतरगानेवा। सर्वमपिस्तोत्रमोहश्रमवेनोच्यते। तस्मिन्स्तोत्रमोहे प्रथमं कालाहुतिवाचनेकृ
त्वापथिकृदिष्टिःपशुपुरोडाशन्यायेनकुर्यात्। ततोयथावत्स्तोत्रंगातव्यं॥ ॥शास्त्रमोहेपिपथिकृदिष्टिर्भ
वति। शास्त्रस्यसंबंधिनिमोहे अन्यशाक्रियायांभ्रांत्या अन्यस्यशास्त्रस्यस्थानेन्यशंसने ग्वि। वपर्यासे
ग्विस्मरणेसुकृदिविपर्यासेविस्मरणेचयथाकालेप्राप्तंकालाहुतिंहुत्वावाचनेचकृत्वापशुपुरोडाश
न्यायेनाग्नयेपथिकृतेष्टाकपालःपुरोडाशोभवति॥ ॥ततोयथावच्छंसनंकर्त्तव्यं। अत्राहवनीयेन्यत्रा
धानादिभागपरिहरणेनासांनिपातिकैरंगैरूपेतापथिकृदिष्टिःकार्या। सवनीयपशुतंत्रातःपातात्।
आज्यभागोपृथक्कार्यो। तयोःसवनीयपशावभावात्। तत्रेत्थंप्रयोगः। आहवनीयएवाग्न्यन्वाधानेपा
त्रासादनेशूर्प्यादिस्फ्यवर्ज्जितोद्रव्यगणः। अग्निहोत्रहवणीवर्ज्जितश्च। कपालान्यष्टौत्रीधान्यासंयवनो
दके। पुरोडाशपात्रीश्रृतावदानेचेति। स्योपहितपात्रीकरणादिश्च। स्योदकनिनयनांतेकुक्कुटाहननाज्य
निर्वापवेदवेधवर्ज्जं। पुरोडाशपात्रीश्रृतावदानयोः। समार्गः। ततोविभस्मीकरणाद्यालंभनांतेस्रुचौ

मा॰प्र॰
॥७१॥

गृहीत्वाज्यभागौ प्रधानयागः स्विष्टकृदादि भागपरिहारान्तं कृत्वा स्तोत्रशस्त्रयोर्यथावत्करणं कुर्यात्। अत्र
स्तोत्रशस्त्रे प्रयाजवददृष्टार्थे स्यादके स्वतंत्रे संनिहिते ग्रहयागांगभूते आरादुपकारके कर्मणी न तु पुरोनुवा
क्यावद्देवतासंस्कारके संस्कारकर्मणी तेन तद्विनाशे ग्रहचमसयागावृत्तिर्न भवति केवलं प्रायश्चित्तं कृत्वा
यथावत्स्तोत्रशस्त्रानुष्ठानं। विस्मृतयोश्चमाक्स मासैरनुष्ठानं निमित्तवशाद्ग्रहयागावृत्तौ च न स्तोत्रशस्त्र
योरावृत्तिः प्रयाजादिवदारादुपकारत्वादेव। तदुक्तं तंत्ररत्ने पंचमाध्याये षोडशपधिकरणे तिः संदिग्धं वस
ल्लि ते हि ग्रहयागांगत्वं स्तोत्रशस्त्रयोरिति। आहिताग्नेः स्वकीयजनन्यपुत्रपौत्रादिमरणे पथिकृदादिष्टि
र्भवति। यजनीयेऽह्नि तद्दहनादिकर्मापवर्गान्ता। परतंत्रमध्यपाताभावात्। व्रत्येऽह्नि पौर्णमास्याममावा
स्यायां वा व्रतोहर्दिने मैथुनं स्त्रीगमनं मांसाशनं यदि यजमानः करोति तदा अग्नेव्रतपतयेष्टाकपालः पुरोडा
शो भवति। पौर्णमास्यां च सद्यः पक्षाश्रयणे पौर्णमास्यां व्रतग्रहणाभावात्तत्र मैथुनमांसभोजने पि नेदं प्रायश्चि
त्तं।। ।।शांखायनसूत्रे। अग्नये व्रतपतये व्रत्यवेलां प्राप्याव्रत्यं वा चरित्वेति पठ्यते। ते। व्रत्यवेलां तत्र प्रत्यहः

दे व० २५
॥४२॥

सकलं पवासेन व्याप्य। अत्रसंवा मैथुनमांसभोजनादि चरित्वेत्यस्यार्थः। तथाच काठके। व्रतोपतौ व्रत्यं चरन्व्रा
तपतीं कुर्यादिति। आपस्तंबोपि। अथ ये व्रतपतेष्टाकपालं पुरोडाशं निर्वपेद्यश्चाहिताग्निः सन्नव्रत्यमिवाचरे
त्स च सेहाव्रत्येहनि मांसं वाश्नाति स्त्रियं वोपैतीति। अमन्त्यारेनःस्कंदे नेनादिष्टमेव। अतः श्रौत प्रतिषिद्धा
चरणे चेयमेव विधिर्भवति। शाकं मांसं मसूरं च चणकं कोरदूषकान्। माषान्मधुपरान्नं च वर्जयेदुपवासके। तथा
तिलमुद्गादृते शैब्यंसस्यं गोधूमकोद्रवौ॥ चीनकं देवधान्यं च सर्वशाकं तथैस्त्रवे। सज्जीक्षारं यवक्षारं टंकणक्षा
रमेव। व्रतस्थो वर्जयेन्नित्यं सामुद्रं लवणं तथा। क्रोधाहंकारभयविषादकार्पण्यलोभादीन्नस्यमाणो वर्जयेत्।
तथा मध्याह्नस्योपरिष्टाद्द्विव्यालं मुधा बहिर्ग्रीसं न त्वगृहं प्रविशत्। आनासनुशिलाप्रिष्टपरान्नानि च
सेत्यजेदित्या। हीनं स्मृति विहितानामकरणे स्मार्त्ते। प्रायश्चित्तं भवतीति निगदाधरः। व्रतपत्ये भवनीतिया
ज्ञिकाः। यच्च भविष्यपुराणे। सप्तमी व्रतमन्यच्च के। मोहात्क्रोधात्प्रमादाल्लोभा व्रतभंगो भवेद्यदि तदा त्रिरात्रं
नाश्नीयात्। कुर्याद्वा केशमुंडनं। प्रायश्चित्तमिदं कृत्वा पुनरेव व्रती भवेदिति तत्स्मार्त्तं कृच्छ्रचांद्रायणादि प्रति

प्रा०
४२

पदानितिथिव्रतभंगेविषयमेवपुनरेवव्रतीभवेदित्युक्तत्वात्।नत्वत्रतथासंभवति।समाप्तेप्रधानेकेवलस्य
व्रतोपायनरूपस्यांगस्यपुनःप्रयोगानुपपत्तेः।वसनेन्धनाहिरण्यमेव।अहनिमांसंमैथुनेवर्जयेदित्यहःश
ब्दस्यकर्मणोपलक्षणार्थत्वात्कर्मणिप्रारब्धेनिषेधातिक्रमेइदंप्रायश्चित्तंभवतीतिकर्ममध्येपाताद्व्यसं
स्कारंवेदिसंस्कारमग्निसंस्कारंचविधायारादुपकारकांगवर्जितंसंनिपत्योपकारकांगयुक्तंभागपरिहर
णेनतमिदंभवति।तत्रायंपदार्थक्रमः।ब्रह्मवरणात्प्राक्।निमित्तेजातेआहवनीयेग्न्यन्वाधानं।ब्रह्मवरणं
।प्रणीताप्रणयनमदृष्टार्थत्वपक्षेनभवति।संयवनार्थत्वसर्वार्थत्वपक्षयोर्भवति।आहवनीयस्यैवपरिस्त
रणं।पात्रासादनेअष्टौकपालानि।दक्षिणांतद्धानपूर्णपात्रकमपिवर्गावर्जंसर्वमासादने।शूर्पादानाद्याहव
नीयोपवाजनांतेविशेषः।नकुक्कुटाहननं।नाघ्रीदकनिनयनं।नान्वाहार्याधिश्रयणं।नस्रुच्योदकाहरणं।न
जुहूपभृतोराज्यग्रहणं।नोल्मुकोद्दहनं।स्रुमार्जनं।नोरक्षणं।सशेषोमूलावसेकः।अग्निजुहूर्नास्युपभृत्त्वाग्ने
त्रिजुहूपभृतोरासादनं।ध्रुवासादनं।अग्निव्रतपतिगच्छेतिप्राणदाने।आज्यस्थालीपुरोडाशयोरासादनं।

हेव॰२५
॥४३॥

सर्वारंभः। आत्मलेभः। उदकोपस्पर्शनं होतुरामंत्रणादि प्राकृतस्य एव साभिषेक्यः। न हरवीधारीजलिकरणोत्तराधाराः। सेप्रेषोपि
संमार्गः। होतृवरणं। न स्रुकगादानं। न प्रयाजाः। नाज्यभागौ। स्रुचौ गृहीत्वा अग्नये गृहपतये नुब्रूहि। अग्निं व्रतपति
यजा इदमग्नये व्रतपतये। ततः स्विष्टकृदादिभागपरिहरणांतं। प्राशित्रादि सर्वं भवति॥ ॥अत्र सर्वानुपरतं प्रोत्पन्नो
मुनेमिनिकेशिशुकं प्रपद्यादिहोत्रे। आवाहनं स्रुकगादापनं प्रयाजाज्यभागवर्जं प्रधानयोगे। त्वमग्ने व्रतपा असि इ
ति पुरोनुवाक्या। ये ३ हमग्निं व्रतपतिं यद्वो वयं प्रमिनाम इति याज्या। मित्यपरस्विष्टकृतः पिप्रीहि देवान् पुरोनुवाक्या निगमः।
ये ३ हमग्निं स्विष्टकृतमग्नये इद्धेति इडामार्जनांते। प्राकृतो होता आवहनं स्रुकगादापनादि प्राकृतं। स्विष्टकृते पि याज्या
नुवाक्ययोर्विपर्यासः। कार्यः। ततः स्वकाले प्राकृतकर्मारंभः। तत्राग्न्यन्वाधानं तत्रवरणाच कृतमस्ति। संपवनार्थ
वपक्षे सर्वार्थत्वपक्षे च न प्रणीताप्रणयनं। आहवनीयस्य परिस्तरणं कृतामेव। गार्हपत्यदक्षिणाग्न्योः परिस्त
रणं। पात्रासादनानंतरं निमित्तं वेदापतनं। तदाहवनीये अन्वाधानं। अपर्याप्तानां घ्निवासनांते। कुकुटाहन
ननेवर्जं। प्रकृतानामासादितानां कपालानां मध्यादाहायार्थवत्कपालोपधाने। आप्यायकस्थापने। न नि

यनो।वेदिमानादिप्रोक्षणीप्रेषांतेन स्फ्यपादव्यत्रहारः।एकस्याः पात्र्याः संमार्गः स्रुवादीनां सर्वेषां संमार्गः।संमा
र्जन स्थापनं।ध्रुवायामेवाज्यग्रहणं।।इध्मवेदिबर्हिषां प्रोक्षणं।सन्नशाखो मूलावसेकः।नोल्मुकोदूहनं।अर
ण्यवत्तहुपभृतोरासादनं।मंत्रेण ध्रुवायाः।हविरासादनं।अकृतेचेद्धनग्रहणं।होतृषदन स्थापनाघाहवनी
पोपवाजनं।तं सप्रैषः संमार्गः।हौत्रवरणं।।स्रुचावाराय प्रधानयागः।स्विष्टकृद्यागादि भागपरिहारांतेन
पवित्रप्रतिपत्तिः।ततः प्रकृते कर्मकर्त्तव्यं।प्रोक्षणीः पात्रांतरे उत्सार्य हविर्ग्रहणादि।कुक्कुटाहननं मंत्रः।सर्वे
णसहास्फ्योद्रकनिनयनं।।आन्वाहार्याधिश्रयणं।स्फोद्रव्यत्रहारः।एकस्याः पुरोडाशपात्र्याः संमार्गः।आसा
दितयोरेवत्तहुहूपभृतोराज्यप्रहरणं।उल्मुकोदूहनं।आज्यस्थाली ध्रुवावर्जं आलेभः।पूर्वापारो निह्नवः।उत्त
राधारः।प्रयाजादियथोक्तं नैमित्तदेवता पूर्वकं व्यूहनं।अग्ने व्रतपते रग्नेरग्नीषोमयोरित्यादि।अग्नि व्रतप
तिरग्निरग्नीषोमा विद्यादि।।पूर्वकपेः सहनपाकणप्रक्षेपः।भागावेक्षणं भागप्राशनं च तेत्रेणी एवमग्निमत्या
हीनामत्रावस्मरेपतितानामनुष्ठानं।दर्शपूर्णमासार्थग्न्यद्धरणानंतरं आरोपेदुःस्वे नाश्रु करणेद्रव्यवियोगादिदुः

देव०२५
॥५४॥

खनिमित्ताश्रुपाते ऽग्नये व्रतभृते ऽष्टाकपालः पुरोडाशो भवति। आर्त्तिग्रहणं न संतोषाश्रुकरणे। अस्यापि
दर्शपूर्णमासमध्ये ऽन्तःपातित्वात्तत्तन्त्रेणैव यथावसरमनुष्ठानं। आहिताग्नावेव जेयं हाहिताग्नि
ग्रहणं तत्रैकाग्निकस्य। अग्निनिमित्ते व्रातभृत्यानिवृत्त्यर्थं प्रयोजनं तदभावादिति वासुदेवः। युक्तं चैतत्। उ
द्धृताग्नेरिति तस्यार्थस्य सत्ये ह नीत्या तस्य चानुवृत्त्यापि सित्वात्। अश्रुग्रहणस्य कर्मोपलक्षणार्थत्वात्॥ ॥
करणं तेनेहाश्रुकरणादिनिमित्तमापद्यते तदा मांनिपातिकैरंगैर्व्रतभृदादेरग्न्यन्वाधानादिभागप
रिहरणं तैनैमित्तिकं कर्म कर्त्तव्यं। तत्र विशेषः आहवनीयेऽग्न्यन्वाधाने। पात्रासादने। शूर्पे तण्डुलमुस
लं हविर्द्रव्यं च स्फ्योपहितपात्रीकरणादि ग्रहणं सादनांते। अग्नये व्रतभृते जुष्टं भृते त्वा जुष्टमिति निप्रोक्ष
णे। आसादितानां पात्राणां प्रोक्षणं। कृष्णाजिनादानादिकं दुनेकरेणांते कुकुहननवर्ज्जं। उपवेषादानादि
प्राकृतकपालानां मध्यात्कपालानि यथाविहितसंख्यान्यादायोपधीयंते। अभ्यूहनादि वेदसंमार्जनांते। ५४
अन्वाहार्यपचनेऽग्न्यधिश्रयणवर्ज्जं। आज्योदकस्थापनं। प्रोक्षणीपेषा चान्यतराचेद्दक्षिणांते। स्फ्यादरं स्पहा

रवर्ज्जं। संमार्जनस्थापनं ध्रुवायामेव चतुर्गृहीतग्रहणं। इध्मविस्त्रंसनादि सर्व्वाभ्यन्यकरणं तो उल्मुकोदूहह
नवर्ज्जं। अग्निजुहू र्नामित्येत्यस्युपभृन्नाम्नेति जुहूपभृतो रासादनं घृताख्यमिध्रुवेति ध्रुवायाः। विनस्मी
करणाद्युपवाजनांतं। अग्निं व्रतभृतं गच्छेति प्राणदानं। न सर्व्वाधारांजलिकरणो न्तराधारः। स्वष्टे यो ग्निसंमा
र्गः। होतृवरणं। ततः स्रुक्चो गृहीत्वाग्नये स्वतन्त्रेनेनुब्रूह्यघ्निं वतन्तं यजेति प्रधानयागः। स्विष्टकृदादि संचरा।
भ्यक्षणपविद्वप्रतिपत्निवर्ज्जं भागपरिहरणांतं कृत्वा प्राकृतं कर्म क्रियते। उपवेषादानादिहस्वर्वेण नहास्याहक
दानं। प्रक्षाल्य तान्येव कपालान्युपधीयते। आज्यं निर्वपवेदृढं धाज्यानिर्वपवेद्र्बंधाज्याधिश्रयणवर्ज्जं आ
ज्याहार्याधिश्रयणं। स्योदक्याहारः। द्वितीयपुरोडाशपात्री वेनस्याः संमार्गः। अन्यानि संमर्शन्येव। संमार्ज
नापासनं। आरत यो वरेवजुहूपभृतो र्वं विहितमाज्यग्रहणं। उल्मुकोदूहनं। विभस्मीकरणादि ध्रुवाज्यस्था
स्त्रीवर्ज्जमालेभः। ध्रुवं धारः। स्रुगापनादि कर्मापिवर्गांतं। अग्ने व्रतभृतोग्नी वो मधोरुज्जितिं। अग्निव्रतभृदमि
रग्नीषोमौ तमपनुदंत्विति व्यूहनं। अमावास्यायां चेद्यथादैवतं। कणापायलभागावेक्षणभागप्राशनानि

देव.२५
॥८५॥

तं चेष्णा॥ अग्निमत्याद्धीधुनामप्यस्मिन्नवसरे एति तानामनेनप्रकारेणानुष्ठानं। आज्यग्रहणोत्तरकालं वि
मित्तपाते कर्मरचनापुनः क्रियाचेत्सत्रसूत्रे उक्ताहविरुद्वासनोत्तरकालं निमित्तपाते आग्निभ्यां कर्म
रचयो नाभिधास्यति। सात तो। विलोक्याधुरिनिधानानंतरं नैमित्तिकपाते कर्मरचना निधीयते। आहवनी
येन्ध्वाधानं। वाचस्पति प्रेषः। पात्रासादनं। स्फ्यो वज्रेरंशगणाः। पात्री धान्यं। पवित्रछेदनानि पवित्रछेद
नानि पवित्रे। प्रोक्षिः संयवनोदकं। प्रस्तरमात्रं बर्हिः परिधयः। विधृत्यौ। पुरोडाशपात्री। उपभृत। श्रुतावदा
नेच। श्रूप्याहानास्यं। तं कुकुटाहननेवज्रं। प्रोक्षणीरासादयबर्हिरुपसादयस्रुचं संमृड्ढीति प्रोक्षणीनां प्रस्त
रबर्हिश्चासादनं। तत्संबद्धपात्रसंमार्गो लौकिकेध्मैः प्रोक्षणीनामुत्पवनं। स्रुचेत्त्वेति प्रस्तरबर्हिषः प्रोक्ष
णं। परिधिपरिधानं। इध्मकाष्ठेन परिधिकपस्पर्शनं। नस्पृच पानुपस्पृशपयोराधनं। स्त्र्यैस्त्वेति जपः। वि
धृत्योत्तरणं। तत्रप्रस्तरस्तरणं। तदुपरि जुहूसादयति बर्हिर्ध्रुकपभृतं मंत्रेण विभस्मीकरणादिहविरालंभनं ॥८५॥
तं। आज्यस्थाली धृकवालंभवर्जं। जुहूपभृतो वाहायातु वाचनादि प्रधानयागं कुर्यात्। स्विष्टकृदादिभागपरिह

रथांतं।नसंचराभ्यक्षणं।व्यूहेनं।जुह्वा।भ्यक्षणं।परिव्यंजनं।स्रक्तवाक्प्रैषः।स्क्तवाकः।प्रस्तराहानं।विधृ
त्योःप्रक्षेपः।प्रस्तरांजनं।नीचैर्हरणं।तृणादानं।प्रस्तरप्रक्षेपः।तृणप्रक्षेपः।परिधिप्रक्षेपः।संस्रवाहुतिः।धुरिनिधानं
वेघाल्लेभनादिकर्मापवर्गांतं।प्राकृतंकर्मकुर्यात्।आश्वलायनब्राह्मणे।सर्वनैमित्तिकेष्टिविधानेप्रतिनिमित्तमाहु
तिंचाहवनीयेजुहुयादग्नयेव्रतपतयेस्वाहेत्यग्नयेव्रतभृतेस्वाहेतीत्याहुतिर्विकल्पेनविहितास्ति।तेनेष्टिकरणाश
क्तौ।सर्वनैमित्तिकेष्टिस्थानेअमुष्मैस्वाहेतिमंत्रेणपूर्णाहुतिहोमोविकल्पेनभवति।तथाआश्वलायनसूत्रे।आ
पिवाप्रायश्चित्तेष्टीनांस्थानेतस्यैतस्यैदेवतायैपूर्णाहुतिंजुहुयादिति।इष्टिकरणेशक्तौसत्यांपूर्णाहुतिहोमोन
कार्यः।उक्तंचकारिकायांइत्याहुत्योहुत्योविकल्पोत्रशक्त्यशक्तिव्यवस्थाया।मन्वादिभिर्यतःप्रोक्तमेवंतच्छृणुतांम
नः।प्रभुःप्रथमकल्पस्ययोनुकल्पेनवर्त्तते।नसांपारायिकंतस्यदुर्मतेर्विद्यतेफलमिति।आहवनीयादीनांलौकिक
वैदिकाग्निनासंसर्गेप्रायश्चित्तंनाद्रियेततेनाग्निसंसर्गेजातेयदियजमानस्यहृदयेत्रिसंसर्गनिमित्तंअसुखंनभ
वति।तदाप्रायश्चित्तस्यानादरः।हृदयासंतोषेआहवनीयादीनांलौकिकाग्निनासंसर्गेअग्नयेसंसर्गायाष्टाकपा

लः पुरोडाशो भवति। आहुतिर्वा इष्ट्यसंभवे। अग्नये संसर्गाय स्वाहेति। सकृद्गृहीतेनेति कारिकायां। आश्वलाय
नस्तूचात्पूर्णाहुतिर्युज्यते सर्वेषु निमित्तेषु। तत्राग्निसंसर्गकाल एवोद्धरणादि। संसर्गे द्व्यर्थसिस्फुद्धरणे। यहणो प्रोक्ष
णेनुवाचनेत्यागे वाग्नये संसर्गाय। प्राणदाने यजप्रैषे चाग्निसंसर्गो। अग्नेः संसर्गस्योज्जितिं। अग्निः संसर्गस्तमप
नुद्दतु। अन्वाहार्ये दक्षिणा। प्राशित्रादि सर्वं।। यदि आहवनीयगार्हपत्यदक्षिणाग्नीनां मिथः परस्परं संसर्गो भव
ति तदा यजमानस्य नदये असंतोषानावे अनादरः। तदयासंतोषे चाग्नये विचये ष्टाकपालः पुरोडाशः। अग्नये
विविचये स्वाहेति सकृद्गृहीताहुतः पूर्णाहुतिर्वा। तदुभयं संसर्गः। काल एव भवति। तत्र यहणो प्रोक्षणे अनुवा
चनेत्यागे चाग्नये विविचयो प्राणदाने यजप्रैष चाग्निं विविचि। अग्नये विविचेरेति जुह्वा व्यूहने। आग्निं विवि
क्तमयनुदत्विस्फपभ्रतः। अन्वाहार्ये दक्षिणा। यदि दवाग्निना गार्हपत्यादीनां संसर्गो भवति। तदा पित्तदयासं
तोषाभावे प्रायश्चित्तस्याभावे नादरः। तदयो संतोषे तु अग्नये संवर्गायाष्टाकपालः पुरोडाशोन्वन्वाधाना
दि ब्रह्मणतर्पणांतः। इष्ट्यशक्तौ अग्नये संवर्गाय स्वाहेत्याहुतिभिः सकृद्गृहीतेन भवति पूर्णाहुतिर्वा। एत

द्वयं संसर्गकालात्पूर्णाने अष्टौ ग्रहणे प्रोक्षणेनुवाचनत्यागे चाग्नये संवर्गाय। प्राणदाने यजमाने चाग्निं संवर्ग। अ
ग्नेः संवर्गस्योज्जितिं। अग्निः संवर्गस्तमपनुदत्विति। अन्वाहार्यो दक्षिणा। प्राशित्रादि सर्वं। अपडचकावके विशेषः। यस्या
ग्निमयहरेयुरग्नौ वान्यं याजये दन्यस्य वाग्निषु युज्येत्याग्नये संवर्गायाष्टाकपालमिति। यदि विधन्तसंबंधिनाग्निनाआ
हवनीयादीनां संसर्गस्तदापि यजमानस्य तद्द्रव्या संतोषाभावेनाहरः। तद्विल्लेषे वाग्नये प्सुमते शकपालः पुरोडाशः
इध्मशक्तौ आग्नये प्सुमते स्वाहेति मंत्रेण स्रुवेण ह्रीनाहू वर्णाहुतिर्वा। तत्रेष्टिपक्षे अग्नये प्सुमतइति ग्रहणप्रोक्षणानु
वाचनत्यागेषु। अग्निमप्सुमते ति प्राणदान यजमानेषयोः॥ अग्नेरप्सुमतउज्जितत। इति जुह्वाव्यूहने॥ अग्निरप्सुमा
नित्स्फपन्दतः अन्वाहार्यो दक्षिणा। प्राशित्रादि सर्वं॥ अशुचि श्वांडालादेः स्त्रानानअग्न तेनाग्निना गार्हपत्यादीनां
संसर्गो भवति। तदाग्नये शुचये ष्टाकपालः पुरोडाशो भवति इध्मशक्त्या वाग्नये शुचये स्वाहेति स्रुवेण ह्रीनाहुतिः प
र्णाहुतिर्वा। अत्र प्रायश्चित्तस्यानादरो न भवति। एतावपठितत्वात्॥ आत्रेयधाकुंत्योर्मध्ये अग्निहोत्राणि न आ
कुर्निइतरस्येष्टिरिति व्यवस्थितो विकल्प इति वासुदेवः॥ तत्रेष्टिपक्षे। अग्नये शुचय इति ग्रहणप्रोक्षणानुवाचन

देव०२५
॥५७॥

स्यागेषु। अग्निंशुचिमित्यंजनयजप्रैषयोः अग्नेःशुचेरूर्ज्जितिं। अग्निःशुचिंस्तमपनुदत्त्विति। अन्वाहार्योदक्षि
णा। प्राशित्रादिसर्वं। संसर्गकाल एवानुष्ठानं। स्वासु भार्यासु स्वाभागेषु वा युग्मजनने मारुतं त्रयोदशकपा
लं पुरोडाशं निर्वपेत्॥ भार्यायाः शुद्धो यजनीयेहनि श्राद्धं न्वारंभणीयापूर्वकं॥ भार्यागोष्विति बहुवचनं दासी
वडवाहीनामुपलक्षणार्थं॥ यस्य भार्यागौर्दासीमहिषिवडवाविकृतं प्रसवेदित्यादिषु दर्शनादिति कामुदेवयाज्ञि
काः। तत्रेष्टौ विशेषः। मरुद्भ्य इति ग्रहणप्रास्वणानुवाचनत्यागेषु मरुत इत्यंजनेयजप्रैषेच मरुतामिति जुह्वा
व्यूहेव्यूहने। मरुतस्तमपनुदन्त्वित्युपस्थतः। अन्वाहार्योदक्षिणा। चतुर्द्धाकरणवर्जंप्राशित्रादिसर्वं। अत्रशावप
रिभाषासाम्यादैंद्राग्नस्य धर्माःउभौहि अक्षराविति। कपालोपधाने च क्षाद्दक्षिणतः षट्। उत्तरतश्चत्वारिमध्ये
त्रीणीति। यजमानस्य निवासगृहदाहे अग्निगृहदाहे वाग्नयेक्षामवते ष्टाकपालं उद्धरणादिकर्मपवर्गांताय
जनीयेहनि भवति। न तत्काले। लौकाग्निस्तत्रे। अग्न्यगारे चान्येषु चाग्नयेक्षामायाष्टाकपालं निर्वपेदिति। तत्र
विशेषः। अग्नये क्षामवत इति ग्रहणप्रोक्षणानुवाचनत्यागेषु। अग्निं क्षामवंतमित्यंजनयजप्रैषयोः। अग्नेः क्षा

मी
॥५७॥

मवास्तमनुहरेदिति। अन्वाहार्योदक्षिणा। प्राशित्रादि सर्वं। आश्वलायनब्राह्मणे। यदिपवित्रेनष्टेपत्कानत्रपाय
श्चित्तिरिति सोऽग्नये पवित्रवते ष्टाकपालं पुरोडाशं निर्वपेदाहुतिं वा जुहुयादग्नये पवित्रवते स्वाहेति। यदि हिरं
ण्यनाशः स्यात्। तिसोऽग्नये हिरण्यवतोऽष्टाक० पेतस्य याज्यापुरोनुवाक्ये हिरण्यकेशो रजसो विसार आतेसुप
र्णा अमिनन्तं एवैरित्याहुतिं वाहवनीये जुहुयादग्नये हिरण्यवते स्वाहेति। आहिताग्निर्यस्तुतन्त्वे प्राश्नीयात्का० ति
सोऽग्नये तन्तुमते ष्टा० पेतस्य याज्यानुवाक्ये तन्तुं तन्वन्नरजा० अन्वानहोनत्यतनोतसोम्या इत्याहुतिं वा जुहुयादि
ति। आहिताग्निर्यदि प्रातरस्नातोऽग्निहोत्रं जुहुयात्सोऽग्नये वरुणाय ष्टा० येतस्य याज्यानुवाक्ये त्वेन्नो अग्ने व
रुणस्य विद्वान् स तन्नो अग्ने व० नीत्याहुतिं चाय आहिताग्निर्विछिद्येत कातच० सोऽग्नये तन्तुमते ष्टा० पेतस्य या
ज्यानुवाक्ये तन्तुं तन्वन्व्रज० कोमाहृदर्शकमेतेः सदेव इत्याहुतिं वाय आहिताग्निर्जरिवेमृतशाद्वश्कत्वा कात० त्वो
ग्नयेसुरभिमते ष्टा० पेतस्य याज्यानुवाक्ये अग्निर्होतान्यं सीद धञ्जीयसा धीमकर्देववीतिनो अग्नयेत्याहुतिं चा
हवनीये जुहुयादिति। अथ नैमित्तिके षू योऽग्निहोत्रे चरुर्होमास्यांग स्मृतास्वा मिति प्रोषितेऽपि कार्यः अन्यांस्तु यम

दैव०२५

॥४२॥

जनने ष्टिग्रहस्य हेष्वाहृयो नंगभूताः स्वांम्यागमनपर्यंतमुक्त ष्टव्याः। तथाच निकोडमेड्नः। नैमितिकास्तु
जाते ष्टिग्रहस्य हेष्टिपूर्वकाः। स्वाम्यागमनपर्यंतमुक्तष्टव्यान्यद्धेशे पदृइति। अथ न्योन्मा चतुर्दश्यां दर्शस्यपर्वमुहूर्ते
णाक्रप० क्रमे कृते प्रातरमावास्यायामनुदिते सान्नाय्यसहितं हविर्भिष्ट्युपक्रमे कृते तदानीं चतुर्दशीसन्दावास्तु
रश्चंद्रोदये जाते प्राक् हविर्निर्वपात्। कातत्र प्रायश्चित्तमुच्यते॥ चंद्रमसो भ्युदितइत्यकालोपलक्षणं। चंद्रद
र्शनस्यैतत्प्रायिकत्वात्॥ तत्र एवं हविर्ग्रहणात् प्राक् अकालोपक्रमं ज्ञात्वा ततः प्राकृतानां पदार्थानामामादि
तानां पात्राणां नोत्सर्गः। वत्सापवरणादिः पुनर्विधानात्। पिंडपितृयज्ञात्प्राक् अकालोपक्रांते ज्ञायमेतदा चतु
र्दश्यामुपोष्यामावास्यायां पिंडपितृयज्ञः श्रौतादिकं कुर्यात्। तस्मूर्वेद्युः सायंदोहसंबंधिदध्युत्पादितेन तत्प्र
धकरिष्यमाणस्य सायंदोहस्यातंचनार्थं स्थापयेत्। येन पूर्वेद्युः प्रातर्दोहार्थं वत्साअपाकृताः स्तांस्तत्र
मातृभिः संयोज्य अपराह्णे सायंदोहार्थं वत्सापाकरणं कुर्यात्॥ यजमानश्चलंघनं करोति पूर्वेद्युरेकेन कृतव्रतेनै ॥४
वतिष्ठति। अपक्षे तु पिंडपितृयज्ञं पुनः कुर्यात्॥ तस्य पूर्वेद्युरकाले कृतरूपत्वात्। तयोर्व्यवस्था इति कारिका

रिकायां। पिंडपितृयज्ञः ततः सायंदोहार्थवत्सापाकरणं॥ रात्रौ पवाग्वाग्निहोत्रहोमः॥ ततः उपस्थशादिपरिस्ता
लनांतः सायंदोहः सर्वदिनकृतदोहेनातंचनं। अपिधानं सुगुप्तेदेशे रक्षणं। ततः प्रातर्दोहार्थवत्सापाकरणं। अ
रिते ब्रह्मवरणादिकर्मापवर्गांता। अमावास्येष्टिं कुर्यात्। अथ विनिर्वापानंतरं मकालोपक्रमत्वाने विशेष उ
च्यते। तत्र आग्नेयपुरोडाशार्थं गृहीतस्य चतुर्मुष्टीकस्य तंदुलान्मध्यमस्थूलसूक्ष्मभेदेन त्रिधा विभज्य मध्यमानां
तंतंदुलानामिदमग्नेर्जुष्टं तु रिति निर्देशः। स्थूलानां तंदुलानामिदं स्यपदातु रिति निर्देशः। अतिसूक्ष्माणां तंदुला
नामिदं विष्णो शिपिविष्टस्येति। ततः प्रत्येकं प्रोक्ष्यति। तत्र मध्यमानां तंदुलानामग्नये दात्रे ष्टाकपालं पु
रोडाशं श्रपयेत्। स्थूलानां सायंदोहदधनि चरुं श्रपयेत्। सूक्ष्माणां तंदुलान् प्रातर्दोहार्थे दुग्धे चरुं कुर्यात्॥ नि
र्वापात् प्राक् यदा चंद्रोदयं परिज्ञानं भवति यजमानस्य लंघनकल्पो ज्ञाक्तिश्चेत्तदा एताभ्यो वेकेतीभ्यो देवताभ्यो ह
विर्ग्रहणं कुर्यात्। तदा पात्रासादने विशेषः। कपालान्यष्टौ। चरुस्थाली द्वयं। एका पुरोडाशपात्री। उपसर्जनी च।

देव॰२१ यं॥ शेषं प्रकृतिवत्। अग्नये दात्रे जुष्टं। इंद्राय प्रदात्रे जुष्टं। विष्णवे शिपिविष्टायेति जुष्टमिति। चतुर्मुष्टिकानां त्र

॥४८॥ याणां ग्रहणं। प्रोक्षणे त्वा जुष्टं। कंडनेऽमध्यमापिष्टस्थविष्टविभागेन त्रिधा कृत्वा यथोक्तानिर्देशादि सर्वं त्री

णि हवींषि कुर्यात्। स्वावसरे होमः। उपसर्जन्यानयेन समापइति पुरोडाशे। संहृत्यौषधीरिति स्थूलतंदुलं चारौ।

संवपयत्यणि घृते दुलचरौ। प्राणदाने। अग्निं दातारं गच्छ। इंद्रं प्रदातारं गच्छ। विष्णुं शिपिविष्टं गच्छ। उत्तमप्रया

जे। समग्नये सोमाग्नये दात्रे इंद्राय प्रदात्रे विष्णवे शिपिविष्टाय देवेभ्य आज्यपेभ्यः। अग्नये दात्रेनुब्रूहि इदं दाता

रं यज। इदमग्नये दात्रे इंद्राय प्रदात्रेनुब्रूहि इंद्रं प्रदातारं यज। इदमिंद्राय प्रदात्रे विष्णवे शिपिविष्ट। वे शिपिविष्टायानुब्रू

हि। विष्णुं शिपिविष्टं यज। इदं विष्णवे शिपिविष्टाय। अग्ने दातुरिंद्रस्य प्रदातुर्विष्णोः शिपिविष्टस्याजितिं। अग्निर्दातेंद्रः प्र

दा विष्णुः शिपिविष्टस्तमपनुदतु। अन्वाहार्ये दक्षिणा। प्राशित्रादि। आदि सर्वं। अन्यत्सर्वं प्रकृतिवत्। असान्नाय्यव

त्स्वपि दर्शपुरस्तात् स्फ्यदयज्ञानं। चतुर्होतुः स्फ्यदयनिमित्तेन दधिचरुं यप त्रिचरुमिति विधानात् तु किं के दधिपय ४८

सौम्ये गृहीत्वोपसर्जनीत्रयं कृत्वा सर्ववत्सर्वमेवानुष्ठीयते॥ इति वासुदेव गदाधरकारिकायां उदकेनैव स्वचरुकार्यं

विनिशास्त्रदीपिकायां ।सहस्रपयतीति च वचनं च कल्ये स्यार्थसिद्धस्यानुवादाद्विधीयमानत्वादसंनयतश्च दधि
पयसोरभावेन सहश्रपणाभावाच्च ।णीताभिः पुरोडाशो कार्यो विनितं चरत्नो ।एवमष्टकदपेष्टिं कृत्वा स्वकालेउ
द्धरणादि कर्मापवर्गांतमामावास्यं कुर्यात् ॥ ॥ यदा च एकस्यां मुष्टौ प्राकृतीभ्यो निरुप्तायां द्वयो वा मुष्ट्योः प्रा
कृतीभ्यो निरुप्तयोः श्वंड्डोदयतानेन हाञ्च वशिष्टे मुष्टिश्चयं द्वयं वा कृत्स्नामेव निर्वपेत् ।ततो विभज्य त्रिहि
रूपय याद्देवतं प्रेक्षेत् ।प्राकृतीभ्यो निरुप्तयोः क्षपणाभ्याकृ चंड्डोदय परिज्ञाने ।तदापि ष्टानामेव त्रिधा विभागं कृ
त्वा पूर्ववत्प्रक्रिया ।श्रृतेवै पुरोडाशोग्नेर्हातु रथीष्टस्य प्रदातुः पयो विष्णोः शिपिविष्टस्येति संप्रदायकारिकयोः
।तंडुलादीनां त्रिधा विभागपक्षे यथा देवनिर्देशः ॥ यदा पुरोडाशस्याधिश्रयणं ।प्राकृ चंड्डोदयस्तदानादृश
मेव पुरोडाशं त्रेधा विभज्य द्वौ भागौ दधिपयोभ्यां पृथक्कृत्य श्रपयेत् ।एकेन भागेन पुरोडाशं कुर्यात् ।श्रृतं चे
ज्ञानं तदा तादृशस्यैव ॥ द्वौ भागौ दधिपयसोः प्रक्षेप्तव्यौः तृतीयः पुरोडाशः कार्यः ।प्राणदानानि वैकृतीभ्य इति
याज्ञिकाः ।कस्यांचित् छाखायां श्रृतस्य विभागात्संः ॥ नवात्मा यश्चित्तं हुत्वा समाप्य पुनः क्रियेते ।शांखाय

दे०व०२५
॥९०॥

नभाष्ये॥ ॥अथ यागोत्तरकालं यस्मिन् पदार्थे कृते चेद्धोदयस्तानं॥ तदाध्वर्यवसर्वकर्मोपसमापयेत्। समाप्ते कर्मणि
यदास्तानं तदाध्वर्यवं हुत्वा पुनरिष्ट्या यागक्रिया। तथा च कारिकायां। यागोत्तरं परिज्ञाते चेद्धृदयः क्रिया पुनः। अकाले
यत्कृतं कर्म विधिशौचविवर्जितं। अकृतं तद्धि नातीयात्पुनरिज्या श्रुतेर्बलादिति। सर्वपक्षेषु दर्शेष्टेः पुनः क्रिया भव
त्येव। अथ यदि वतोऽस्यादयोपवसेदिति श्रुतेः। तथा च शांखायनः॥ कर्मलेचामावास्यामिति। तथा च। एवं
हि कर्माणि कृतान्यकाले कार्याणि नित्यानि पुनः स्वकाले। कालो हि तेषां करणे निमित्तं यतः श्रुतौ यत्तपथा
दृपायः तथा शांखायनतरे। अनस्तमिते वेदग्निहोत्रं जुहुयात्ध्रुव इत्यपस्थाय पुनरस्तमिते जुहुयाद् कृशायांचे
त्पुनर्व्युष्टायामिति। तथा चापस्तंबः॥ यदि प्रागस्तमयाज्जुहुयात्पुनरेवास्तमिते हुत्वा भवंतं नः समनसा
विस्फपतिष्ठेत यदि मरिमन दिमहारात्रे पुनरेवौषसं हुत्वेतयैवोपतिष्ठेतेति। वचनेनोकालेपि कर्माणि क्रियंते
यथोदवसानीयांते सायमाहुतिः समुद्रोश्विप्रातराहुतिरामावास्यं चातथापष्ठ्योहोमादि वचनं। विनाकाले
कृतस्य पुनः क्रियैव। पुनः क्रियायां च शांखायानसूत्रे। पिंडपितृयज्ञस्याप्रवृत्तिर्निषिद्धा। नाम्यावृत्तेः पिंडपितृ

॥९०॥

यज्ञस्यास्तीति॥ इति श्रौतस्याचतुर्दशामुद्धरणादिदर्शारंभे प्रायश्चित्तं। अथ श्रौतस्यामतिपक्वुद्धरणादिदर्शकर्म
प्रारंभे प्रायश्चित्तमुच्यते। श्रौतस्यामतिपक्वुद्धरणादिदर्शकर्मप्रारंभे प्रायश्चित्तमुच्यते। श्रौतस्यामतिपक्वुद्धरणा
न्वारंभाधानादिदर्शेष्ट्युपक्रमे कृते तस्मिन्नेवाहनि पिंडपितृयज्ञवर्जितां सद्य एव दर्शेष्टिं समाप्य तस्मिन्नेव दि
ने द्वितीयादिनादिने त्रिहविष्कामिष्टिं कुर्यात्। तत्र अग्नये पथिकृते ष्टाकपालः प्रथमं हविः इंद्राय वृत्रघ्न एका
दशकपालो द्वितीयं अग्नये वैश्वानराय द्वादशकपालस्तृतीयं। एतादेवता उपांशु यजेत्। अत्रोद्धरणादि
ब्राह्मणतर्पणांते विशेषः। अस्मरदृष्टेष्वर्थमित्युद्धरणे। अकरदृष्टेष्याहमिति वरणे। पात्रासादने। एकत्रिंवा
त्कपालानि त्रिभिरिषुनिषुक्तिं धनुर्दक्षिणा। अथवा वंशमयो दंडः। इत्थं पापथिकृतः शतमाने। इंद्रस्य वृत्र
घ्नो वामा भोन्वाहार्यः। वैश्वानरस्य कृत्स्नं वासः। पुरोडाशपात्र्यप्तिः स्वः शिष्टं प्राकृते। अग्नये पथिकृते चेंद्रा
य वृत्रघ्ने अग्नये वैश्वानरायेति ग्रहणमोक्षणानुवाचनत्यागेषु॥ इदमग्नये पथिकृत इदमिंद्रस्य वृत्रघ्नः इदमग्ने
वैश्वानरस्येति विभज्यालंभे। अग्निं पथिकृतमिंद्रं वृत्रहणं अग्निं वैश्वानरमिति प्राणदानयजमाने पयोः। अ

देव० २९
॥५३॥

ग्नेः पथिकृत इंद्रस्य वृत्रघ्नो ग्नेर्वैश्वानरस्येति। अग्निः पथिकृदिंद्रो वृत्रहाग्निर्वैश्वानरस्तमपनुदत्विति। इदमग्न
ये सोमायाग्नये पथिकृत इंद्राय वृत्रघ्ने ग्नये वैश्वानराय देवेभ्य इत्युत्तरमप्रयाजप्रस्तारहोमयोस्त्यागाः। चतुर्हस्तंध
नुः। दंडो पि चतुर्हस्तोपि कारिकायां। वीर्युकं धनुरसीति अथवा दंडोसीति। प्राकृतदक्षिणापक्षे प्रतिद्रव्यं सकलस्य
प्रजापतेर्भागोसीत्यस्य मंत्रस्यावृत्तिरिति दिक्षितगदाधरः। तत्र धनुषो वा दंडस्य वा त्रयाणां हविषां समस्तेव न
निमित्तकेनापि यजमानीये हत्वारंभणी एं० विकामिमां चिह हविषां यथोक्तामिष्टिं कुर्यात्। अथ पक्षे यदि अग्न्योत्या
चतुर्दश्यां पौर्णमासेष्टेरग्न्यन्वाधानादिके कृते तथा तोयस्य दार्श्यां वसरे न्वंग्न्योत्सोपक्रमो जायते तदाधुर्यं वहुत्वाद्दुत्त
रकालीनं पदार्थमारभ्यस्वकाले क्रियते। व्रते कृते च ते पुनर्न व्रतपतिय वकृतं चेच्चतुर्दशीमुपोष्यस्वकाले
व्रतपति सद्यः पाकस्य पि यदि पौर्णमास्यां कर्मारभ्यते तदा अध्वर्युं वंहुत्वा योप्यकृतादन्यत्प्रतिपदि क्रियते। अथ
अहपक्षेय दि पौर्णमास्यामज्ञातायां न्वंग्न्योत्सा प्रतिपद्युपक्रमं कुर्यात्तदाध्वर्युं वहुत्वा प्रतिपद्येव कर्मशेषं कुर्यात्
। द्वितीयायां चेज्ज्ञातं तत्र यस्य दार्शस्य मये न्वंग्न्योत्सोपक्रमस्तानमुत्सृज्य अन्ते दैवाध्वर्युं वहुत्वा कर्मशेषं समापयेत्।

प्रा०प्र०
॥५२॥

समासेतुत्वाते विस्नोः स्मरणामेवेति गदाधरः उद्वास्यमानकपालनाशे अश्विनोर्द्विकपालः पुरोडाशः सोऽतिपातिः
केरंगैर्युक्तः पशुपुरोडाशवत्कर्त्तव्यः । तत्र कपालोद्वासनांते आहवनीयेन्वाधानं ।। पात्रासादने स्यवर्जं दशागणः स्वे
कपाले अर्थवतीपात्रीधान्यं दृष्टिः संयवनोदकं । पुरोडाशपात्री । चेति । शूर्पादानाद्यासादनांतं ।। अश्विभ्यां जुष्टं ।।
सर्वाभ्यो पवित्राभ्यां प्रोक्षणीः संस्कृत्याश्विभ्यां त्वेति हविःप्रोक्षणं । पात्रप्रोक्षणं । कृष्णाजिनादानादिकर्णांते कुक्कुटा
हननवर्जं । कपालोपधानं । मध्यमकपालधर्मेण प्रथमं । मध्यादि द्वितीयं । तप्त सालव्येषामिति सुहृहनं । उपसर्ज
न्यधिश्रयणं । कृष्णाजिनादानाद्यास्योरकहानांते । पुरोडाशपात्रीसंमार्गः । विभस्मीकरणादि कपालोद्वासनां
ते । अश्विनो गच्छ । आज्यस्थालीपूर्वकमासादनं । स्थाल्याज्यस्य ध्रौवाज्यस्याभिमन्यचाल्लभः । आत्मालेभः । उद
कल्लेभः ।। अकृते चेदत्र व्रतग्रहणं । होतृषदनकरणं । सामिधेनीप्रैषः । प्रकृतकर्मविहितसंख्याः सामिधेन्यः आ
हवनीयवाजनं । संमार्गप्रैषः । अग्निं संमार्गः । होतृवरणं । जोहवमाज्यं पात्रांतरे प्रक्षिप्य मंत्रेण वस्कचोदानं । अ
श्विभ्यां अनुब्रूहि । अश्विनोर्यज । इदमश्विभ्यां । स्विष्टकृत्प्रभृति भागपरिहरणांते संचराभ्यक्षणं । विशेषेत्र प्रतिप

देव०२५
॥५२॥

त्रिवर्जं। ततः प्राकरणिकहविरासादनं जुहूमुपभृतं च सर्वमालभ्य हविषामालंभनं सर्वाधारः। निह्नवः मंत्रेण स्रुचो
रोहणं। उत्तराधारः। ध्रुवायांजनं स्रुग्रहणं प्रयाजादिकर्मापवर्गांतं। स्रुहनेऽग्निनोरग्नेरित्यादिनुहुताः। अग्निनावग्निरिति
घृपभृतः कण्वायासनभागावेक्षणभागप्राशनानि तंत्रेण। अग्निनस्यकरणाज्ञान्कावग्निभ्यां स्वाहेत्यनेनाहव
नीये सुवर्णाहुतिं जुहुयात्। यदि कपालं नश्यत्कातत्र प्रायश्चित्तिरिति सोमेऽग्निभ्यां द्विकपालं पुरोडाशं निर्वपेत्तस्य
याज्यानुवाक्ये अग्निनावग्निरस्यहा गोमनानासत्यास्त्विनेत्स्वाहुतिवाहनी यजुहुताहर अग्निभ्यां स्वाहेति। अत्र खला
पनं ब्राह्मणे श्रुतत्वात्। तथा च मंडनः। प्रायश्चित्तेष्व्यासंप्रासौ कुर्यात्स्वर्णाहुतिं बुध इति एवमन्यासामपीष्टी
नामास्मिन्नवसरे पतिता नाम तद्दानं ज्ञेयं। आपस्तंबः। यदि कपालं भिद्येत गायत्र्याशतानाक्षरयासंदधामीतित
शंधा परिगार्हपत्ये धार्यमाणमभिजुहुयात्मनो ज्योतिर्जुषतामित्य   तदपोर्त्रेऽभ्यहवरे इति अन्तो धर्मो जारदा
तुरित्यपत्यायन्तं स्कृत्य कपालेषु पितृजे चयस्त्रिंशतं तेयेइति यदि भागधानाद्विद्येत यदुपहितानामेतेनै
व मंत्रेणान्यदुपदध्याद्य   वामंत्र स्थाने भिद्येत यदि प्रयुक्तानां प्रागर्थकर्मणः कर्मान्तरे पेशाच्छिने द्विकपालं

निर्वप्ये द्यावापृथिवीयमेककपालं भार्गवो होता भवस्येकहोयनोर्दक्षिणा मही द्यौरिति द्यावापृथिव्यां यवांस्क
वाहुतिं संत्रस्य स्थाने चरुस्थाली । अर्यवतिर्दक्षिणां तद्दानकटहूणपात्रकर्मापवर्गसमिधामभावः । अन्यत्स
र्वमासाधते चरुश्वेदपवेषवर्जं । शूर्पादानादिग्रहणो विशेषः । यथाशरावमात्रपात्रे प्रणचतुर्वारिं ग्रहणं । तदुक्तं
कारिकायां । वृत्तं प्रादेशमात्रं तु शरावं निगमोदितं । तत्प्रादप्रमाणेन पात्रेण ग्रहणं भवेदिति । इंद्राय जुष्टं पवित्र
करणादि पात्रप्रोक्षणांतं । कुक्कुटाहननं वर्ज्यं । कृष्णाजिनादानादेकरणांतेकंडनं । पेषणे पधाने पुरोडाशपक्षे ।
आज्यनिर्वापो वेदवंधः । उपसर्जन्यधिश्रयणं । सपवित्रायां पात्र्यां संवापः । कोरुपसर्जन्यानयनाघालंभनांते वि
शेषः । संयवनप्रथना । ह्विरभिमर्शनास्योदकोनिनयनाभावः । पुरोडाशाय सेपाअंगुलिप्रक्षालनस्य स्थापनं । ना
न्वाहार्याधिश्रयणं । वेदिमानादिप्रोक्षणं प्रोक्षणांतं । नस्पस्पोरकप्रहारः । पाण्योरवनेजनादि अन्यतरावे । क्षणां
ते संमार्जनस्थापनं । ध्रुवायामेव चतुर्गृहीतग्रहणं । इध्मप्रोक्षणमाहवनीयकल्पनांतं । नस्पयोदकप्रहारः ।
पाण्योरवनेजनादि अन्यतरावे । क्षणांतं । संमार्जनस्थापनं । ध्रुवायामेव चतुर्गृहीतग्रहणं । इध्मप्रोक्षणमा

दिव॰२५
।५३॥

हवनीयकल्पनांते। नोल्मुकोद्वहनं। परिधिपरिधानादिप्रस्तरपिधानांते। अग्निर्जुहोर्न्नो। न्नतिजुह्वा आसादनं। अ
स्कपभ्रन्लाग्लेस्फपभ्रनः। ध्रुवाच्छा मिश्रक्ष्वेति ध्रुवायाः। विभस्मीकरणाद्यान्ताल्लेभनांते। होतृसदनं कर्मणा मा
हवनीयोपवाजनांते। न ह्रुर्वाधारः। नप्रैषो ग्निसंमार्ग्यः। नाजलिकरणोत्तराधारे होतृवरणं। न स्रुग्गादापतनं
याज्याज्यभागाः। जुहूपभृतोः वाहायेद्राये नु ब्रूहि इदं द्वयजे ति प्रधानयागाः। ततः स्विष्टकृदादिभागपरिहरणां
ते। ततः पुनर्वत्सापाकरणं। कृत्वा पूर्ववद्दोहं कृत्वा बहुले न लौकिकेन दध्यान्आतंच पञ्छापयेत्। स्वकाले दर्शेष्टेः
प्रारंभं कुर्यात्। अदृष्टार्थत्वपक्षे अन्तप्रणीताप्रणयनं। गार्हपत्यदक्षिणाग्नौ परिस्तरणं। पात्रासादने स्फ्यवर्जि
तोदृशगणः। अर्थवति पात्रे हासधान्यं। दृष्टिसंयवनोदकं। दक्षिणाग्निप्राशित्रहरणे। भ्रतावदानं। पुरोडाशपा॰ अंतर्द्धा
नकरः। पूर्णपात्रं कर्मापवर्गोवित्यैतान्यासादनं स्फ्योपहितपात्रीकरणादिग्रहणं यथादेवतं सादनांते। पवित्रे सत्व
वा प्रोक्षणी संस्कारे कृत्वा हविः प्रोक्षणं। पात्राणां प्रोक्षणं। प्रोक्षणीनिर्झोप्य प्रणीतासु पवित्रकरणं। कृष्णाजिनादा
नादिपेषणांते। आज्यवेदीविघनं। प्रातर्दोहकरणादिसर्वेण महाप्लोदकदानांते। अन्वाहार्याधिश्रयणं। स्फ्योदक्ष

हरणं। वेदिमानाद्यतिन्यूनत्वे लक्षणं तत्कृतं। प्राशित्रहरणभ्रंशावदानपुरोडाशपात्रीणां संमार्गः। अथ संमार्जनप्र
तिपत्तिः। आसादितयोरेव जुहूपभृतोराज्यग्रहणं। उलूकोद्वहने। विभस्मीकरणाध्वासाद्य। नांतं। आज्यस्थाली
ध्रुवावर्जितामालंभः। नाप्याज्यकालेभवः। ऊर्ध्ववधारः। अंजलिकरणं। उत्तरधारः। स्कन्नादापनादिधारानुयाजां
ते। इदमस्याग्नेरग्नीषोमयोरिंद्रस्येति। इंद्राग्नीषोमाविद्धकामपनुदत्विध्रुहने। करणासने भागावेक्षणप्रा
शनापितं वेदेण। अथ पुत्रंस्त्र वर्मकृतिवत्। एवं प्रातर्दोहविनाशेपियस्मिन्नदार्थेज्ञाते विनाशो जायतेतदैवयथासंभ
वेपदार्थसंयुक्ते पंचशरावयागं परिहरणं तत्कृत्वा ततो वत्सापकरणादि प्रातर्दोहपरिस्थालनांतं कृत्वा ततः
स्थितादुत्तरकर्म कर्तव्यं। क्षीरावदानग्रहणानंतरं दध्यार्तिरूपजायने चेत्। क्षीरेणयागंकृत्वा नैमित्तिकः।
पंचशरावोग्न्यंथव्वाधानादिभागपरिहरणांतः कर्तव्यः। ततः सान्नाय्यवदत्याध्वते यागं कृत्वा ततः। स्विष्ट
कृदादिमाकृतं कर्म कुर्यात्। पंचशरावस्यपकरणासंभवे स्वाहेति जुहयादिंद्रायस्वाहेति। एवं सत्यादाचपिदे
हानां वित्तशेष्ठपररात्रे सात्रेरत्यत्वेन पंचशरावयागकरणासंभवेपि द्वेये। यस्याया विनाशोवितस्याः प

योविकारत्वात्पंचशरावो भवति। एकस्मिन्काले ऽनेकदोहविनाशेच। एक एकपंचशरावो भवति ने प्रतिदोहं। अ
भयोविनाशेप्येकस्यैव विधानात्। तथा च सूत्रांतरे। बहूनपि समानजातीयास्तेषां सकृत्कृतमेव विभवेदिति।
आश्वलायनशाखेणे विशेषः। नष्टाहुर्यस्य सायंदुग्धं सान्नाय्यं दुष्येद्वापहरेद्वापहरेद्वा कातत्र प्रायश्चित्तिरिति
मातदुग्धं दैवं कृत्वा तस्यान्यतरां भक्तिमातंचतेन यजेत सातत्र प्रायश्चित्तिस्तद्धाहुर्यस्य प्रातर्दुग्धं सान्नाय्यं
दुष्येद्वापहरेद्वा कातत्र प्रायश्चित्तिरित्यैंद्रं माहेंद्रं वा पुरोडाशं तस्य स्थाने निरूप्य तेन यजेत सातत्र प्रायश्चि
त्तिस्तद्धाहुर्यस्य सर्वमेव सान्नाय्यं दुष्येद्वापहरेद्वा कातत्र प्रायश्चित्तिरित्यैंद्रं माहेंद्रं वेति समाने सातत्र प्रायश्चि
त्तिरिति।। आत्रमानवो यदि वेत्साअपाकृता धयेयुर्वायव्याय वाग्वा प्रचर्य प्रातर्दोहेन प्रचरेद्यदि प्रातर्दोहे परे वा
यव्यापदि सायंदोहमपहरेद्दुष्येद्वा प्रातर्दोहं द्वैधं दोहयित्वा हूयमानं व्य प्रचरेद्यदि सायेह आर्तिं नायादिंद्राय व्रीही
न्निर्वापयद्यदि प्रातर्दोहे ऐंद्रं पुरोडाशं यत्कमावेंद्रं पंचशरावमोदनं पचेदाज्येनाग्निं प्रथमं यजेदिति। ते एवार्तिं गते
षु वत्सानपाकृत्य पुनर्यजते ति। सान्नाय्यं यदि प्येयुश्चैद्वत्सा वायव्याय वाग्वा सायंना प्ये कस्यां धीनायाम

धीतदोहयेदधीनाभिः समाप्यधीतातांवत्सानाच्छत्यत्वः। सान्नाय्येनयजेत सायंदोहं चेदपहरेयुः प्रात
र्दोहं द्वैधं कृत्वान्यतरत्सायंदोहस्थाने कृत्वोभाभ्यां यजेत् प्रातर्दोहं चेदहरेयुः सायंदोहं द्वैधं कृत्वान्यतरत्प्रात
र्दोहस्थाने कृत्वोभाभ्यां यजेतोभौ चेदुष्येयातां सिद्धं पंचशरावमोदनं निरूप्याग्नेयेन प्रचर्यैन्द्रेणानुप्रचरेदु
त्तरासु पौष्णं। चोष्यं चोभाभ्यां यजेतेति। काठके। सान्नाय्यपक्षे तामधीतां सुवायव्यांयवागूं [illegible] अमावास्येनय
जेतोभयीषु धीतासु [illegible] मावास्येन यजेतानिंगते सायंदोहं प्रायश्चित्ति व्रीहीणां निरूप्योपंचशरावं [illegible] पुरोडाशस्तस्य
पयसा समवदाय प्रचरेत् [illegible] अमावास्येन यजेतानिंगते प्रातर्दोहे ऐंद्रं पुरोडाशं तस्य दध्ना समवदाय प्रचरेत् [illegible] आ
मावास्येन यजेताभयोरानिंगतयोरोदनं पंचशरावं निर्वपेदग्निं देवतानां प्रथमं यजेदर्प्यैंद्रं [illegible] आमावा
स्येन यजेत सान्नाय्ये कारावपनं महीद्यौरिति मध्यमपर्णेनांतः परिधिनिनयेदाज्येन वा वासंस्थापयेदसं
स्कृतेन सान्नाय्येन केइति एवमेवापस्तंब सूत्रेपि विधते। इति सायंप्रातर्दोहविनाशे प्रायश्चित्तं सान्नाय्यस्या
लाभे सायंप्रातर्दोहयोः स्थाने चरू भवतः। तत्र नाशाखाछेदः। तो पवेषनिष्पत्तिः। नापि वत्सापाकरणादि।

नराग्नौ यवाग्वा होमनियमः॥ प्रातराग्नेयस्य हविषां ननन्तरं दैवमायजुरमिति चरुद्वये ग्रहणं॥ चतुर्द्ध्या एवमर्थे भवेति न
सान्नाय्यधर्माः॥ भाग चतुर्द्धाकरणादि सर्वं भवत्येवा॥ द्वितीयचरोः प्रथमसवदाने। ततः प्रथमस्य॥ अविरोधा
त्॥ सोपवेषहोमः॥ आत्तेसिस्यो सान्नाय्यालाभे चरुर्भवतइति कर्कः॥ विनष्टे सान्नाय्ये पं चशरावानन्तरं पुनः
सान्नीयलाभे चरूर्भवतइत्यर्थः॥ विनष्टस्याविनष्टस्य च सान्नायस्य प्रतिनिधिरयं। तथापि प्रथमे प्रारंभे ने
न्द्र क्रियत इति वासुदेवः॥ नियते सामान्यत प्रतिनिधिः स्यादित्युक्तत्वात्। प्रथमं प्रयोगेपि प्रारब्धयोर्दर्शपू
र्णमासयोरवस्य समानीयत्वात् प्रतिनिधिर्भवत्येवेपि याज्ञिकाः॥ अथवा सायंदोहस्थाने अष्टकपाल ऐंद्रः
पुरोडाशो भवति। सान्नाय्यलाभ एव वक्ष्यमाणविधाना यथा कथंचित्प्रधानयागमात्रपर्याप्त सान्नायलाभ
से भवेत्याप्रमादेन वा चरूभ्यां यागे कृते सान्नाय्यलाभसंभवे नयोरसाधनन्वेन यागासिद्धेः पुनः सान्नाय
यागकार्यः॥ इष्टिसमाधनेनंतरं ज्ञाने पुनरुद्धरणाभ्यन्वाधानं पत्याशनाशाखाछेदनानि। नापवेषः॥ वत्सा
पाकरणं॥ यवाग्वाग्निहोत्रः॥ दध्या थो दाहः प्रातर्दोहार्थं वत्सापाकरणं प्रातरनुदिते अह्लवरणादि। केव

लयोर्दधिपयसोर्यागो कर्मापवर्गातः प्रातर्दोहस्थाने चरुरेव। सायंदोहस्य वाल्लाभे एकाकपालस्तदा भ
वेदिति कारिकायां। अथवा सान्नाय्यालाभे असान्नाय्यवदामावास्या भवति। तद्यथा आग्नेयः पुरोडाशो वै
न्द्रावरुणपाप्युयाज ऐन्द्राग्न्यः पुरोडाशो भवति॥ यद्धविः केशकीटादिभिः सहपाकादिना द्वादशमपध्यादि
नास्पृश्यस्पर्शनादिना वा दुष्टं भवति। तस्य दुष्टस्य हविषो प्स्ववहरणं अप्सु प्रक्षेपः कर्त्तव्यः॥ अथ
वाहवनीये तस्मिन्दुष्टस्य हविषः प्रक्षेपः कर्त्तव्यः॥ शिष्टैर्मनुष्यादिभिर्नवल्क्यादिभिर्यस्य भक्षणं प्रति निषिद्धं तद्दु
ष्टमुच्यते। तत्सर्वनाशे हविषां दोषवैत्य भोक्तृ। ततो दुष्टस्याप्सु भेनिवाप्रक्षेपानन्तरं सान्निपातिकेरंगे स्म
त्यस्य हविः पुनरुत्पाद्य तेन यागं कुर्यात्। तथा च मानवे। एकेनेन दुष्टे वायथानुसर्वं पुनः करणमिति। तथा
दुःश्रतयोरवदानमात्रे सुश्रतेन प्रायश्चित्तमिति। यदि बहूनां हविषां मध्ये पुरुषापराधादेकेनकेन चिद्धवि
षां ग्रहणादिष्वालंभनानि। संस्कारे। कृते न यागो न कृतस्तदा वेनसर्वांगोपेते वयागः कर्त्तव्यः॥ तस्य संनिप
तोपकारकाण्यंगानि क्रियन्ते। नारादुपकारकाणि। ततश्च पुरा ब्राह्मणतर्पणादिनादिष्टं हुत्वा विस्मरते

दे॰ २५

॥५६॥

न हविषामसां सांनिपातिकैरंगैर्युक्तं यागं कुर्यात्। ब्राह्मणतर्पणाद्दूर्ध्वं विस्मृतस्मरणे सर्वांगयुक्तं तेन
विस्मृतेन हविषा यागं कुर्यात्॥ आश्वलायनः अप्रहृतदैवते दुष्टे नावृत्तिरस्ति होत्रस्याप्यद्धृतिः। सोऽनू
यप्रयच्छेद्देवतायै। अप्रहृतदैवतं यावा देवतामुद्दिश्य न प्राशितं॥ ८ तादृशे दुष्टे दुष्टे हेत्रस्यानावृत्तिः किं कारणं
असांनिपातिकत्वात्। प्रोक्षणादिषु॥ ॥संस्कारस्यावृत्तिर्भवति सांनिपातिकत्वात्। अत उच्यते। अप्र
हविः संस्कृत्य प्रयच्छेद्देवताया इति। यदि प्रधानयागानंतरं स्विष्टकृदाद्यर्थं हविर्विनश्यति। तदा स्वि
ष्टकृद्यामाज्येन ध्रुवायाश्चतुर्गृहितेन कुर्यात्। प्राशित्रेडावदवत्तब्रह्मभागादीनां सर्वेषां लोपः। एवं वारुण्या
नि षवाजिनोपयज्ञामाग्निहोत्राहुत्या प्रवर्ग्यशेषहोमद्रव्याहानां शेषभूतानां नाशे घाज्येन तत्कार्यं साध
नियं। बर्हिः प्रस्तरोपवेशस्वरौदीनां च अध्वर्यवं तु सर्वं भवति स्विष्टकृदर्थं भवत्तस्य विनाशे दोषेवाज्ये
नैव यागः कार्यः। प्राशित्राद्यर्थं भवत्तस्यापि नाशे हौ लोप एव। आश्वलायनः। नावृत्तिः प्रत्तदोषेस्ति तु ॥५६॥
प्यते स्विष्टकृदिदं महाभ्वेति। प्रधानार्थं हि हविस्तस्याद्येन न गुणार्थं अतः शेषमात्रं लोप एव भवतीति।

तथा आज्येनपरं। यस्मरं कार्यमारादुपकारकं नप्रतिपत्तिकर्म तदाज्येन कर्त्तव्यं निष्काषगुदत्तीयप्रवर्ग्य
शेषवाजिनहोमादि। पुनः पुरुषार्थं यथा हहविरुच्छिष्टाशेनो हविःशेषभक्षइति तत्रप्रतिनिधिर्युक्तः। समाप्तिः
श्रेयसीति हस्माह कौषीतकिरिति श्रुतेः। तथा। कृतस्यानावृत्तिर्गुणलोपेसंनिपातप्रधानेतावन्मंत्रं तानुन
पेरनुपेहितिजातिजात्तकर्णोर् तिमंत्रं चेहोमभंत्रं यानुत्वानुवाक्यादिकं च। गुणलोपोगुणस्यांगस्य मंत्रसंस्कारा
दिलोपे। कृतस्य कर्मणो नावृत्तिः यदि बहूनां हविषां मध्ये एकस्य हविषो ग्रहणमेव न कृतं प्रधानयागा
आकस्मात्तेतदानद्विस्मृते हविर्ग्रहणादिभिः संनिपातिकरंगैः संस्कृत्या नाहरेत्। यागा पर्वदि मध्ये आप्रा
ष्टेनापुनः प्रशमनयेत्। अथवा समिष्टयजुर्होमात् आकस्मत्वाविस्मृतं हविग्रहणादिभिः संनिपातिकैः
संस्कृत्याहरेत्। समिष्टयजुर्होमानंतरं विस्मृतस्य हविषः स्मरणेतत्। प्रस्तुतं कर्म कर्मापवर्गान्तं कृत्वा तद्दे
वातं निर्दिश्य हविरेव पुनर्निर्वपेत्। तस्मिन्नेव विहारे अग्न्याधानादि आप्तपानर्पणां तं पुनः कुर्यात्। तदेव पुनरि
ष्ट्येचकराल्य सर्वावृत्तिरुत्पन्ना सा हि स्यात्। अथ संनित्योपकारकाणामंगानां लिख्यते। अग्न्याधानं। ब्रह्म

देव॰ २५
।।५७।।

वरयामुपवेशनांतेध्वनग्रहणं।संयवनार्थत्वसर्वार्थत्वपक्षयोः प्रणीताप्रणयनं।नाहृष्टार्थत्वपक्षे पात्रासाद
नं।ग्रहणं।प्रोक्षणं।कंडनेपेषणं।कपालोपधानं।उपसर्जन्याज्यनिर्वापवेदवेधाः।संयवनं।पर्यग्निकरणं।श्रय
णमाज्योदकनिनयनांतं।वेदिमानादिहविरासादनालंभनांतं।स्प्ययोदक्षहारवर्जहोतुरामंत्रणादिव्याहवनी
योपवाजनांतं।अग्निसंमार्गः।होतृवरणं।स्रुगादापनं।आवाहनं।प्रयाजशेषेणाभिधारणं।याज्यापुरोनुवाक्ये
उपस्तरणादि प्रक्षेपांतं।स्विष्टकृद्यागः।प्राशित्रादिभागपरिहरणांतं।संमार्गः।व्यूहनाद्यात्मालंभांतं।परिधिः
प्रक्षेपः।संस्रवाहुतिः।धुरिनिधानं।वेदयोर्विमोकः।बर्हिर्होमः।प्रणीताविमोकः।आमावेक्षणं।व्रतविसर्गो
भागप्राशनंचेति।एतानिसंनिपत्योपकारकाणि।। ।।अथारादुपकारकाणि।अदृष्टार्थत्वपक्षेप्रणीताप्रण
यनं।कुक्कुटाहननं।स्प्योदक्षहार।पूर्वाधारोज्ज्वलिकरणोत्तराधाराः।प्रयाजान्वभागानुयाजपत्नीसंयाज
दक्षिणाग्निहोमस्रुग्पात्रनिनयनाद्याहवनीयोपस्थानांतंब्राह्मणतर्पणंकर्मापवर्गश्चेत्येतान्यारादुपका ।।५७।।
रकाणि।अथदेवताविपर्यासेप्रायश्चित्तमुच्यते।अनुवाचनाहोदेवतोच्चारणंविहितमस्ति।अमुष्मा अ

नुब्रूहि। अमुं यजे तीति च। तत्र यद्यन्यदेवतोच्चारणकालेऽन्यदेवतोच्चारणं। यथा। आग्नेयपुरोडाशावदानका
लेयदग्नीषोमीयोच्चारणं। अग्नीषोमायावदानकाले वाग्नेयोच्चारणं स देवता विपर्यासः। आज्यभागादावपि
सोमायानुब्रूहीत्यस्य स्थानेऽग्नयेनुब्रूहीति। सोमं यजेत्यस्य स्थानेऽग्निं यजेतीति वा सोऽपि देवता विपर्यासः।
स्याग्नादौ च। तत्र देवताविपर्यासे जाते पुष्कलदानरूपं प्रायश्चित्तं कृत्वा यथानुपूर्वी करणं यथाक्रमेणाकर
णं। यस्याः देवताया उच्चारणकाले भवतीति तस्या उच्चारणं कर्त्तव्यमित्यर्थः। आग्नेययागेऽकृते यदग्नीषो
मीययागः क्रियते स्विनैव र्हि चिषाक्रम विपर्यास मात्रं। न देवताविपर्यासः। तेन तत्राध्वर्यमेव भवति। न
पुष्कलदानपुष्कलशब्दार्थोऽयज्ञपार्श्वे प्युक्तः। अष्टमुष्टि भवेत्किंचित्किंचिदष्टौ च पुष्कलमिति। देवताविप
र्यासे च तत्रैव विशेषोऽस्ति। धेनुर्वा यदि वानड्वानमेव का हादशापि वा। देवतानां विपर्यासे एतत्पुष्कलमुच्यते। धा
न्यमुष्टिचतुःषष्टिरितरेषु च पुष्कलमिति। तथाऽन्यदपि ग्रासमात्राभवेत्रिदशापुष्कलं तु चतुर्गुणमिति। तेन
देवताविपर्यासे धेनुर्वेत्यादिकमेवाइतरेषु पुष्कलादाननिमित्तेषु यथाशक्ति व्यवस्था॥ समर्थस्य चतुःष

देव० २५
।।५८।।

ष्टिपरिमितधान्येन पुरुकलं। असमर्थस्य चतुर्यामिपरिमितेन। अथवा निमित्तस्य गुरुत्वलघुत्वापेक्षया व्य
वस्था। एतेन रूप्यसुवर्णमेकीयं यच्च साद्धैरद्रव्यमात्रं तदुभयं निरस्तं॥ जुषाणो अग्निर्वेत्तु स्वाहेत्यादिहोममं
त्रविपर्यासित्वनादिष्टमेव। अवदान अवदानविपर्यासे याज्याविपर्यासे अनुवाक्या। विपर्यासे च पुरुकलं द
त्वा यथानुपूर्व्यीकरणं भवति। अन्यदेवतस्य हविषोवदानकाले यदन्यदेवतस्यावदानं सोऽवदानविपर्यासः।
तत्र प्रक्षेपात्क्रज्ञाते पुरुकलं दत्वा जुहूस्थाय दवत्तस्यावदानं तन्मात्रांतरे कृत्वा यस्य हविषोवदानकालो भवति। त
स्यावदानं गृहीत्वा यागं कुर्यात्। ततः पात्रांतरे स्थापितेयदवदानं तत् जुह्वां प्रक्षिप्य यथाविहितं यागः कार्यः
। मध्यपूर्वार्द्धावदानयोर्विपर्यासे क्रमविपर्यासमात्रं। नावदानविपर्यासः। अयदेवताया याज्यानुवाक्योच्चारण
काले यदन्यदैवतप्राकरणिकयाज्यानुवाक्योच्चारणं। यथा आग्नेयस्य यागकाले यदग्नीषोमीयया याज्यानुवा
क्योच्चारणं सयाज्यानुवाक्ययोर्विपर्यासः। तत्रापि प्रायश्चित्तिः प्रक्षेपात्प्रज्ञाते पुरुकलं दत्वा यथानुपूर्व्यकरणं।
पुनर्यथाविहितयाज्यापुरोनुवाक्योच्चारणं कार्यं। हविःप्रक्षेपात्पूर्वं ज्ञाते त्यागश्चेद्विहितदेवतायै कृतस्त

द्वा पुष्कलस्थानमात्रमेव। न यागस्यावृत्तिः। तयोरंगत्वात्। न च अंगानुरोधेन प्रधानयागस्यावृत्तिरुपप
द्यते। कृतस्यानावृत्तिर्गुणलोपः इति आश्वलायनः। याज्यानुवाक्ययोरपि न यथाविहितं पाठः। मंत्रं ता
नुजपेदिति तेनैवोक्तत्वात्। यागस्यान्यदेवतापेक्षकरणे अन्यदीयहविःप्रक्षेपे वा कृते द्रव्यदेवतस्यैव कर्म
स्वरूपत्वात्तद्विपर्यासे च यागस्य वाऽनिष्पत्तेः पुनः सांनिपातिकैरंगैर्हविरुत्पाद्य यथाविहिते यागः का
र्यः। आप्राकरणिकयाज्यानुवाक्यापाठे यागात्प्राक् ज्ञाते हौत्रिकप्रायश्चित्तं कृत्वा प्राग्यागात्पुनर्यथा
विहितयोः पाठः। यागादूर्ध्वं तु हौत्रिकमेव। अविहितयोस्तद्देवत्ययोरुच्चारणेपि यागात्पूर्वं ज्ञाते हौत्रि
के हुत्वा यथाविहितयोः पाठनं। यागादूर्ध्वं हौत्रिकमेवेति गदाधरः। इहाभिहितविपर्यासातिरिक्ते निमि
त्ते आध्वर्यवमेव। अत्र मंडनः। होतुर्याज्यानुवाक्यासु विस्मृतिर्यदि जायते। तदाग्नेयीरैंद्र भिःप्राजा
पत्याभिरेव च। यजेद्याज्यानुवाक्याभिर्व्याहृतीभिरथापि वा। तथा। अनुमंत्रणमंत्रेषु याजमानेषु वि
स्मृतौ। तदा व्याहृतिभिः कुर्यात्स्वामी तदनुमंत्रणमिति। जुह्वादिस्रुक्स्थे आज्ये दुष्टे पुनः पूर्ववदाज्यस्थाल्या

ग्रहणंकार्यंधामनामेतिमंत्रेण। तत्रप्रयाजानंतरमौपभृते दुष्टेचगृहीतमेवग्राह्यं। तत्रश्वादिभिर्घ्रातेवल्मी
टेतुस्रुचामपिशुद्धिःकार्या। तस्तणदारुशृंगास्थ्नामित्यादिना॥ ॥अथवास्तुचोर्दुष्टे ध्रुवामाप्याप्याप्याय्यध्रु
वाया आज्येमंत्रेण ग्राह्यं। अथवाजौहवेदुष्टे ध्रुवायाउपभृतो वाजुह्वामाज्यंतूष्णींनिनयेत्। अपभृतेदुष्टेजौ
हवाद्धौवाह्वाउपभृतिनिनयने। ध्रौवेदुष्टेजुह्वाएवाज्यस्य निनयं। नोपभृतः। अत्रनिनयनश्रवणात्ततोनिन
यनमात्रेनधामनामेतिमंत्रः। संख्याच। ध्रुवातोग्रहणपक्षेमंत्रसंख्ये भवतः। पुनर्ग्रहणमित्यस्यानुवृत्तेः॥
द्वितीयतृतीयपक्षयोराध्वर्यवहोमाभावः। आज्यस्थालिदोषेन्यदाज्यंग्राह्यं। तत्राज्यस्थाल्याः शुद्धिंकृत्वा
आध्वर्यवंहुत्वासोमश्चेत्कालाहुतिवाचनेचकृत्वायजमानवाचं यच्छेत्यक्त्वा आज्यमासाद्य अग्निहो
त्रहवण्यामपरस्तात्यांतामप्यासाद्य पवित्रेचेत्प्रस्तरे कृतेतर्हिपवित्रछेदनानिपवित्रेचेत्यासाद्यवा
ग्यतोभूत्वापवित्रेछित्वोत्प्रोक्षणीः संस्कृत्यहैमायेत्याज्यंप्रोक्ष्यमहीनामितिनिरूप्यइषेत्वेत्यधिश्रि
त्यपर्यग्निकृत्वाज्येनोदेहीतिप्रेषंदद्यात्। ततोग्नीदाज्यमुद्वास्यपत्न्यवेक्षणंकरपित्वानीयवेधामा

सादयति। ततोध्वर्युराज्यमुत्पूयावेक्ष्य प्रियेणेति वेद्यां कृत्वा ध्रुवाम्भसदस्विस्याल्लभे। सुत्यासु चेदाग्नी
ध्रीये उत्पवनावेक्षणग्रहणानि। आग्नीध्रो माग्नीयचेदेत्तः पात्ये। अथवा सर्वत्र हविषां दोषापि दृष्टेनैव
स्वाः कार्यं कर्त्तव्यं। अथवा दुष्टेन हविषा यागे कृते पश्चाद्धविषो दुष्टत्वज्ञाने यत्कृतं तत्कृतमेव। नादुष्टे
न पुनरावृत्तिरिति कर्कः सर्वहविःसाधारण्येनोक्तत्वात्। वासुदेवोपि ज्ञाते वा कथिते दोष एकदेश
स्पर्शनात्। कृते कर्मणि नावृत्तिः। अनेरेतत्परं पदमिति। संप्रदाये तु आज्यविषयमेवदुक्तमित्या
भाति। दृष्टादेवाघारादिकर्मनिर्वृत्तौ निर्वृत्तमेव। तदुक्तं दृषोवेद्येते न ग्रंथेन। एतच्च केशकीटाद्यल्पोप
घातविषयं। अमेध्यादिपातदोषे तु पुनर्याग एवेति गदाधरः। दुष्टेन हविषा यागे कृते पुनर्यागावृत्तिर्भ
वतीति शांखायनः। अन्या सुदेवता। स्विष्टासु दुष्टेन वा दोष भवति तंत्रे प्रदानमावर्त्तते सर्वेषि दोष परीता। अ
स्यार्थः। चोदितान्योया अन्यास्ता सुदेवता। स्विष्टासु अतानाद्दुष्टद्रव्येणेष्टासु अपरिसमाप्ते तंत्रे प्रदा
नमावर्त्तते। अशेषे तंत्रशेषाभावे समासे कर्मणि ज्ञाते सर्वेष्टिमावर्त्तेतीति। दुष्टादुष्टसमुदाये व्यावृत्तिः

देव०२५
॥६०॥

कृतत्वादिति शांखायन भाष्यं। तेनानेकहविष्के यागे तंत्रेण क्रियमाणे दुष्टमिश्रेण कृतस्य यागविनष्ट
त्वात् सर्वेषां पुनरुत्पादनं यागश्च पुनः कार्यः। अत्र सतहशप्राजापत्ययागः सान्नाय्ययागः। तत्र प्रति
हविः सकृत्सकृदाज्यमवद्यं पंचावत्तीनां द्विर्द्विः। प्रसंगात्सायश्चित्तांतरमपि शांखायनोक्तं लिख्यते। या
न्याभ्यो गृहीते ऽन्यासु चावाहितासु चोदिताभ्यः प्रयच्छेदाज्येनावाहिताय जेत्। अस्यार्थः। चोदिताभ्यो या
आज्यास्ताभ्यो हविर्ग्रहणे कृते अन्यासु वा आवाहितासु न ग्रहणं। नावाहनं च नो गी कुर्यात्। किं तर्हि चोदि
ताभ्यः प्रयच्छेत्। कुतः। चोदनायाः प्राधान्यात्। यास्त्वावाहिताः हविर्ग्रहणे वा भ्रांत्या कीर्तितः ताः प्राज्ये
न यजेत्। कल्पेत्तरात्। मानवे सूत्रे विशेषः। यद्यनभि निरुप्तामावाहयेत् यथा निरुप्तमाज्येनोपांशु
यजेत्। आगिनी चन्नावाहयेदुपोत्स्थायावाहयेदिति। हविषां निर्वापकाले यदि भ्रांत्या अधिकं हविर्निरु
प्तं तदा तेन यागो न कार्यः॥ ॥प्रणीताः स्कन्नाभूभावन्यत्र वापतिताः एतु राजा करुण इति मंत्रेणाभि ६०
मन्त्रयेत्। अग्निहोत्रस्थाली सान्नाय्य खोपसर्जनी पात्र कपाल कर्पर खसनी वर्यैक धनपरम्पराधवनी

यद्यग्रहस्थाल्यादि मृन्मयं पात्रं भग्नं भूमिर्भूमिमवागादिति मंत्रेणाभिमृशेत्। सोमे तु कालाहुतिं वाचन
पूर्वं कर्तव्यं। ततो भग्नस्याभिमर्शनं॥ ॥धर्मसंबंधि मृन्मये महावीरपिन्वनरौहिणकपालादिभग्नेभू
मिर्भूमिमवागाद्यहलते चिदृभिः श्लिषइत्याभ्यां मंत्राभ्यामभिमृशेत्। एवं भूमिमित्यस्य पादः पश्चादयक्
ते चिदित्यस्य पंचमी कंडिका परमेष्ठिने स्वाहेत्याद्याः चतुस्त्रिंशदाहुतीरध्वर्युः सकृद्गृहीतेन जुहोति।
कालाहुतिरपि सर्वं भवति॥ तेन पिन्वनरौहिकपालभेदे एतावेव प्रायश्चित्ते। एवं ब्रह्मा वरुणाय स्वाहेत्या
हवनीये कालाहुतिं हुत्वा यज्ञस्य दोहइति वाचयति ततोध्वर्युः एवोक्तमंत्रद्वयेनाभिमर्शनं करोति ततः
परमेष्ठ्यादि चतुस्त्रिंशदाहुतिहोमः। ततः पिन्वनादिकमुपशयां च पिशायं चापि छिन्नया मृदा संसृज्यापि
त्वदाहीनाकरणाभिमर्शनश्लक्ष्णनधूपनश्रपणोद्धरणावलेपनानि तु। क्रमीं कुर्यात्। महावीरभेदे सर्वेमा
ज्यसंस्कारः। ब्रह्मा आहवनीयं परिस्तीर्य समिधमाधाय वरुणाय स्वाहेति कालाहुतिं हुत्वा यज्ञस्य दो
हइति वाचयति। ततोध्वर्युर्भूमिर्भूमिमियरुनेचिदित्याभ्यां मंत्राभ्यां भिन्नस्याभिमर्शनं करोति। ततः अ

देव॰२५
॥६१॥

ध्वर्युरग्ने संस्कृत्य परिस्तरणसमिदाधानपूर्वकमाहवनीये सकृद्गृहीतमाज्यं गृहीत्वा गृहीत्वा परमेष्ठ्यादिच
तुस्त्रिंशतमाज्याहुतीर्जुहोति। परमेष्ठिने स्वाहा। इदं परमेष्ठिने ॥१॥ प्रजापतये स्वाहा २ अधसे॰ ३ सवि
त्रे ४ विश्वकर्मणे ५ पूष्णे ६ इंद्राय च मरुद्भ्यश्च स्वाहा ७ असुराय ८ मित्राय॰ ९ विष्णवे शिपिविष्टाय
१० विष्णवे नरंधिषाय॰ ११ सोमाय॰ १२ वरुणाय॰ १३ अग्नये १४ इंद्राय १५ अथर्वणे १६ विश्वेभ्यो दे
वेभ्यः १७ विष्णवे आभीतमा १८ यमाय १९ विष्णवे २० वायवे २१ शुक्राय २२ शुक्राय २३ मंथिने २४
विश्वेभ्यो देवेभ्यः २५ असवे २६ रुद्राय २७ वाताय २८ नचक्षसे २९ भक्षाय ३० अपसव्येन दक्षिणा
भिमुखेन पितृभ्यो नाराशंसेभ्यः स्वाहा ३१ ततः सव्ये। उदकालंभः। सिंधावे ३२ समुद्राय ३३ सलि
लाय स्वाहा ३४ इदे शाद्युक्तोऽश्वतुर्थ्यंता एतत्स्वस्यागाः। ततो जुहूं स्रुवेणाज्यं गृहीत्वा २ पूर्णां
कृत्वा स्वाहा प्राणेभ्यः। साधिपतिकेभ्य इति मंत्रेण पूर्णाहुतिमाहवनीये जुहोति। ततः सकृद्गृ ६१
हीतं द्विर्द्विर्गृहीत्वा वक्ष्यमाणा विंशत्याहुतयो होतव्याः। पृथिव्यै स्वाहा १ अग्नये २ अंतरिक्षाय

३वायवे ४ दिवे ५ सूर्याय ६ दिग्भ्यः ७ चंद्राय ८ नक्षत्रेभ्यः ९ अद्भ्यः १० वरुणाय ११ नाभ्यै १२ पूताय १३
वाचे १४ प्राणाय १५ प्राणाय १६ चक्षुषे १७ चक्षुषे १८ श्रोत्राय १९ श्रोत्राय २० एताः सद्गृहीतैः ॥ पुनरपि
जुहूघृतेन पूरयित्वा मनसः काममाकूतिमिति मंत्रेण पूर्णाहुतिं जुहुयात् ॥ इदं रश्मिभ्यै इति त्यागः ॥ एवमे
तो द्वाविंशतिराहुतयः ॥ यथादैवतं त्यागाः ॥ ततः स्रुग्गृहीतेन प्रजापतिः संभ्रियमाण इति यथा कात्यायनि
तिसूत्रेण विहितानां मध्ये एकां जुहुयात् ॥ ततः सविता प्रथमेहन्नित्यनेन विहितानां मध्ये एकां स्रुग्गृही
तेन जुहुयात् । ततो भग्नस्य महावीरस्य पेषणं । उपशयापेषणं । अन्यां मृत्तिकपाल सह पिष्टयोर्महावी
रोपशमयोः संसर्गः । ततस्तेन हेमी महावीरस्य करणाभिमर्शन श्लक्ष्णन धूपन प्रदहनोद्धरणावसेवना
नि कृत्वा नूतनमुत्पादनार्थं निरध्यात् । उपशयोर्मध्ये एकेन द्वेन प्रवर्ग्यं कुर्यात् । नात्रोतः पात्रे संभा
रस्थापनादिश्रविहितत्वादिति गदाधरः । महावीरकरणात् प्रभृततः परिवृत्तेश्च विरोधादिति याज्ञिकाः ॥
प्रजापतिः संभ्रियमाण इति च यथा कात्यमि । तस्य विवेको लिख्यते । निच्छिनानि मर्शनादारभ्याऽत्राप

देव०२५
॥६२॥

योवसेचनपर्यंतं संस्त्रियमाणः तच्च महा। वीरभेदे प्रजापतये स्वाहा॥ प्रजापये। वसेकाद्दारभ्य प्राक् कुशेष्वा
स्तरणान्ते इदं सम्राजे स्वाहा॥ कुशेष्वासादनाद्दारभ्य मुंज्यप्रस्तवे पुरीलेष्वधिश्रयणात्प्राक् भेदे विश्वेभ्यो देवेभ्यः
स्वाहा॥ अधिश्रयणाद्दारभ्य प्राक्का अयंमहावीरं परिगृह्णातीत्येतस्मात् इदं धर्माय स्वाहा॥ महावीरोद्धमनाद्दा
रभ्य प्राग्गनापकृश्यो वसेकात् इदं तेजसे स्वाहा॥ प्रजापयस्यासिच्यमाने भेदे अश्विभ्यां स्वाहा॥ विष्यंदमाने
घृते बर्हिर्निःसरति सति भेदे पूष्णे स्वाहा॥ कृपनमावर्त्तनं मध्ये इदं व्यस्यत हा भेदे मरुद्भ्यः स्वाहा॥ शोः प्रयो
वसेकानंतरं प्यात्तत्वत् रिकायते सा द्वारः द्वादेनो च्यतेतत आरभ्य प्राग्गाहवनीयाहरणात् इदं मित्राय स्वा
हा॥ हरणाद्दारभ्य प्राग्घोमात् आरभ्यां इदं वायवे स्वाहा॥ हूयमाने भेदे अग्नये स्वाहा॥ होमोत्तरकालादारभ्योत्त
तरधर्मारिंभात्प्राक् भेदे वायवे स्वाहा॥ तथा प्रथमेऽहनि धर्मभेदे इदं सवित्रे स्वाहा॥ द्वितीयेऽउपसद्दिने धर्मभेदे
अग्नये स्वाहा। तृतीयेऽहनि धर्मभेदे वायवे स्वाहा। चतुर्थे आदित्याय। पंचमे चंद्रमसे स्वाहा॥ षष्टे ऋत
वे स्वाहा॥ सप्तमे मरुद्भ्यः॥ अष्टमे बृहस्पतये। नवमे मित्राय॥ दशमे वरुणाय॥ एकादशे इंद्राय॥ द्वाद

प्रा॰ म॰ २५
६२

से विश्वेभ्यो देवेभ्यः स्वाहा। चतुर्मासोपसक्तादावेतासामेवाहुतीनां पुनः पुनरावृत्त्या होमः कार्यः। इति महा
वीरभेदे प्रायश्चित्तं। अथ धर्मदुघायामरणे अदोहे च प्रायश्चित्तमुच्यते। तत्र धर्मदुघायां मृतायां तस्या एव वा
दोहे च धर्मदुघाया दोहस्थाने अन्यां गां दृढश्रुत्वीं स्थापयेत्॥ अथवा शालायाः पुरस्तात्प्राग्भुवीमन्यां स्थाप
यत्। ततो धर्मराज्यसंस्कारं करोति। पूर्वे ब्रह्मा आहवनीये स्वाहेति कालाहुतिं हुत्वा यत्ते स्यति वाचयति। त
तो धर्मपुनर्ग्रहो न कृत्स्नहीनमाज्यं गृहीत्वा गृहीत्वा धर्मदुघायाः स्थाने स्थापितायाः अन्यस्या गोः पुच्छाद्दक्षिणवि
भागस्थितस्यैव अस्थिनि होमाधिकारणभूते परमेष्ठिन इत्या। द्याश्चतुर्विंशतिमाज्याहुतीर्जुहोति। अत्र चोपवि
ष्टस्य होमासंभावात्सामर्थ्यात्तिष्ठता होतव्यं। ततस्तां अन्यां गां धर्मविसर्जनार्थं रोहयेत्। पशुबन्धप्रया
सादौ एष हास्य स्कन्दने भुवः पतये इत्यादि अभिमर्शनं चतुस्त्रिंशद्धोमो विकल्पेन। अपां विसर्जनं यत्नेनेति नित्य
मकृत्स्नहीनेन होमः। सोमे चेद्धर्मं कालाहुतिवाचनेन भवतः। ततो भिमर्शनादि। स्थालीभेदे तु भूमिर्भूमिमित्यभि
मर्शनमपि भवति। सोमयागमध्ये यस्मिन्कस्मिंश्चित्कर्मणि सोमांगे सोमांगांगे वा विहितद्रव्यस्याभावे जा

॥६६॥

तेपरमेष्ट्यादिचतुस्त्रिंशदाहुतीनांमध्येयथाकालंएकैकाहुतिंसकृद्गृहीतेनाज्येनहुत्वापतस्यदोहइत्यमुं
मंत्रंयजमानंवाचयति।तांब्रह्मैवयाजुहुयादितिश्रुतेरेताब्रह्मणाहोतव्याः।वाचनमपिब्रह्मणाकार्यंहुत्वा
वाचयतीतिक्त्वाप्रत्ययसामर्थ्यादितिवासुदेवः।अपरेतुवाचनमध्वर्युकर्तृकमिच्छंति।अथवाहवासुदेवः।सो
मांगोपघातएवकालाहुतिर्भवतिनेष्टिपश्वाद्यंगोपघातेइति।प्रयाजादिनसोमांगेतत्क्तौनैवदूषणं।
सोमस्यतेनतत्रस्यादनादिष्टंपुरोदितेमिति।अत्रएकैककालाहुतिहोमेब्रह्मणःकर्तृत्वं।समुदितेच
तुस्त्रिंशद्धोमेत्वध्वर्योरिवा।सर्वत्रपूर्वकालाहुतिहोमोवाचनं।।ततोऽनादिष्टप्रायश्चित्तेऽनादेशे।प्राय
श्चित्तांतरस्यादेशेतुकालाहुत्यनंतरमादिष्टप्रायश्चित्तंभवतिपाठकर्मादितिहरिःस्वामिनःसंप्रदायपद्ध
तावप्येवमस्ति।सोमेज्योपघातेएकैकाहुतिर्यथाकालमाध्वर्यवचेतिक्रमेणोपदेशः।गदाधरकारिकासार
यस्तु-आदिष्टाऽनादिष्टप्रायश्चित्तसमनंतरेकालाहुतिहोममिच्छंति।तत्रप्रथमंकालाहुतिहोमोयुज्यते।
पाठक्रमानुरोधात्।तावाएताश्चतुस्त्रिंशद्घातत्तयोभवतिप्रायश्चित्तयोनामेत्युपक्रम्य।।यथयद्यज्ञस्य

क्लेतत्समन्वीक्ष्यानुहुत्यादित्यत्र्यग्रह कांडे कालाहुतानां विधानं। मध्यमकांडेनुहूर्वं विहितानामेवाऽवस
रमात्र विधानार्थमनुवादः। सोमापहरणादिप्रायश्चित्तानां चातःपरमस्मिन्नेकांडे विधानं। वेदाहुतीनां चा
हाध्यायेव विधानं। अन्यासां धर्मभेदादिप्रायश्चित्तीनां च ततो पूर्ध्वमारण्यके। अन्यच्चाप्यध्वरस्य पूर्वामया
न्नेरिति। तस्मात्सर्वत्र पूर्वकालाहुतिहोमः। ततो नादिष्टप्रायश्चित्तनामनुष्ठानमितियुक्तरूपं। कालाहुतय
स्तुरीयाः सूपसः सुचापररात्र ऋत्विजः प्रबोधयंस्ते तस्मात्ता गाहवनीये होतव्याः। ऋत्विकप्रबोधनादारभ्य
सुत्यायामाग्नीध्रीये। यदि दीक्षोपरि चाहवनीये यदि प्रसुत आग्नीध्र इति श्रुतेः। आहवनीयप्रणयनानंतरमग्नीषोमी
यमहन्यंतरवेदौ। सुव इति होमस्त्वाग्नीध्रीयप्रणयनानंतरमाग्नीध्रीये॥ ततः प्राग्दक्षिणाग्नावेव॥ सर्वं
प्रायश्चित्तहोमस्तु सर्वदा आहवनीय एव। चतुस्त्रिंशाद्धोमोपि पृष्ठदाज्यस्कंदनादिभेदेनादौ विहित आहव
नीय एव भवति॥ ॥अथ कालाहुतीनां कालभागो लिख्यते। अत्र पराह्निनाहूर्वीतइति वत्सवर्वापदिष्टकाला
दारभ्योत्तरकालात्प्राक्पूर्वकालाहुतेः काल इति सर्वेषां भाष्यकर्तॄणामभिमितं। तत्र अहं अस्मिन्वसे

देव०२५

॥६४॥

ते सोमयागं करिष्ये इति मनसा चिंतिते यदि दैवात् मानुषाद्वा कारणाद्ध्वंसं ते सोमयागो न कृतस्तद्दा परमेष्ठिने स्वाहे
ति सकृद्गृहीतेन जुह्वा काल्लाहुतिं हुत्वा पतत्स्यदोह इति वाचयेत्। ततो भुवस्त्वनादिष्टहोमं कुर्यात्। वाचा सामं करि
ष्यामीत्यकृते च तदकरणे प्रजापतये स्वाहेति॥ ॥सामाहरणार्थं गत्वा सोममनादायागमने अध्वं धस्तेभ्यः स्वाहेति।
एतास्मिन्स्तः स्याहुतये सदर्थमाहवनीयमुद्धृत्य तान्त्र से वजुहुयादिति नियमादावेलावषट्कारात्विति स्तृत्वा
च्च ब्रह्मलाणं कृत्वाज्यं संस्कृत्याहवनीये सकृद्गृहीतेनाज्येन परिस्तरणमग्निराधान सर्वकं ब्रह्मणा होतव्याः।
ततो वाचनमनादिष्टहोमश्च। यथा देवतं त्यागाः। सा ते शालायां निहिते सोमे दीक्षितो यमिति रुद्धादनप्रैषात्पू
र्वं विहितान्यथाभावे सवित्रे स्वाहेति। उद्वादने प्रैषाद्दूर्द्ध्वं द्वारा द्वारापिधायेत्येतस्मात्प्राक् विश्वकर्मणे
स्वाहेति। द्वारापिधानाद्दारभ्य सोमोपनहनाहरणात्प्राक् पूष्णे स्वाहेति॥ सोमोपनहनप्रैषादारभ्य प्राक्
विक्रयिणे समर्पणादिंद्राय च मरुद्भ्यश्च स्वाहेति। विक्रयिणे समर्पणादारभ्य हिरण्यवाचनात्प्राक् असुराय
स्वाहेति। हिरण्यवाचनादूर्द्ध्वं रौ सोमनिधानात्प्राक् मित्राय स्वाहेति। रौ निधानादारभ्य कीनानुवाचनात्प्राक्

६४

कविस्मवेत्रिपिविष्टाय स्वाहेति॥ क्रीतानुवाचनादूर्ध्वं प्रागुपस्थानमनाद्धिस्मवेनरंधिषाय स्वाहेति। उपरो
पस्थानमनादूर्ध्वं मासंधामासादनात्प्राक् सोमाय स्वाहेति। आसंधामासादनादूर्ध्वं माग्नीध्रीयक्षेत्रनिधानात्प्रा
क् सर्वान्मूपसत्सु वरुणाय स्वाहेति। अग्नीध्रीय निधानादूर्ध्वं हविर्धाने सोमनिधानात्प्रागग्नये स्वाहेति।
हविर्धाने सोमनिधानादूर्ध्वं प्राक् सोमं चासंधामित्यस्मानूर्ध्वं इंद्राय स्वाहेति। अग्नीध्रे आसाद्यासोमविधाना
द्वारभ्य प्राक्सोमोपावहरणादग्नये स्वाहेति। आसंदीस्थिते सोमे वरुणाय स्वाहेति चेति द्वयोः समुच्चयः।
आग्नीध्रीयगतत्वस्य चासंदीस्थितत्वस्य च निमित्तद्वयस्य विद्यमानत्वात्। उपावहरणादारभ्य सोममा
मात्राक् अभिषवणे स्वहेति॥ उपांशुसवने सोममानोदूर्ध्वं प्राग्ग्रामेति तिमहराद्विश्वेभ्यो देवेभ्यः स्वाहेति। अभि
षेच क्रियमाणे विष्णवे इति। एवमभिषवार्हत्वाचात्मा मध्येवमेवाहृत्ति॥ अभिषवादूर्ध्वं मंतर्यामग्रहात्सूर्व
वायवे स्वाहेति। अंतर्यामग्रहादूर्ध्वं प्राक् मैत्रावरुणग्रहणाच्छुक्राय स्वाहेति मैत्रावरुणग्रहणादूर्ध्वं प्राग्मंथिनोग्र
हणाच्छुक्रायेति। मंथिनो ग्रहणादूर्ध्वं उन्नीयमानानुवाचनाचनात्प्राक् मंथिने स्वाहेति जुहुयादिति प्रायश्चित्तकारिका

हेव०२५
॥६५॥

कारः॥ सकृच्छ्रयणमात्रेऽयमाहुतिरिति गदाधरः॥ ततश्च यथासंभवं सोमस्य पूतत्वा वसच्छायां शुक्रायेति। एतन्मद्दारोप्यमानलेवाप्यवट्रितिनतऊर्ध्वं प्रागुन्नीयमान। प्रेषात्सूतन्वेनश्वु शायइति॥ ॥चमसोन्नयना द्दारभ्य प्रातः प्रातःसवस्येति प्रेषात्प्रा ग्विश्वेभ्यो देवेभ्य इति॥ ततः आरभ्य च समाध्वर्युभिश्चमसहोमात्प्राग्ऽसवे स्वाहेति। चमसाध्वर्युहोमाधाग्नीध्रचमसहोमां तेरुद्राय स्वाहेति। अस्याचोद्दकस्पर्शनं। ततो वाचनो सदसि भक्षायाऽनीयमानेषु चमसेषु वाताय स्वाहेति॥ ॥आत्राऽप्ययदि चमसे एन्नीनइति प्राकृत्याथ यद्दिहोमायो घनो हूयमानेऽभ्याहृत्त इत्यादि श्रवणाच्चमनोन्नीतस्य सोमस्यो घतनो घवसच्छायामेत स्याचश्चिन्नं भवतीति प्रानीयते। तेनग्रहादिघ्वभ्कघमनहूयमान्नादौ न भवति। अयाऽग्नीदित्यस्मिन्न वसरे प्राक्चमसभक्षान्नृचक्षसे स्वाहेति। चमसभक्षणाद्दारभ्य प्राग्धविर्द्धानमध्ये सादनाद्दक्षाय स्वाहेति॥ द्विदेवभक्षणाद्दारभ्येति कारिकाकारगदाधरो। तत्कथमप्कपपद्यत इति तावेव विदतुः। हविर्द्धानमध्ये चमसंनिधानाद्दारभ्यो विग्रहार्थं चमसोन्नयनात्प्राक्पितृभ्यो नाराशंसेभ्यः स्वाहेति। अपस

६५

ध्येन पित्र्यतीर्थेन होमा हूर्ध्वमुदको पस्पर्शनं च । तथापि भक्ष्यार्थनीयमानमस्वधादौ प्रागुक्ताः । कालाहु
तयो भवेत्स्ये वा उत्थाय विहरणे च पिचमसे स्थलीन त्वहोमायो घृतभ्यादि भक्ष्यमाणांतानि संति । ते पुपू
र्वोक्ताः कालाहुतियो भवत्येव । एवं माध्यंदिनार्थमुपावहरणादौ आत्हुतमाराध्या वर्थं गच्छतीये तस्मा
त्पाक् पुनः पुनः प्रागुक्तनिमित्ता हुतौ प्रागुक्ताः कालाहुतयो । विशार्थं विचार्य होतव्याः ॥ अनेकनिमित्तसं
भवे च कालाहुतीनां समुच्चयः । उरूं हीति वाचनाद्वारभ्य सामगानां तेस्मिन्ध्वे स्वाहेति । गमनाद्वारभ्ये
र्ध्वं ते समुद्रायति । भस्मावनाद्व्वबर्हिराद्दीपनां ते सलिलायेति । कारिकायां । कुंभशूलवनाद्यियावत्स्याह
र्हिराद्दीपनांतनके । अत्रांतरे विलिष्टे चेत्सलिलायेति हूयतइति । एताश्च । तुष्णिं शास्त्रमेध्याघा आहुतयः
सकृद्गृहीतेन ब्रह्मणा होतव्याः । तदुत्तरं वाचनेन च । एकैकां प्रथा कालेह त्वायद्रेस्पदोहद्वति वाचयतोत्येके
कहोमे वाचनोपदेशाच्च तुष्णिं शस्त्रहोमे वाचनेन भवति । पशौ सोमे च यदि काको यूपमारोहति नदः आपस्व
रूपवदितिमंत्रेणो हाता सकृद्गृहीतमाज्यमाहवनीये जुहोति । इदं सोमायां पशौ तु ब्रह्मा जुहो । तीति वासुदे

देव॰ २५
॥ दृष्टं॥

वः। अत्रापि सोमे पूर्वं कालाहुतिवाचने भवतः। तद्धार्थकस्य होमस्यात्रोपदेशात् अनादिष्टानि इत्यर्थः। तेन
पश्वोत्पवेशन पलायनादौ होतृकर्तृक प्रायश्चित्तस्यानुकृत्वा इनादिष्टहोमो भवत्येवेति याज्ञिकाः। पृ
षदाज्यस्कंदने सोमे पूर्वं कालाहुतिवाचने। ध्रुव पतय इत्याभिमर्शनं। चतुस्त्रिंशद्धोमा वा। अथा विप्राजन
यन्निति अनेन मंत्रेणाध्वर्युराहवनीये सकृद्गृहीतं जुहोति। स्थालीभेदे भूमिरित्यभिमर्शनं च॥ सोमाद
न्यत्रापि पशुवपाप्रदानादौ पृषदाज्यस्कंदने एतदेव प्रायश्चित्तं कालाहुतिवर्जं॥ ॥यदि धर्मघुग्गो
र्व्याघ्रेण मारिता। तदा कालाहुतिवाचने कृत्वा सकृद्गृहीतं गृहीत्वा गृहीत्वा स्रुचा तास्संज्ञाः षडाज्याहुती
रध्वर्युर्जुहुयात्। चंद्रान्ते मनस्स्पृणोमि स्वाहेति प्रथमं। सूर्यात्ते चक्षुस्स्पृणोमि स्वाहेति द्वितीयां। वातात्ते
प्राणान्स्पृणोमि स्वाहा। ३ दिग्भ्यस्ते श्रोत्रं स्पृणोमि स्वाहा। अद्भ्यस्ते लोहितं स्पृणोमि स्वाहा॥ पृथि
व्यैते शरीरं स्पृणोमि स्वाहा। ६ ततोऽध्वर्युरन्यामाजनदितीमं प्रेषं ब्रूयात्। स्वयं होमी यजमानः स्वयं
होमकरणाशक्तौ अध्वर्युणा अन्येन वा होमे क्रियमाणे स्वयमग्नीनां समीपे गत्वोपविशेत्। समीप

दृष्टं॥

पिगमनाश्चकौरवह्वातोतीर्यभूमावुपविशेत् खद्वासमीपएव ।६। षष्ठिकंडिकासमाप्ताः ॥ ॥सायम
ग्निहोत्रहोमानंतरयदियजमानोदुर्बलःक्षीणोभवेत् । प्रातराहुतिकालपर्यंतंनजीविष्यतीतिसंभा
वनायदिस्यात् । तदातत्कालमेवप्रातरग्निहोत्रंहोतव्यं । यदिसायंहोमारंभकालएवयतनयजमानस्या
मरणशंकाशात् । तदाएकतंत्रेणहोमद्वयंकुर्यादितिवासुदेवः । अकालेकृतमपिपुनःस्वकालेनकर्त
व्यमेव । एवंपौर्णमासेष्ट्यनंतरंप्राग्दर्शाद्यदायजमानस्यमरणशंकास्यात् । तदातदैवामावास्येष्टिंकु
र्यात् । तत्रपौर्णमासेष्ट्यनंतरंयस्मिन्दिनेऽमावास्येष्टिंक्रियतेतद्दिनात्प्रारभ्यदर्शेष्टेःप्राग्यावन्तःसा
येप्रातर्होमास्तांस्तंत्रेणजुहुयात् । ततःपिंडपितृयज्ञवर्जितामामावास्येष्टिंकुर्यात् । पिंडपितृयज्ञस्यदर्शा
नंगत्वात् । एवंवैश्वदेवपर्वणिकृतेयजमानस्यमरणशंकायांवरुणप्रघाससाकमेधशुनासीरीयाणा
मेवसमापनंकुर्यात् । सर्वपक्षेरात्रौमरणशंकायांप्रातराहुतिरेव ॥ तथाचानुपदसूत्रे ।तद्वेद॰ परपक्षे
प्रयाणशंकेतेयावत्योऽपरपक्षस्यातिशिष्टारात्रयःस्युस्तावतोसायंप्रातराहुतीःप्रतिसंख्यायहुत्वाप्र

स्याहुत्याभावादास्येन हविशेषहमसमापयेपुरेवमयज्ञविलोपइति। पूर्वपक्षेचेद्रात्रौ प्रातराहुतिरेवेति। तथाच कात्यायनस्मृतौ। पौर्णमासे कृते यागेमुमूर्षुर्यदियाज्ञिकः। दर्शयागस्तदैवस्यादपकृष्याहुतीः पृथक्। सायंत्वश्वयाः। प्रोक्ता दर्शाभ्यंतर एवचेति। तथाच त्रिकांडमंडनः। पूर्वपक्षेतुरात्रौचेत्स्मृतिशंकाग्निहोत्रिणः। सायंहुत्वातदैवायजुहुयात्। प्रातराहुतिं। यदित्वपरपक्षेस्यान्मृतिशंकाग्निहोत्रिणः। हुतीवशिष्टाःपक्षेस्मिन्जुहुयात्सकलाहुतीः। दर्शेष्टिंचनत्वराकुर्यादिष्टिर्यदिनसंभवेत्। देवतानांप्रधानानामेकस्यपृथक्पृथक्। पुरोनुवाक्यायाज्याभ्यांचतूरात्नाध्वताहुतीः। जुहुयादेवमन्यत्रसर्वंचाऽ। पदिहूयते ये च्छायवमध्येस्यात्स मरणसंशयः। अवशिष्टेष्टिदेवेभ्यस्तत्संख्यानि ध्रुवतानि चातचुर्गृहीतान्येकत्रगृहीत्वा चमसेसह। पुरोनुवाक्यायाज्याभिःपूर्ववज्जुहुयात्पृथक्। चातुर्मास्यसमापनेपिविशेषमाह सएव। चातुर्मास्यांतरालेचेत्स्वामिनोमृतिशंकने। तत्रोत्स्यपर्वपर्यंतमग्निहोत्राप्यशेषतः। तदैवकुरुते दर्शापौर्णमासान्च नपि। चातुर्मास्यावशिष्टानि पर्वाण्येवंसमापयेत्। पश्चात्कालेपुरोडाशांनिर्वपेत्पशुदेवतं।

ऽग्निहोत्रमथ वा कुर्यात्सर्वाहुतिमथापि वा ॥ आहिताग्निः कदाचित्तु कृष्णपक्षे मृतो यदि । तदा शेषाहु
तीः सर्वा जुहोतीत्याश्वलायनः ॥ अन्ये तदैव दर्शेष्टिं कुर्युः शुक्ले मृतेस्य तु । शुक्लपक्षे निरोपेतस्येत्युहेति
प्रातराहुतिमिति ॥ तथा च यः आहिताग्नेर्धर्मः स्यात्स औपासनिकस्य तु । अशक्तस्य पत्नीयजमानकर्तृ
ककर्मलोपेन दोषः ॥ तथा च मंडनः ॥ अशक्तस्याथ यजमाने चेत्पत्नीकर्म च लुप्यते । न तावता क्रतुर्भ्रेषुः स्या
दाथर्वणस्त्वइति ॥ ॥ अथ पदार्थक्रमो लिख्यते । शुक्लपक्षे सायंहोमानंतरं यजमानस्य मरणशंकायां
तदैव प्रातर्होमः कार्यः ॥ अर्वहोमद्रव्याहरणानंतरं प्रागुन्नयनात् । यजमानमरणे होमस्य स्वर्गहेतुत्वेप्रसि
प्पहाहुः । ततः परमाहवनीये । एवं कृते यदा प्रातर्होमकालपर्यंतं जीवति तदा पुनः स्वकाले प्रातराहुति
र्न भवत्येव । कृष्णपक्षे रात्रौ मृतिशंका चेत्प्रातराहुतिं पृथगुद्धृत्वा ॥ तद्दिनादारभ्यामावास्येष्टिपर्यंतानां सा
यंप्रातर्होमानां तंत्रेणानुष्ठानं कुर्यात् । ततः पिंडपितृयज्ञवर्जितामामावास्येष्टिं कुर्यात् । सकले संभवे आ
ज्यसंस्कृत्य पुरोनुवाक्यायाज्याभ्यां स्वस्वहविषा तदसंभवे च केवलेनाज्येन चतुर्गृहीतेन प्रधानदेवतानांत्या

दे०व०२५
॥६९॥
॥६८॥

गमात्रं कुर्यात्। नस्याप्यसंभवे प्रतिदेवतं पूर्णाहुतिं जुहुयात् अग्नये स्वाहा अग्नीषोमाभ्यां स्वाहेंद्राय स्वाहेति
असंनयतस्तु अग्नये विश्वेभ्यो देवेभ्य इंद्राग्निभ्यामिति। एवमेव पक्षादि कर्मसकलं कर्तव्यं। चरुहोमासंभवे प्रधा
नदेवतानामाज्याहुतिमात्रं वा। एवं कृते यद्यमावास्यापर्यंतं जीवति तदाऽमावास्यायां केवलं दक्षिणा
ग्निमुद्धृत्यान्वाधानं विना पिंडपितृयज्ञः केवलः कार्यः। न दर्शस्याशनं। नामावास्येष्टिः कृतत्वात्। स
कले दर्शे क्रियमाणे यो हविर्ग्रहणानंतरं प्रागासादनान्मरणे हविषां गार्हपत्ये दाहः। आसादनादूर्ध्वं म
रणे आहवनीये दाहः। अत्राश्वलायनब्राह्मणे विशेषः। तद्यदुपर्यु आहिताग्निरुपवसथे म्रियेत कथम
स्य यज्ञः स्यादिति नैनं याजयेदित्याहुरनभिप्राप्तो हि यज्ञो भवतीति तद्यदुपर्यु आहिताग्निरधिश्रितेऽग्नि
होत्रे सांनाय्ये वा हविःषु वा म्रियेत का तत्र प्रायश्चित्तिरत्रैवैतान्यनुपर्यादध्याद्यथा सर्वाणि संदह्ये
रंस्सा तत्र प्रायश्चित्तिः। तद्यदुपर्यु आहिताग्निरासन्नेषु हविःषु म्रियेत का तत्र प्रायश्चित्तिरिति याभ्य   ६९॥
एव देवताभ्यो हवींषि गृहीतानि भवंति ताभ्यः स्वाहेत्येवैनान्याहवनीये सर्वहुतानि जुहुयादिति। केचि

त्वाद्यपक्षे मृतस्यापि अमावास्येष्टिमेव कुर्वंति न तु सपर्यंतं पक्षहोमं। एवं चातुर्मास्यादीनामप्यारब्धानां समा
पनं। कार्यं तत्र वैश्वदेवपर्वणि कृते ऽन्यपर्वपर्यंतं समासविधानेन यथाकालं पक्षहोमं कृत्वा पक्षांते इष्टिं कृत्वा
पुनः पक्षहोमं पक्षांते इष्टिं पुनरप्येवं पुनरप्येवं कृत्वा वरुणप्रघासाख्यं पर्व कार्यं। ततः पक्षहोमपक्षांतेष्टीः
कृत्वा सकृमेधान् कृत्वा तत्कालमेव शुनासीरीयं कुर्यात्। तस्योत्सर्गपक्षे तदानीमेव विहितत्वात्। तत्रा
पि पक्षहोमेष्ट्यादेरसंभवे वरुणप्रघासाद्येकतंत्रेण कुर्यात्। तस्याप्यसंभवे यथासंभवेनिष्ट्यादितैर्हविर्भिः
प्रधानयागमात्रं कुर्यात्। तस्याप्यसंभवे चतुर्गृहीतैः राज्यैः पुरोनुवाक्यायाज्याभ्यां सर्वान् प्रधानयागान्कु
र्यात्। तदसंभवे पूर्णाहुतीं जुहुयात् प्रतिदेवतममुष्मै स्वाहेति मंत्रेण। एवमेव पशुसोमयागाद्यारब्धं अं
तरा मरणाशंकायां यथासंभवं समापनं कर्त्तव्यं। मरणात्प्राक्चेत् समाप्तौ मरणांतमेव कर्म भवति कर्त्तुरभा
वात्। दुर्बलत्वावस्थायां कृतस्नानं शुद्धवस्त्रमुक्तं भूमौ बर्हिरास्तीर्य प्राक्शिरसं दक्षिणशिरसं वा निवेशयेत्। पु
त्रादिरारण्यकपुरुषसूक्तादि श्रावयेत्। वैतरण्यादिदानामरणानंतरं मृतस्याप्लावनं। एवं च स्त्रियस्तत्का

वस्त्रांतरं परिधापनं। चंदनपुष्पादिभिरलंकरणं। अतऊर्द्ध्वं सर्वमपसव्येन दक्षिणाभिमुखेन कार्यं। स
कृत्स्नकृत्स्नं संस्कारान्कृत्वा दाहार्थं मंत्रापजाग्न्यर्थमित्याहवनीयदक्षिणयोरुद्धरणं। तृणचूर्णगोमयचू
र्णमुक्तानां कृतचिह्नानां तिसृणां स्थालीनां गार्हपत्याहवनीयदक्षिणाग्निषु क्रमेण तिस्र एव स्थालीरेव
वाद्यति प्रेषं सर्वकर्मधिश्रयणानंतरं ऊर्ध्वं क्रांतिश्राद्धं। तदनंतरं द्वारदेशे श्राद्धं। धनिष्ठापंचकमध्यमरणे व
ज्रमौक्तिकवैडूर्यपुष्परागेंद्रनीलकमिति पंचरत्नं मुखे मुक्तोवहं वपुर्यामिति मंत्रेणाहुतित्रयं। ततो। निर्हर
णादि। ततो हारिद्रे पावस्त्रेणाछाद्य गृहान्निर्हृत्यानस्तिमृतस्य स्थाने। गार्हपत्यादीन् स्थालीस्थानेन
मि कुर्यात्। सव्यावसव्यावपिपात्रांतरे कृत्वा तत्र स्थाप्यो दृषदश्मघ्नदर्भतिलसर्वयज्ञपात्रसमहि
रण्यपशाकले धनादि अनसि कृत्वा दक्षिणादिशं गच्छेति। यमसूक्तमयेताध्यायं ठेनोगच्छेति सपिंडाः या
ग्रामस्य पूर्वद्वारेण बालस्य हरणं। ग्राममध्यश्मशानयोरर्द्धमार्गे विश्रामश्राद्धं। ततः श्मशानभूमिं प्राप्य श
वस्य शनैर्भूमौ स्थापनं। ततश्चैतिस्थानश्राद्धं। ततः पुत्रदेशस्वनं। शवस्य स्नापनं। ततः सर्वस्य शुचो

ह्णीरिण्या हृद्दृत्यस्य कृतस्य कृन्द्रसंस्कारान् कृत्वा गार्हपत्याहवनीयदक्षिणाग्नीनां भूमौ स्वस्वस्वरे स्थाप
नेः। सभ्यावसथ्ययोश्चितीरीश्चो ग्न्यादिशोपे च सुपक्रमेषु। उत्तरतः सभसछ पक्रमेषु वा स्थापनं। तथा च शाखा
यनः। सभ्यावसथ्या वाहिताग्नेर्हानं कर्मणि न प्रयुज्यते चितापदेशान्मागृहीत्यां दिशि पंच पक्रमात् तीस्रो
त्तरजनीति। तथा पात्राणि तु प्रयुज्यंत इति। प्रक्रमो त्रपदिकः। ततो गार्हपत्याहवनीययोर्मध्ये प्रागावृतो
काष्ठे चितिं कुर्यात्। मृतस्य केशश्मश्रुकृनखलोमानि कृंतनं। विपुरीषकरणं वा। केशादीनां भूमौ निख
ननं। विपुरीषपक्षे प्रक्षाल्यांतराज्येनांजनं। सप्तसु प्राणायतनेषु सुखेदक्षिणोत्तरनासिकाचक्षुः श्रो
त्रेषु यथाक्रममेकैकहिरण्यशकलप्राशनं। चितौ प्राग्नीवमुत्तराल्लोमकृष्णाजिनमास्तीर्य तस्मिन्नाकेशि
रसमुत्तानं प्रेतं मानेनिदध्यात्। अत्र वा हिरण्यशकलप्राशनं। ततः करे पिंडदानं श्मशानवासिदेवतानां चा
ततः पात्रासादनं। सर्वाणि पात्राणि पागग्राणि नु ज्ञानानि च सव्यहस्ते उपभृतं उरसि ध्रुवा दक्षिणपाण्यां नासा
पोर्वेके कृतः स्रुवः। प्राशित्रे कर्णयोः। शिरसि कः प्रणीतश्च मसः। कपालानि शिरसि वा। पार्श्वयोः भूत्वेड

दे.व.२५
।२७।।

दूरेदृषद्धान्यमुक्ताउदूखलं।अग्निसमीपेशम्या।ओंडसमीपेअरणीउदगग्रे।तत्समीपेअधोमुखमुत्तरतउलूखलमुशलंच।
आज्यस्थालीपिष्टपात्रीउपवेषडवत्तास्त्रिश्रुतावहानपुरोडाशपात्रीपीठपूर्णपात्रकूर्चप्रमुखानिसर्वाणिय
ज्ञपात्राणिपूर्वैर्मिध्ये।पात्रत्वाविशेषात्।आज्यस्थालीचमृन्मयीचेदप्रसक्षेप्यासर्वपात्रयांते।स्नानपात्र
पात्रअरणिसहितानामप्पूर्वैर्मिध्येसादने।वारुणप्रघासिकानांच।मन्त्रयाज्ञमयानामप्सुप्रक्षेपः।अप
ज्ञमयानांब्राह्मणायदानमेप्सुप्रक्षेपोवा।चमः।अग्निभिश्चितेराहीपने।आज्यसंस्कृत्यपरिस्तरणसमित्पू
र्वकमाहवनीयेसकृद्गृहीताहुतिहोमः।अस्मात्वमितिमंत्रेण।असावित्यत्रप्रथमैकवचनांतेमृतस्यनामग्र
हणे।स्त्रियामप्यस्यामंत्रस्यमहिमन्त्र्येवप्रयोगः।सूतिकायामरणेविशेषः।सूतिकायांमृतायांकुंभेउद
कंकृत्वातत्रपंचगव्यंप्रक्षिप्यापोहिष्ठाद्यृमापश्च्यादिपुण्यर्गिभिरभिमंत्र्यब्राह्मणानुज्ञयापंचदशप्राज्या
पत्याकृत्वाकुंभोदकेनशतकृत्वस्तांस्नापयित्वावस्त्रांतरेणसंवीवेष्टयित्वादाहःकार्यः।उदक्यास्तूतिकोवापि
येप्रेतेस्पृशंतितस्याप्येषएवविधिः।रजस्वलायामरणेप्येवं।इदमग्नयइतित्यागः।ततोजुहुतेनत्सरयित्वाद

क्षिणहस्ते साद्यं ति प्रागग्रं।। स्रुवं सव्यनासिकायां। स्फ्यं दक्षिणे हस्ते। चितेः परितो दक्षिणाग्नेर्बहिर्निरस्ता
दनो ततः स्कंधे कुंभे कृत्वा। ततः पादतः आरभ्य चित्तिं परितो अप्रदक्षिणं धारां दद्यात्॥ ॥अथावसथ्याग्निसे
वेधिपात्राणां प्रतिपत्तिर्लिख्यते। दक्षिणाग्निः संमृते चितौ निधाय मुखविदेषु हिरण्यशकलप्राशने। शिरसि च
समस्तं पार्श्वयोः शूर्पं ऊरुयोररणी प्रोक्षणीपात्रादीनामेतरेणोरूप्रक्षेपः। वक्षौबीत्योश्च सन्नयादीनामेभ
सि। अयसत्वं ज्ञात्वाद्य दक्षिणत श्छिन्नाया अग्निदाने। समिद्वर्जं स्रुवेण स्मार्त्तमित्याज्याहुतिहोमः। दक्षिण
नासिकायां स्रुचं। स्फ्यं दक्षिणहस्ते शेषमाहिताग्निवत्। आहिताग्नेरपि पूर्वं स्मार्त्तयात्रप्रतिपत्तिं कृत्वा पश्चा
त् श्रौतपात्रप्रतिपत्तिर्भवतीति कर्मप्रदीपे शाट्यायनवचनेनोक्तमस्ति। तदपि युक्ततरं। तथा च कात्यायनः। एवमे
वाहिताग्नेस्तु पात्रन्यासादिकं भवेत्। कस्माजिनादिकं चात्र विशेषः सूत्रचोदित इति। तथा च शाट्यायनिनः। पा
त्राणि षु प्रयुज्यंत इति॥ ततो नये हत्मे स्योदकसमीपे तडागादौ गत्वा समीपस्थ संयुक्ते विद्यासंयुक्ते उत्तरदानाभि
ज्ञ मिशालकोऽवाउदकं यावते उदकं करिष्याम इति मंत्रेण। अशातवर्षे लरते कुरुध्वं मा चैवं पुनरिति प्रति वचनं।

देव०२५ ततऊर्द्धमत्र ते कुरुध्वमिति। ततएव बन्धवः प्राचीनावीतीनः स्नात्वा र्थमुदकेप्रविशन्ति। ततः सप्तमहस्तानामिक
॥७१॥ यात्त्रस्नीमुदकमपनोदयोत्सृज्य प्रेरयित्वा अनयः शोशुचदघमिति मंत्रेणोदकमभ्येद्। दक्षिणाभिमुखा निमज्जे
ति। स्नांति। ततः प्रेतमुद्दिश्यामुकगोत्रामुकप्रेतैतत्तेउदकमित्यंजलिना दक्षिणाग्रान्कुशान्कृत्वा सति
लमुदकं सकृत्त्रिर्वाप्रसिंचेति। ततः शाड्वलवति बालतृणमुक्ते शुचिप्रदेशे उपविश्य संपिंडाः संसारानित्यतो
ख्यापयेतः॥ पुत्राहीनांशोमपनुदेति। ततः कनिष्ठानग्रतः कृत्वा पश्चाद्नलोकयेतः पेक्षिभूताग्रामसमध्ये आयां
ति। आगत्य गृहद्वारे निंबपत्राणि विदस्यावम्योदकमग्निं गो। पायं गोरसर्षपोस्तैलमालभ्य पाषाणस्योपरि
पादके कृत्वा गृहं प्रविशेति। वर्षादिना चिताशमने विहितारणिपात्रादिकाष्ठेनाईंदग्धेमंथनं। तदलाभेश्र
न्येन कष्ठेनदग्धं शोषेणामंथनं कृत्वा शोषस्य दाहः कार्यः॥ अथवा शोषस्याप्सुप्रक्षेपः॥ अथवा लौकिकेग्नौ
भूर्भुवः स्वः स्वाहेति धृताहुतिं स्रुकवा चाहुत्वा। तेन लौकिकाग्निना दाहः शोषस्य॥ पत्नीयजमानयोर्मध्ये य
स्यपूर्वं मरणं तस्य वैदिकाग्निना दाहः। पश्चान्मृतस्य लौकिकाग्निनेन्येकपक्षः॥ अथवा यजमानस्य पूर्वं मर

७१

णे गार्हपत्यस्योल्मुकं दृष्य कृत्वा न मुल्मुकं लौकिकाग्न्योः समभ्रोप्य्यारस्यि। स्वच्छमापत्नी मरणाद्वारयेते।
मता निर्मथ्य तेन हात्या। इति द्वितीयः। अथ पत्याः पूर्वमरणे यदि पत्युः पनर्विवाहाधानयोः शक्तिर्न भव
ति। तदा गार्हपत्यैकदेशेन हात्यासि मिथ्यवा केनि ज्ञात्त पत्नी ज्येष्ठायां जीयत्यां गार्हपत्यैकदेशेन वा हात्या
सर्वाग्निनिर्वात। अत्र सहैव कृताधानाद्वितीया पत्नी न्येष्ठायां जीवत्यामपि सर्वाग्निभिर्दहत्या। आधानानंत
रं पश्चादपरिणीता द्वितीया गार्हपत्यैकोदेशेनेनेति केचिद्विवेकमाहुः। भार्यां दहेद्वैतोग्निनादिभिः। जीवं
त्यां प्रथमायां तु पुरायान समं हितं दिति यत्तदाधावनेनतु प्रविष्टद्वितीया द्विषयमिति स्मृतिचंद्रिकायां।
यावज्जीवं कुशपत्नी सुवर्णपत्नी वा कृत्वा नित्येष्ट्यग्निहोत्राश्रयणानि कुर्यात्। पुनरपारिणयनसंभवेपि
विकल्पेन पत्न्याः श्रौताग्निभिर्दाहः केवलेनावसथ्येन वा पत्नी दाहः। तस्मिन्पक्षे आवसथ्यस्य केवलस्य
पुनराधानं श्रौताग्नयेस्तु नवा। आश्वलायनब्राह्मणे। न हाहरपत्नीकोप्य ग्निमाहरेन्नाहरेदित्याहुर्यदि ना
हरेद्दत्तद्वापुरुषः कोनद्वापुरुष इति तदेवात्र पितृपितृत्वं मनुष्यभवतीति तिं तस्मात्स्वपत्नीकोप्यग्निमा

देव०२५
॥७३॥

हरेत्॥ तदेषा यज्ञगाथाभिगीयते। यजेत सौत्रामण्यापत्नीकोप्यसोमतः॥ मातापितृभ्यामनृणार्थं यजे
त वचनाच्छ्रुतेरिति तस्मात्सौमिकं याजयेत्। तस्मादपत्नीकस्याधानं कुर्वंति अपत्नीकोग्निहोत्रं जुहोति श्र
द्धा पत्नी सत्यं यजमानः श्रद्धया सत्येन च मिथुनेन स्वर्गं लोकं जयतीति॥ उक्तं गार्ग्येह्यर्माध्यमताधानेका
र्ये। तत्रापसव्येन दक्षिणामुखेन सर्वं कार्यं प्रेतस्य रक्षाभ्यासनस्थापने अग्न्यगारकरणं। खरसंस्का
रः। गार्हपत्यस्य पश्चात् येस्याग्नेय इति मंत्रेणामथित्वा गार्हपत्यस्थापनं। येस्याग्नयो जुहुतो मांसका
माः संकल्पयंते यजमानमामकेपि वठन्तेह वीष्यभ्युद्दीपते। ते स्वर्गलोकमिमं प्रेतं नयंतु॥ इति मंथन
मंत्रः। ततस्तूष्णीं शास्यमृद्दत्वाज्यं संस्कृत्य स्रुचि द्वादशगृहीतं गृहीत्वाहवनीये तूष्णीं हुत्वा दक्षिणा
ग्निमुद्धृत्य सदीपनवत्यधिश्रयणादिहाहं कुर्यात्॥ उत्सानाग्रे रणिसमारोप एव। अरण्योरभावे चा
न्येरणी। आनीयारण्योरुपरि दक्षिणं प्रेतपाणिं कृत्वाध्ययेत् इदं चि समनारोपमंत्रपुत्रादिर्जपेत्। त   ॥७२॥
तो मन्थनाग्न्याधानं कृत्वा पूर्ववद्दहेत्। आपस्तंबः॥ यद्याहिताग्निरन्यशश्चाग्निर्विधुराग्निश्छित्वाग्निर्वा

प्रमीयेत तेन मन्थनत्रेताग्निभ्यो दहंति तस्य प्राचीनावित्यग्न्यायतनान्युद्धावोऽस्य यजमानपतेनेप्रेतं निधा
य गार्हपत्यायतनेऽरणी संनिधाय मंथनियेऽस्याग्नयो ऽङ्गातोऽमां संकामास्वेकल्प्यं यं ते यजमानस्मा संजायतु ते ह विषे
मा हिताय स्वर्गं लोकमियं प्रेते नेयं त्विति तूष्णीं विहत्य द्वादश गृहीतेन स्रुचं पूरयित्वा तूष्णीं हुत्वा प्रेतेमत्यो ऽस्येत
हादि कर्म प्रति पद्यत इति अथाग्नौ समरूढे यजमाने मृते ऽरण्योः प्रेतस्पर्श कृत्वाग्निमथित्वा तूष्णीमाहवनी
यमुद्धृत्याज्यं संस्कृत्य द्वादश गृहीतेन तूष्णीमाहवनीये हुत्वा खाधिश्रेयणा अथाग्नि षु शान्ते ष्वरण्योर्नाशे स्वामि
नो मरणेऽन्येऽरणी आनीय प्रेतहस्तस्योपरि निधाय समारोपमंत्रं पवित्वा मृताधानं कृत्वा खाधिश्रयणा
दि कुर्यात् ॥ ॥ सर्वेसेता पजाग्निनाशे गार्हपत्यं मथित्वाहवनीयदक्षिणाग्नी विहृत्य प्रायश्चित्तं कृत्वा पुनरुद्धृ
त्यास्वादिश्रयणं कुर्यात् ॥ स्थाली स्थाग्न्यनुगमे स्थाली स्थ एव दक्षिणाग्नाशे नैमित्तिक होमो भूमौ निधायवा ॥
एकस्य गार्हपत्यस्य नाशने मथित्वा नादिष्ट हुत्वो खां श्वर्व वदधिश्रित्यो सादयत् । आहवनीयदक्षिणाग्न्योरे
कनाशे वानादिष्ट होमार्थं समुद्धृत्य तद्धुत्वा पुनरुद्धरणमात्रं न पुनरुषा ॥ मधिश्रित्य संतापेनो पशांतमुत्पाद

देव०२५ येत्॥ ७॥ ॥ततो दाहाच्चतुर्थ्यातिथौ अस्थिसंचयनं सज्ञं कर्म भवति। तत्र श्राद्धव्यतिरेके वा त्रिप्रभृतीनयु

॥७३॥ ग्मान्। ब्राह्मणान्भोजयित्वा पत्रस्य वृंतेन तस्य गुल्मान्यस्थीनि प्रकटीनि कृत्वा अंगुष्ठकनिष्ठिकाभ्यां भान्यस्थी

निगृहीत्वा गृहीत्वा पत्रपुटे वटपलाशादिपर्णपुटे प्रक्षिपति। शम्याचकाः कर्दमं च भस्मराशौ प्रक्षिपति। शमीश

ब्देन शाखोच्यते। तस्य पर्णानि वा अवकाः शैवालः। कर्दमः कुथितामृत्तिका यज्ञकर्दम इति चेति। केचित्। ततः पत्र

पुटस्थान्यस्थीन्याज्येनाक्त्वा कर्पूरागुरुचंदनकस्तूरिकाकेसरादिसुरभिद्रव्यैर्मिश्रयेत्। ततआग्नेय दिग्

मुखकोणां कर्षूं खात्वा तस्यां कुशास्तरणं अग्ने पाग्वमे वटखात्वा हरिद्रायारक्तं वस्त्रखंडं च शस्तीर्यवा कर्ष

स्यनेनमंत्रेण तस्मिन्हारिद्रे वस्त्रे अस्थीनि प्रक्षिपति। एतद्वाजसनेयकं विधानं। वाजसनेयशाखानुसारि।

अथ शाखांतरीयं त्वामनसा र्त्तेन वाचा ब्रह्मणा त्रयात्रया विद्यया पृथ्व्यामक्षितायामपां रसेन निवपाम्य

मुकसगोत्रामुकशर्मन्निति अनेन वा मंत्रेण कर्षामस्थिप्रक्षेपः॥ ॥पितृमेधकारिष्यान्कुंभे अस्थिसंचयनं ॥७३॥

करोति न कर्षु कुंभापि कुशानास्तीर्य हरिद्रं च सुखंडं वास्तीर्यास्थीनि तत्र प्रक्षिपेत्पूर्ववन्मंत्रेण। तस्य कुंभस्य

लक्ष्मी सुगुप्ते प्रदेशे निधानं। एतत्सर्वास्त्रियां त्वापि समानं। अविशेषात्। प्रोषितस्य यजमानस्य मरणे जा
ते संनिकृष्टे चेच्छरीरमेव तैलद्रोण्यामवधाय शकटेनाहरेत्। विप्रकृष्टे देशे यजमानो मृतश्चेत्तदा तन्निर्मथ्येन
दग्ध्वा कृष्णाजिने स्थीत्स्युपनेत्याहृतेन वाससा प्रच्छाद्य दीर्घवंशे प्रबध्य भूमौ निधानमकुर्वंतः प्रयत्नात् आहरंति
। ततो ग्रामसमीप आगत्य सीमायामेव मृतस्य शरीरं वा अस्थीनि वा स्थापयेयुः। न ग्राममध्ये अग्निसमीपे आन
येयुः। तत्र विदेशे मरणश्रवणादनंतरं मृतशरीरस्यास्थ्नां वाग्निनिर्वहाहपर्यंतं प्रतिदिनं गृहे सायं प्रातर्होमः क
र्तव्यः। अत एवाहापस्तंबः एतां पप्यिकृतीजने प्रमीतस्यां भिवान्यवत्सायाः पयसाग्निहोत्रं जुहुयादाशरीरस्या
ग्निभिः संस्पर्शनात्। न च सर्वं तूष्णीं क्रियेतेति तथा च त्रिकांडमंडनः। देशांतरमृतं यावद्देहे पुर्वैदिकाग्निभिः। तस्य
चीकारयेत्तावदग्निहोत्रादकपस्थितमिति आश्वलायनब्राह्मणे। तदा कुर्य आहिताग्निः प्रवसन्म्रियेत क
थमस्याग्निहोत्रं स्यादित्यभिवान्यवत्सायाः पयसा जुहुयुरथाप्याहरेवमेवैनाना। जस्त्रान्जुतइ धीरन्वा

देव०२५ ॥७४॥

शरीराणामाहर्त्तोरिति। आश्वलायनसूत्रे। वहिवाध्वेप्रमीयतेऽग्नयेपथिकृते। तथा। अध्वेप्रमितस्या
भिवान्यवशायाः पयस्याग्निहोत्रं सर्वं हुतं तूष्णीं जुहुयुरासमवायादिति। आपस्तंबसूत्रे व्याख्याने वैवएतामेव
पथिकृतं जने प्रणीतस्य विप्रयुक्तस्याग्निभिस्तस्य मृत इति श्रुतेर्गृहे पाथिकृती पत्नीप्रेरितैर्नृत्विग्भिः कार्या। त
स्यां समाप्तायां नहि हारएवाभिवान्यवत्सां मृत्तचसायायपरवत्सेन दुह्यतो तस्याः क्षीरेण होमः सायंप्रातर्यावद्
नीयशरीरमग्निभिस्त्यते। तेलूक्षेण्यामवधाय शकटेनाहरणं तिनिर्मथ्येन वाहृत्वाकृष्णाजीने स्थीस्कपन
स्याहतेन वाससा प्रच्छादयति दीर्घवंशप्रबध्या निरुधानाः प्रयतामृन्मयभाजना आहरंतीति। ततो निग्राममर्याद
यां पतिथ्याधिकृती विहारमेव तत्समीपं नीत्वा सर्वं कार्यमिति धूर्त्तस्वामि॥ ॥विदेशमरणनिमित्तं परा
कद्दप्रमसौलकुष्ठात्वन्मृत्स्कक्रमपि प्रायश्चित्तपुत्रादिभिर्दाहिद्याधिकारप्राप्त्यर्थं पूर्वं कर्त्तव्यं॥ ॥अथमृताग्नि
होत्रमंत्रस्येति कर्त्तव्यता लिख्यते। तत्र तूष्णीमपसव्येन सर्वं कर्त्तव्यं। दक्षिणाभिमुखेन च॥ सकृत्सकृ ॥७४॥
न्मृसंस्कारा आहवनीयस्थर एव आहवनीयस्यैवोद्धरणं। नदक्षिणाग्नेः। नकूर्चस्थापनं। आहवनीयस्यैवप्र

वेत आरभ्य दक्षिणं संक्षेप परिस्तरं। तत्र पूर्वापरयोर्दिशोर्दक्षिणाग्न्याग्निदर्भैस्तथा निरक्षिणोत्तरयोः प्रागग्राणि।
आहवनीयस्यैव पर्युक्षणं। निवान्यवत्सा दुग्धवाइति प्रैषं। तस्याऽरोहनं। गार्हपत्याद्दुष्टं भस्मादक्षिणतो नि
कृत्य पूर्वेणाहवनीयं दुग्धमाहृत्य तस्मिन्नुष्णे भस्मन्यधिश्रयेत्। अवज्योतनात् सेको न भवतः। भूमिसंलग्नमे
व दक्षिणतो हत्वा दक्षिणतः सकृदुद्वासनं। न त्रिः स्रुक्स्रुव प्रतपनं पाणिना संमार्गः। पुनः प्रतपनं। उन्नेष्या
मीति प्रैषः। सकृदुन्नयनं। अधोमुखेन स्रुवेण स्रुचि प्रक्षेपः। स्रुचो देशस्याधः प्रदेशे समिधं धारयन्दक्षिण
तो गार्हपत्यस्याहवनीयं प्रति हरति। आहवनीयसमीपे उत्तरतो दक्षिणाभिमुख उपविश्याहवनीये कृत्स्नं द
क्षिणाग्रां समिधमाधाय पितृतीर्थेन तूष्णीं यजमानः स्रुवा तूष्णीं सकृत्सकृत्सर्वं स्रुक्कं क्षेपय आहवनीये प्रक्षिपेत्।
अत ऊर्द्ध्वं द्विः प्रक्षेपन्यादिकं किमपि न भवति। समाप्तमेतत्कर्म। एवं मृतशरीरस्यास्थ्ना वा आगमनपर्यंतं मा
ये प्रातः कर्तव्यं। ततः शरीरे आगते गृहादग्नीन्पात्राणि च सीमायां स्थापितशरीरस्य समीपे अस्थिसमीपे
वानीत्वा संतापजाग्नीनुद्ध्याद्यो अंतश्राद्धादि सर्वं वक्ष्याहं कुर्यात्। वृद्धि सर्वा॥ ॥ त्महेतरणां क्रियालोपो

दे.व.२५
॥७५॥

विधीयते। तेषामेव च संस्कर्त्तुर्दोषः श्रुतिरुदाहृत॥ दाहयित्वा शवं तेषां भूयः श्रेव विधर्मकं॥ ॥आहिता
ग्नेर्दुर्मरणे विशेषमाह॥ ॥अंगिराः। वैतानं प्रक्षिपेदप्सु आवसथ्यं चतुष्पथे। पात्राणि तु दहेदग्नौ यज
मानेवृथामृते। वृथामृते अविहितमार्गेण मृत इत्यर्थः। साग्निके पापकर्मणीति चतुर्विंशतिमते। सांप्रतं ।तस्य कश्चित् साठः।
ब्राह्मणस्याहिताग्नेर्विशेषमाह। बुद्धिपूर्वात्मि हंतृणां क्रियालोपो विधीयते। तेषामेव च संस्कर्त्तुर्दोषः श्रु
तिरुदाहृता॥ दाहयित्वा शवं तेषां भूयः श्रेव विधर्मकं। पाराशरः। चंडालेन श्वपाकेन गोभिर्विप्रैर्हतो यदि।
विषविद्धकृतं चेच्चंडालश्रृंगिदंष्ट्रिजलाग्निभिः। नखिसर्पादिभिर्बुध्या दर्पक्रोधादिना मृताः। न कुर्याद्दह
नाशौचेदकमेषां कृतो यदि। नोपतिष्ठति तत्सर्वमंतरिक्षे विनश्यति। गंगायां प्रक्षिपेद्देहं सरित्वन्यासु वा
ततः चेताग्निं प्रक्षिपेदप्सु गृह्याग्निं च चतुष्पथे। यज्ञपात्राणि सर्वाणि लौकिकेनाग्निना दहेत्। तेषां शवा
नां स्पर्शने स्नानालंकरणादिके रज्जुच्छेदाश्रुपातादौ नां ज्ञानात्करणे महासंतापनं। अज्ञानात्तु तप्तकृच्छ्रं। ॥७५॥
एकैककरणे अज्ञानादुपवासः। मत्याकृच्छ्राऽतिकृच्छ्रः। अभ्यासे एवं। आहिताग्निमृतो विप्रो विशेषेणात्र

हातकः॥ अत्र तु विशेषः। अस्थीन्यादाय कृष्णाजिनस्योपरि पुरुषाकारेण स्थापयित्वा मेषरोमभिस्तान्या
च्छाद्य गव्येनाज्येन तान्यस्थीन्यभि घार्याग्निविहरणादि कृत्वा ततः पूर्ववद्दाहः कार्यः। ततः प्रभृति सर्वो
षोडशरात्रे तु सूतके। सूतिकारजस्वलायाश्च विदेशमरणे तत्र प्रायश्चित्तस्नानादि शुद्धिं च विना दाहे कृ
ते तदस्थ्नां प्रायश्चित्तं न दर्विकोस्नापनादिभि कूष्मांडीहोमादिभिः शुद्धिं विधाय कृष्णाजिने निधानादि कृत्वा
पूर्ववत्कृतेपि पुनः कूष्मांडीहोमादिभिः शुद्धिमापाद्य यथोक्तदाहकार्यः। अस्थ्नामलाभे पलाशवृंतानोष
धिकारे त्रीणि शतानि आनीय तैः पुरुषाकारं कृष्णाजिने कृत्वोर्णाभिः प्रच्छाद्य गव्येनाज्येनाभिघार्य पू
र्ववद्दाहः कार्यः। अत्र वृंतानि इषद्दग्ध्वान्येन कृत्वा तेषामेव संचयनं। पितृमेधश्चैतैरेव भवति। इदं च कृ
ष्णाजिनमभ्यनु। दर्शपौर्णमासिकस्य पूर्वं छेवच्छेदेन दाहकाले विनियोगात्। न चास्मिन्पक्षे संचयनं।
पालिकत्वाहर्यलोपाचेति वासुदेवः। अत्र वृंतशब्दः पत्रपरः। अस्थ्य। लोभे पलाशवृंतैः पत्रैः कार्यः। पु
मानप्रीतिकृत्स्नपुराणात्। एवं पर्णनरं दग्ध्वा। रामभट्टस्तु विभवे विहितस्माच्चा। तेन संहतानि पत्राणि ग्राह्याणि

दे०व०२५ ॥७८॥

णीतिवेधकत्ता। एवं पर्णनरं दग्ध्वा त्रिरात्रं राः। केचित्पलाशवृन्तान्येव गृह्यंत इत्याहुः। अत्रैवं वृन्तविभागः। चत्वा
रिंशच्छिरस्थाने ग्रीवायां च दश वै त्रतु। उरस्थाने वा हंते दश बाहुरेष्वसे जरोदरे। बाह्वोः स्थाने शतं दद्यात्त्रिंशति जा
नुजंघयोः। दद्याच्चत्वारि शिश्ने तु षड्वृषणद्वये। पादांगुलीषु तु दश शकल्पये। हास्थिसंग्रहं संचयः पितृमे
धश्च स्मृतस्तच्चापि पाश्चिमिकः। तथा अस्थीनि वै वलभ्यते प्रोषितस्याग्निहोत्रिणः। पलाशोल्लाशपवृन्तानां
षष्ठ्याधिकं शतत्रयं। कृष्णाजिने नराकारं कृत्वा वेष्ट्यानेन तं। ऊर्णासूत्रेण ध्वैवयवपिष्टैः प्रलेपयेत्। तानि
दिग्धपदेव दग्धे तोयं नाम्ना साहाश्वलायनः। अक्रान्त्येन दहे कृत्वा मद्विष्णवे संचयार्थनः॥ ॥इति तथा पर्णनरे दग्धे
पात्रन्यासे कृते मति। गते बह्विनः पुनर्देहायपश्चाद्देहं लभ्यते कुचित्। तदा दग्धदग्धकाष्ठानि तानि निर्मथ्य नेदहे
ताय दद्दग्धं काष्ठं तु नरीयवेन लभ्यते। तदा तदास्थिकं वेडंच प्रक्षेप्तव्यं महाजले। इति। अत्रांशांशखाया नानं
विशेषः। विसमासे चेह पिप्रेयान्नास्ति तस्य समापनं। आहवनीये सर्वहवींष्यनुप्रहृत्यो पोहं त्यग्निनिरिति से ॥७६॥
वेधः। मेहार्यरीमनरवा निमेतस्या। अल्पुसाल्ले। कृत्या। दहिणस्यां दिशि दहिणापवणे देशे दक्षिणा प्राक्प्रवण

वणेवा। अपेतवीतेति पलाशशाखया चितिं मृज्य तस्यां नोत्मृज्याप्सु प्रास्य दक्षिणायां चितिं कृत्वा तस्याः पुर
स्तादाहवनीयं निदध्यात्। पश्चान्निधाय गार्हपत्यं दक्षिणतो दक्षिणाग्निं गृह एवास्य सशाकटेनाग्नयो नीयं
ते यजमानश्च शाखांतरात्। अंतरेण गार्हपत्यं दक्षिणाग्निं च हत्वा चितौ निदध्यात्। उत्तानं प्राणायतने
मुखे हिरण्यं शकलानि प्राणेषु दक्षिणे पाणौ जुहूं। उपभृतं सव्ये। ध्रुवामुरसि। अग्निहोत्रहवणीं कंठे स्रुचो नासि
कयोः। अग्निहोत्रवमेष्टिकं च पात्रं हरणं दक्षिणकर्णे प्रणीताप्रणयनं सव्ये करणे। शिरसि कपा
लानि। अपसुप्यपणः उदरे समवत्तधानीं पार्श्वयोः पात्र्यौ। स्फ्यं दक्षिणे पार्श्वे। कृष्णाजिनं सव्ये उपस्थेऽ
रणी। जिवौरब्धीवतो श्वालूखलमुशले। यथाक्रमं। पादयोः सूर्पादकटे। शाकटान्नावे पात्री पत्न्यो ग्निहोत्रया
ज्ञाणि तत्पवेस्म स्थाली कुर्वीरिति। अवाहिताग्नेः पार्वणपितृयज्ञपात्राणि च। अकल्प्यकत्वात्। नानिरूपतेऽस्य
पत्राज्येन च पूरयित्वा। तानि जुहोरीति सर्वाणि पात्राणि प्रथममेव धृतेन पृषदाज्येन च पूर्णानि कृत्वा ततः सादये
त्। न सादनानंतरं पूरणं। पात्राणामेकमपात्र्यां गयदिगोतानि कार्याणि प्रेतपात्रे च। ततोऽयं वै त्वमस्मादयं। न योनि

द्वि०२५
॥७७॥

स्कृममृतस्ययोनिः।जातवेदोवहस्त्वेनंसुकृतायत्रलोकः।अयंवैत्वमजनयदयंत्वामधिजायतामस्वाहे
तत्रयोदंअग्निभिः।असादितिप्रेचनामयग्रहणंप्रथमोते।त्रपोहंतिअग्निभिःप्रापयंति।इत्या हि ताम्यना
हिताग्न्योर्दाहविधिः।शुभमस्तु॥ ॥शांतिरस्तु॥ ॥आहिताग्नेर्नवान्नप्राशनेप्रायश्चित्तमुच्यते॥यजमा
नःसपत्नीवा।अग्रयणेनाऽनिष्ट्वायदिनवान्नमश्नीयात्।तदा।अग्नयेवैश्वानरायद्वादशकपालंपुरोडाशं
निर्वपेत्।नवस्येतिव्रीहियवयोरुपलक्षणार्थं।ताभ्यांयागविधानात्।तेनव्रीहियवावहुतौनाश्नीयात्।अ
श्नीयाच्चेद्वैश्वा॰नरंनिर्वपेदितिवासुदेवः।आश्वलायनब्राह्मणे।यआहिताग्निराग्रयणेनानिष्ट्वानवान्नं
प्राश्नीयात्सकातत्रप्रायश्चित्तिरितिसोऽग्नयेवैश्वानरायद्वादशकपालंपुरोडाशंनिर्वपेदाहुतिंवाहव
नीयेजुहुयादग्नयेवैश्वानरायस्वाहेति।आपर्वणेनवान्नप्राशनेवान्नहोमेचसमानमेवप्रायश्चित्तमु
क्तं।तथाहि।अग्रयणेऽहुत्वानवंप्राश्नीयादग्नेर्वागमयेत्कातत्रप्रायश्चित्तिःसोऽग्नयेव्रतपतयेष्टाकपा ॥७७॥
लेनिर्वपेदिति॥आग्रयणमकृत्वानवंधान्यंभाद्धादावपिनयात्तत्किल्वकेवहुश्राद्धकल्प्ये।अत्रकारि

का कारः॥ नानिष्ट्वा नवसस्येन पशुना वाग्निमान् द्विजः। नवान्नमद्यान्मांसं वा दीर्घमायुर्जिजीविषुः।
नवेनान्नेनानिष्ट्वा पशुहव्येन चानलः। प्राणानेवाऽत्तुमिच्छेत् स तस्मादाग्रहणं चरेत्। शामाकान्नेन
वाव्रीहीन्यवान्नाग्रयणान्सुरा॥ नमुंजीनेण्ति विस्पष्टं पत्तपार्श्वे निरूपितं। हत्वेव ब्राह्मणेभ्यश्च कृत्वा
वावैश्वदेविकं। अनन्नवान्नमश्नीयादिति बोधायनोऽब्रवीत्। नवाशन निषेधोयं दंपत्योरुभयोः समः
।नवस्यावध्यपेक्षत्वादस्मिन्नवधिरुच्यते। किं यद्दूरं पुराणत्वं नवत्वं कियदंतिकं। सस्यानामवधिर्ज्ये
ष्ठी पौर्णमास्यामध्ये युद्दुरवं। धान्ये तन्नवमित्याहुस्तत्कालाग्रयणं प्रति। तदेव च पुराणं स्याद्दूर्ध्वमा
ण ग्रयणेषु च। यद्वाग्रयणाश्नात्रे तन्नवत्वावध्यपेक्षणे। यकालस्तेषु बुद्धिस्थो सन्ध्योन्यावधयो मताः। प्राव
ट्कालात्परं पक्केशारदाणयपोनवं। शरत्कालात्परं पक्कं वसंताग्रयणेन वं। ऊर्ध्वं वसंतान्निष्पन्नं प्राड्डाग्रय
णेनवं। प्रत्यासनेनरत्नाद्वा स्वयमेवावधिर्भवेत्। यस्मिन्नाग्रयणं कुर्यात्तनौ तदन्तु सेभवं। धान्यं तन्नवमि

दि देव॰ २५ स्याहुरवर्षिक्यकं पुरातनं॥ एवं संतिशरत्कालमात्राग्रयणकारिणः॥ शरत्कालेनवेत्तेयमवर्षिकं पुरातनमि
॥७८॥ ति॥ व्रीहियागस्ययाः कालेपक्वाव्रीहेन संस्कृताः। ओषध्या वनेयागेनयदियागासुराः कचित्। ओषधिंभक्षय
त्यचितच्च वैश्वानरः स्मृतः॥ इति वासुदेवः। तस्माद्व्रीहिपाकसमयादुत्तरकाल्याः पच्यन्ते तासां सर्वासामे
वंयागेन संस्कृतानां भक्षणाधिकारः। यवपाकसमयोत्तरकालेपक्वानां च व्रीहियागसंस्कृतानां भक्षणमिति
याज्ञिकाः। तथा। मनुष्यैरुपजीव्यानां पशुभिर्भक्ष्ययथायथं। तृणगुल्मलतापुष्पपत्रादेर भक्षणमिति च
याज्ञिकाः। मानवे। अग्नये वैश्वानराय द्वादशकपालं निर्वपेद्योऽन्याग्निषु यजेत यस्य वान्येऽग्निषु यजेरन्निति।
तथाऽऽपस्तंबसूत्रे। वैश्वानरं द्वादशकपालं निर्वपेत् यदि पत्नीः संयाजयन्कपालमभिजुहुयादेतामेव नि
र्वपेद्यो दर्शपूर्णमासयाजी स्यात्तमेव निर्वपेद्योऽकृत्वाग्रयणेन नवस्याश्नीयादानीतौ वा एष देवानां य
आहिताग्निरहरहस्यस्य देवा अन्नमदन्ति यदकृत्वाग्रयणं नवस्याश्नीयाद्देवेभ्यो भागं प्रतिप्रैकृत्यमाद्याद्यार्त्तिमा ७८
र्छेदिति। यैरपि प्रियंगुकोद्रवादिभिर्यागो न क्रियते आग्रयणे नाऽनिष्ट्वा तेषामपि प्राशने वैश्वानरो भव

नीतितस्माच्छ्रेयस्यं नाश्नीयादित्याश्वलायनः।नानिष्ट्वापशुनामांसमश्नीयान्नानिष्ट्वाग्रयणेननवाना
मोषधीनांफलानीतिशंखायनः।आहआपस्तंबः।हरितयवशाकशमीधान्यानांफलानामनिष्टेपिप्रा
शनेयथाकामीति।हरितयवाःअपक्वागोधूमाःयत्वन्यदानंसनवंयन्नाप्यनिष्पाकोद्रवमाषामाषादिना
तदपिनदोषयतीति।तथाचापस्तंबसूत्रकारिकायां।याग्रोनक्रियतेयेस्तुगोधूमैर्माषकोद्रवैः।तेषामपि
नवेदेतस्माज्ञानेकेचिद वदन्नवशाकस्यसामर्थ्यात्सामान्येनसमंत्वविदं।वाक्यशेषविरोधात्स्वयदेतन्न
मतेममाश्नसनो यजमानस्तुदेवानामेषपद्यते।तस्मादन्नमदंतस्ययवव्रीह्यादिकेमखात्तस्मात्तदेव
वर्ज्यस्यादन्यत्कामंतुभक्षयेत्।तथापतितस्यभुक्त्वाप्रतिगृह्यापतितामहापातकस्यादयःकर्मानधिका
रिणः।तेषामन्नंभुक्त्वातेषांकिंचित्प्रतिगृह्यवावैश्वानरंनिर्वपेत्।तथाविद्विषाणयोर्वा।विद्विषाणौद्वे
षंकुर्वाणौ।द्विवचनोपदेशाद्योद्वेष्टि।यश्चद्विष्यते।तयोरुभयोर्द्वेष्यद्विषतोःभुक्त्वाप्रतिगृह्यवावैश्वान
रंनिर्वपेत्।अयाज्ययाजयित्वा।मन्वादिभिर्योऽयाज्यउक्तस्तंयाजयित्वावैश्वानरंनिर्वपेत्।अविमेषप्रति

दैव०२५ गृत्स्य वा वैश्वानरं निर्वपेत्। उभयारह्ना। उभयतः इस्क परिशिष्टादधस्ताच्च दं तायेबांतान्पुरुषाश्च द्वीन्प्रति
॥५७॥ गत्य वैश्वानरं निर्वपेत्। यस्याग्निभिरन्यं याजयेपुर्यो वायजेत्। यस्य संबंधिभिरग्निभिरन्यो यजते। यव ऽन्या
ग्निभिर्यजेत ताउभावपि वैश्वानरं निर्वपेतां। यत्त्वस्य वैश्वानरस्याष्टाकपालत्वं संप्रदायेककोचोक्तो। तत्क
ठस्त्रत्रादिष्वप्यस्य वैश्वानरस्येतेष्वेव निमित्तेषु द्वादशकपालस्य दर्शनात्तन्निर्मूलमिति नादरणीयं॥ ॥इ
ति नवाशनप्रायश्चित्तं। अथ हविर्दुष्टिप्रायश्चित्तं। हविषि पुरोडाशादौ समये दग्धे अविशिष्टेऽकर्मार्थ्येन कर्मा
पवर्गो तं संस्थाप्य न दग्धं पुरोडाशचर्वादिकं हविः पुनरन्वाधानादिकर्मापवर्गातं तस्मिन्नेव विहारे कुर्यात्॥८॥
अष्टमीकंडिका। अथ पशोः प्रायश्चित्तान्युच्यंते। यदिह उपाकरणानंतरं प्राङ्नियोजनात्पशुः पलाय्य गच्छेत्। तदा
तत्पलाय्य गच्छंतं पशुं वायो एष ते पशुरित्येवं प्रयोगेण वायुदेवतायै तं पशुं अनुदिश्य संकल्प्याऽन्यं पशुं तेन
एवलिंगेन पशुना समानवर्णं समानवयस्कं च पुनरुपाकृत्याऽलभेत्। नियोजनादूर्ध्वं तु नष्टो यदि प्राप्यते तदाध्व ५७
र्यवं हुत्वा तेनैव यागः कार्यः। अप्राप्तो त्वाध्वर्यवं हुत्वाऽन्येन सदृशेन यागः। यः पशुः पलाय्य गतः सन्वायवे

नुदिश्यःसयदिप्राप्यते तदा तस्यालंभे आहरोन कार्यमिति कर्कः। तस्य नष्टस्य गवेषणे आहरोन कार्यमिति या
ज्ञिकाः॥ ॥यदि यूपे नियुक्तः पशुः प्रयाजेभ्यः प्राक् म्रियते। तदा तेनैव यागः कर्त्तव्यः। अयं तु विशेषः। प्राक्प्रो
क्षणान्मृते आस्योपग्रहणसंज्ञपनप्रैषप्रतिप्रैषाणामभावः। न स्पष्टस्वयंमृतस्य पानिरूढादिषु दक्षिणाग्नौ
होतव्या। सोमे मार्जालीये होतव्या। अत एव ज्ञापकात् धि ष्ण्यविहरणानंतरं वित्तृता अग्नयो धार्या इ
ति गम्यते। अन्यथा मार्जालीयस्याग्नीध्रादाहरणमिति गदाधरः॥ अत्रायं पदार्थक्रमः॥ ॥यदि नियुक्तः
पशुः प्रयाजेभ्यः प्राक् मृतः॥ तदा प्राक् प्रोक्षणान्मरणे आस्योपग्रहणं न कार्यं। दक्षिणाग्नेर्मार्जालीयस्य वाप
रिस्तरणं। परिधीनामासादने स्रुच्चरूपानु-- पस्तृत्पयोश्च। अत्र सर्वहूहोमीकर्म पात्राणां प्रोक्षणं। यस्मिन्न
ग्नौ होमः करिष्यते तस्याग्नेः कल्पनं। परिधिपरिधानं च॥ सोमे मार्जालीयस्य॥ स्रु-- च्चरूपानुपस्तृच्चरूपयो
श्चाधानं। उपवाजनं। संमार्गः। उत्तरवेदावुत्तरं धारानेतरं मृतस्यापि पशो रंजनं। ततः प्रयाजादिकमतिप्र
णीते आहवनीये वरुत्वाशमिताऽन्वारब्धे पशुं नयति। न संज्ञपनं। न तत्प्रैषप्रैषो। चात्वाले रशनाप्रासनादि

देव०२५
॥७०॥

वपोत्खेदनांतं। ततो वपाश्रपण्योरादान प्रभृति तूष्णीं आलंभनांतं। ततः स्रुगादापनादि स्वाहाकृति यागः आहवनीये
समंत्रकः। शेषेण निरूढे ध्रुवादीनां सोमे वपादीनामभिधारणं। ततो जुह्वामुपस्तीर्य हिरण्यमवधाय वपमवदाय पुनर्हिरण्यमवधाय यथाविधानं समकृत् द्विर्वाभिधार्य याज्यानुवाक्या वर्जं ये ईजानाः पितर इति मंत्रेण
निरूढादिषु दक्षिणाग्नावुपतिष्ठेच वपां जुहोति। सोमे मार्जाल्लीये जुहोति। इदं यमायेति त्यागः॥ यत्र वपाहोम
स्तत्रैवाग्नौ वपाश्रपण्योरनुप्रास्रानं तूष्णीं। ततः स्रुक्तूष्णीं मार्जनं। ततो निरूढेदिषु पशुपुरोडाशादिकर्म सोमे
चमसार्पणादि॥ ॥पश्चादौत्तरयादीनाम वदानानां मध्ये एकस्यावदानस्य नाशे दोषापहारादौ द्वयोर्बहूना
वा नाशादौ एकप्रभृतिकतिपयावदानसम्भवे अध्वर्युर्वं हुत्वा सोमस्य स्वेत्काल्लाहुतिर्वा चनष्टवकमाध्वर्यु
र्वेहुत्वा नष्टानामवदानानां प्रतिनिधिभूतमाज्यं ध्रुवामाप्याय्याप्याप्य ध्रुवतः प्रत्यवदानं द्विर्द्विराज्यं गृ
हीत्वा अविनष्टवदानैः सहोतव्यमिति संप्रदाय कारिकाकारौ॥ प्रत्यवदाने चतुर्गृहीतं प्राज्यमिति गदाधरः॥
तत्र द्विर्ग्रहणमित्युक्तं। उपस्तरणाभिधारणाभ्यां चतुरवत्तता संपन्नः। एकस्याऽवदानस्य सम्भवे अन्येषां

८०

सर्वेषां सत्त्वद्रयानां नाशे दोषादावेवमेव कार्यं। सर्वेषामवदानानां नाशे तु पशुयागात्तिद्वैरनादिष्टहोम
पूर्वकं पश्वंतरालंभः कार्यः। अथ वा आज्यन देवतायागं कृत्वा समाप्य पुनरन्यन्वाधानादिकर्मापवर्गांते
पश्वंतरेण यागं कुर्यात्। सर्वनाशे हविषां दोषे वा तद्युक्तमाज्येन वा प्रतिसंख्याये देवतेज्या पुनः क्रियाचे
त्कृतत्वात्। हृदयनाशेप्यऽनादिष्टहोमपूर्वकमाज्यमेव तत्प्रतिनिधिभूतं ध्रुवातो द्विरेव देयं। न पश्वंतरा
लंभः। स्विष्टकृदर्थानां सर्वेषां नाशेप्याज्येनैव प्रत्यवदानं द्विर्द्विर्गृहीतेन उपस्तराभिधाराधिकेन यागः।
क्लोमादीनां नाशे त्वाध्वर्यवहोममात्रेणाज्येन तत्कार्यकारणं। प्रतिपत्तित्वात्। जाघनीगुदयोर्नाशे त्वना
दिष्टहोमपूर्वकमाज्येन तत्कार्यं संपादनीयं। इष्टं चेदाज्येन शाखमिति वचनात्। वसायानाशेप्याज्यमुप
देयं। लोहितो वध्यनाशे त्वनादिष्टहोममात्रमेव। वपानाशे त्वऽनादिष्टहोमपूर्वकं आज्येन चतुर्गृहीतेन या
गः। अत्र शाखायनः। अवदाने नष्टे दुष्टे विमथिते वाऽऽज्यं प्रतिनिदध्यादिति। तथा हृदयनाशे अन्यमा

देव०२५
॥८१॥

लभेतेति। तम्हाच्चेचनाशेऽन्यस्यालंभो नदुष्टविमथितयोः। तत्राज्यमेवोपादेयं। अस्मिन्पक्षे नाग्निप्रणया
हीनामावृत्तिः। वपापशुपुरोडाशयोर्न पुनः क्रियाकृतत्वात्। बर्हिषां सर्वेषामवहानानां परित्यागः। भारद्वा
जकेवचनात्। अध्रिगोरावृत्तिः। शासनार्थत्वात्। न प्रैषस्य वचनादृष्टत्वात्। मनोतापर्यग्निकरणानां चा
वृत्तिः संनिपातादिति। यदि पशुः शामित्रामार्यमाणो वा वार्येत नश्येत् ध्वर्युर्वसाहोमहवन्यां सकृद्गृही
तमाज्यं समित्पूर्वकमाहवनीये यत्पशुर्माप्नुमकृतेति मंत्रेण जुहुयात्। इदमग्नये। तत इमं मे वरुणेति द्वि
तीयामाहुतिं सकृद्गृहीतेनैवाज्येन जुहुयात्। इदं वरुणाय। ततस्तत्वायामीति तृतीयं तथैव जुहुयात्
इदं वरुणाय। अयानादिष्टहोमो न भवति। सोमे तु सुत्यायां पूर्वकालाहुतिमाग्नीध्रीये हुत्वा वा चने
कृत्वा यत्पशुरित्याद्याहुतित्रयमाहवनीये जुहुयात्। अग्नीषोमीये तु कालाहुतिरप्याहवनीय एव
होतव्या॥ ॥अथ शाखापनः। आनीते पशौ मृतेऽनुपाकृते न्यमालभेत। विंशत्यस्तकारयेत। उपाकृ ८१
ते वेपमाने यस्मान्द्भीषावेपिष्ठास्ततो नो अभयं कुरु। पशून्नः सर्वान्गोपाय नमो रुद्राय मीढुषे स्वाहे

तिजुहोति। यस्मान्दीषावासिष्टाइत्कपालते वात्र्यमाने। यस्मान्दीषापलायिष्टाइत्कपालते पलाय
मानो यस्मान्दीषान्यसदइत्युपविष्टं। यस्मान्दीषासंजत्ताइत्कपालते स्वयं मृते। पशौ नष्टे मृते पलायिते वा
न्यैतदुपेतद्दुर्णतदेवत्यंपशुमालभेत मृतस्य वर्णं पुरोडाशमवदानानीतरस्य वषट्कारे स्रुपजुहुयात्म
हृत्तेषु प्रयोज्ञेषु हृते तेनैव संस्थाप्यमिति॥ ॥तथा मानवे विशेषः। यदियुपमाद्द्हे। स्वाल्येहाघु
तानस्त्वा मारुतो निर्हंत्विति यथावस्थि स्थितमवस्य परिषेकं कुर्याद्यदि रशनां छिद्याद्देरोहा त्रयस्थि
शातेतवइत्येनया ग्रेथिसंधायेतपैवजुहुयाद्यदि स्वरुर्नश्यत्त्वधितिर्वाऽनक्केऽन्यपूपशाकलं जुहु
मत्कान्स्वरुं कुर्यात्त्वधितिमन्यादेवं चषालमिति। यदि कूर्मेन विंदेत्कर्कं कच्छपमुपदध्याद्यदि तेन विंद
पुरोडाशे कूर्माकृतिं श्रपयित्वा हिरण्यशकमुपदध्यादुभयतो हिरण्यमित्येकइति॥ ॥यदि पशूखा
याःवसाःस्रवेत्। सान्नाय्योखाय्या वा दुग्धं स्रवेत्। तदा तोस्रवेतीमुखां अभिमंत्रयेदध्वर्युनरखा पूंत्र
वतीमिति। सोमे च कालात्कहुनिवाचनपूर्वकं मु वपनयेइत्यभिमर्शनं सर्वत्र भवत्येवहा॥ ॥७॥ ॥

देवः २५
॥८२॥

द्वादशाहादावहर्गणे तंत्रमध्ये आर्द्रस्य यूपस्य निखातस्य प्ररोहणे अंकुरोद्भेवे संछिन्नेह निर्वृढे वत्स बहुरूपं विचि
त्रवर्णः। छागमालभेत। अंतनंतं प्रमित्य कैत्वात्स्रयोगसामा प्युत्तरकाले विरोहणे नैदं प्रायश्चित्तं। तथा
चमूचांतरं। अथ न खलु बहिरवभृथं विरोहणात् देषं मन्यत इति शांखायनः। यूपे विरूढे ऽनपवृज्य त्वाष्टं बहु
रूपमालभेतेति मानवे। सत्रे चैत्यागपवर्गायूपो विरोहे। त्वा मित्यादि॥ ॥काटके। यूपविरूढाः सत्रि
णस्त्वाष्ट्रमालभेरन्मा क्षिप्रस्करुतो ऽप्युवग्न इति द्वाभ्यां जुहुयादुत्तरयायूपमूलं परितापयेदुत्तरया। यूपविरू
ढानि जुहुयादिति। अनेकयूपविरोहणे चैक एव त्वाष्ट्रः कार्यः। तदुक्तं सूत्रांतरे। बहूनपि समानजातीयान्
एकोपासकं कृतमेव विभवेदिति। एवमनेकप्रावभेदानेकदोह विनाशादावपि ज्ञेयं। अग्रैवंकर्मरचना। अहः
समाप्यनंतरं मतिप्रणीतेग्न्यन्वाधानं। द्विरामंतं। ब्रह्मयजमानयोराहवनीयं दक्षिणेनोपवेशनं। व्रतग्रहणा
भावः यजमानवाचंयत्वं। आहवनीयाद्दिनोत्तरयाणांपरिस्तरणं। पात्रासादनं। प्रोक्षणीः संस्कृत्य पात्रप्रोक्षणं।
असंचरे निधानं। कुकुटाहननं। आज्यानिर्वापो वेदबंधः। आज्याधिश्रयणं पर्यग्निकरणं। प्रोक्षणीप्रेषः। अंतः

पात्र्यासादनं। स्फ्योदकस्याहारः। न पाण्योरवनेजनं। स्रुक्संमार्जनाद्याज्यासादनांते त्रिवृद्वेदेः स्तरणं। दर्भ
शरवा स्तरणं इति विशेषः। पशोरुपाकरणादित्वष्टेजुष्टेमिति। त्वष्टे छागस्य वपायै इति विशेषः। पशुपुरोडा
शे प्रणीताज्यभागाः। त्वष्टे पुरोडाशस्यानुब्रूहि। त्वष्टे पुरोडाशं प्रेष्यति। त्वष्टे छागस्य हवि षो हविरिति चात्को
माहीनां नियमः। दक्षिणायाश्च भावः। न स्विष्टकृद्धोमः। त्वष्टुर्वनस्पते रुजिनिं। त्वष्टा वनस्पतिस्तस्मै मनुदत्ता मि
ति व्यूहनेः। त्रीणि समिष्टयजूंषि। समिष्टस्य यजुरंते वहिर्होमः। भूला वभृथः समिद्राधानांतः। प्रणीतावि
मोकः। दासस्य भागः। भागो वस्तपो भाग प्राशनं इति।। ।। अथातुर्वध्यायां गर्भसंस्रावे गर्भसंदेहे च प्रायश्चित्तम
मि। धीयते। संज्ञप्तः पशुरित्यस्मादनंतरं वपामुत्खिदेति शमिताः ध्वर्युः प्रेष्यति। ततो ध्वर्युर्वपापरिवासनांत
रमनुमर्शनं गर्भमिच्छवै इति शमितारं प्रेष्यति। संप्रेषितो नूवं ध्यायाउदरमध्ये हस्तं प्रवेश्य पावर्स्यग्नेन गर्भसंस्रावे
य विलोकिते। गर्भसंस्रावे निश्चित्य शमिता स्थालीं चैवेपर्णीं चोपकल्पयतु तयी वाइतिप्रेष्यति। ततो ध्वर्युः स्था
लीमुल्मीषं चोपकल्पयति। ततो वपायाश्चात्वाल्ला वसेकादिवया मार्जनांतं कृत्वा। ततोन पेक्षमध्वर्युर्यज

देव॰२५
॥८३॥

मानोवागस्याध्वर्युः शमितारंप्रैषद्वयंददाति। निरूढेतेंगर्भमित्येकः। विरूढस्य श्रोणी प्रत्यंचेंनिरूहितवा
इतिद्वितीयः। एकस्यामनुबंध्यायांगर्भानेकत्वेप्यनूहः प्रकृतिवत्‌ति छनूबंध्यास्तुतुभवति। निरूढे
तोगर्भौनिरूहेतानगर्भानिति। एवंप्रत्यंचौप्रतीचइत्यत्रापि। एवंप्रेषितः शमितावशायायोनिप्रदेशंपाटयि
त्वासकलंगर्भंनिष्काशयति। स्थाल्याः प्रचरण्याश्चतूष्णींमामाइन्प्रोक्षणे। गर्भस्यकंठमधस्तादुत्क
त्यास्विदत्वमस्थाल्यानिष्काश्यमानेगर्भेएजतुदशमास्यइत्यभिमंत्रयतेध्वर्युः। मेधश्रावणं। ततः पुरोडाश
दि। तस्याश्चसंमार्गकालेप्रचरण्यास्तूष्णींसंमार्गः। अवदानाधिश्रयणानंतरमुत्खायप्लक्षमेधस्थाल्या
अधिश्रयणं। गर्भमुष्णीषेणावेष्ट्यित्वाशामित्रसमीपेनिदध्याति। ततः शमित्रानुशासनादिमेधस्यतत्र
स्थाभिघाघाराभावः। तूष्णींप्राणदानं। अवदानवदुद्धारस्थिणतोमेधस्थापने। अवदानात्यालभ्यतूष्णींमेधा
लंभः। वशावदानानंतरंप्रतिप्रस्थातुःप्रचरण्यामुपस्तारः। मेधस्यद्विःस्रुवेणावदानं। प्रत्यक्षपस्तारः। मेध
स्यद्विःस्रुवेणावदानं। प्रत्यक्षपस्तारः। सनाभंगः। प्रधानहोममनुप्रतिप्रस्थातुर्यस्येतइतिहोमः।

८३

प्रचरणीमंतरा स्रुपाग्नौ रुत्वा जुहोति स्थानेगत्वा होमः। पुंगर्भे यस्य पतनं। स्त्रीगर्भे यस्योत्तानं। विकृतिषु गर्भा
नेकत्वे ययेस्तैः स्त्रीषु यास्तां ताइति। स्त्रीषु गर्भसमावाये पुंवन्मंत्रः। अविज्ञातेन गर्भेवा इदं वशाये। प्राकृत्विष्ट
कृतः प्रतिप्रस्थाता पूर्वेण यूपं प्रस्थाय गत्वा प्रचरण्यामुपस्तीर्य सर्वमेघवौ मेदायद्धिरभिधार्य पूर्ववदुत्तरतो गत्वा।
स्विष्टकृतमनुपुरुहस्म इति जुहोति। इदं गर्भाय्यातनः समिष्टयजुरंते ध्रुवगतक्रमुपस्तीर्य तस्मीषु गर्भं समवधाय द्विर
भिधार्य शामित्रे प्रथमं ज्ञातेष्वंगारेषु प्राङ्मुखः तिष्ठन्मरुतो यस्येति मात्रेण स्वाहाकारवर्जितेन हुत्वा। महीद्यौरि
त्यंगारेण गर्भसाच्छादयति। इदं मरुन्मंत्रः। अतिरात्रे वाजपेये याहोमे षोडशस्तस्यादि स्त्रीपशुषु गर्भसत्त्वा वरव
मेव ज्ञातव्यं समानन्यायात्। अपस्ते व भावेरहश्रोत्रा च्याइत्यनूबंध्यायां गर्भसत्त्वे प्रायश्चित्तं। अथाग्निहो
त्रे कूर्चासादनोत्तरकाले होमात्प्रागाहवनीये शांत्ये गार्हपत्ये आज्यं संस्कृत्य जुह्वां सकृद्गृहीत्वा गार्हपत्यं परि
स्तीर्य समिधमाधाय प्राण उदानमायगा स्वाहा। इति जुहोति। इति दैक्षप्राणायेति त्यागः। होष्यंतस्याइति वचनान्ते
होमान्तेहोमाद्पूर्वं मिदं। इत्यग्निहोत्र इत्युक्तमास्तेष्याहै। आमन्तेषु पात्रेषु गार्हपत्यहोमात्प्राक् गार्हपत्यः ६

हेव०२५ ॥८४॥

शाम्यतश्चागार्हपत्यंमथित्वासंस्थाप्यतत्राज्यंसंस्कृत्योद्धानप्राणमथगास्वाहेतिमंत्रेणाहवनीयेसमिदाधा
नस्रुवकंसंस्कृज्जुहीतमाज्यंजुहुयात्।इदमुद्धानायेनित्यागः।अथाहवनीयजागरेणोवेत्याद्युपायेनंकार्हपत्य
संपादनेकार्यमितियाज्ञिकाः।मथित्वैवेन्यसेसर्गेदक्षिणाग्निहोमात्प्राक्पात्रासादनोत्तरकालेदक्षिणाग्न्यु
पशमेगार्हपत्ये आज्यंसंस्कृत्यसमिदाधानस्रुवकंसंस्कृज्जुहीतमाज्यंजुह्वागार्हपत्येजुहोतिप्राणउदानम
थगास्वाहा।इदंप्राणाय।ततोदक्षिणाग्निमाहृत्याग्निहोत्रहोमः।पात्रासादनोत्तरकालेवायौवातिप्राग्धो
मात्सर्वेषांत्रयाणामप्यग्नीनामुपशमनेसत्वरंगार्हपत्यंमथित्वास्थापयित्वाप्रतिवातंवातोयोदिशंप्रति
गच्छेतस्यादिशाहवनीयमुद्धृत्यगार्हपत्ये आज्यसंस्कृत्यसंस्कृज्जुहीतेनपरिस्तरणसमित्स्रुविकोवायवेस्वा
हेत्याहुतिमाहवनीयेजुहुयात्।इदंवायवे।ततआहवनीयमुत्पाद्ययथास्थानंस्थापनेकार्यंततोदक्षि
णाग्निमाहृत्याग्निहोत्रहोमः।अथयस्मिन्समयेवायुर्नवाति।तयाप्यग्नयउपशांताः।तदातूर्णंगार्हपत्यं ८४॥
मथित्वाप्रायादिशोवाहवनीयमुद्धृत्यगार्हपत्ये आज्यसंस्कृत्याहवनीयस्यपश्चादुपविश्यस्रुवयमेवतस्य

संस्कृतस्य स्वाऽन्यस्य स्थालीस्थस्यैव पानं कुर्यात्। अग्रत्रसेवमायश्चित्तिरिति सर्वत्राश्रवणान्नैमित्तिकत्व
द्वैधं। नमेप्रहायोक्रमग्निहोत्रविकारत्वमित्तिकर्कयाज्ञिकारिकाकारः। वासुदेवस्य सर्वे चेदित्यस्मिन् सूत्रे
यथानुपूर्व्यं करणं आहवनीयस्य पुरस्तात्। दक्षिणस्य दक्षिणस्यां जोषसमापनायनयनमिति वदन् प्र
धानाग्निहोत्रस्य वायव्याकृत्यैव सिद्धिरिति दर्शयति। निवातं चेदित्यत्र पूर्वोपिथव मंत्रांतरस्यानुपदेशात्
स्त्रीं स्रुग्लीतस्य स्वयं पानं पश्चात्कूर्चे निदधाति तदेतद्धि कृतमग्निहोत्रसेवमायश्चित्तिरिति तथाग्निहो
त्रं सर्वदेवत्यमिति वदनात्मीतरामग्न्यादिनिर्देशो वा द्याः प्रसंत्यस्त्वानात्। तेन वायव्याहुतिः स्वयं पा
नेचैवैकृतेमग्निहोत्रमेव तथा चापस्तंबः। यदि प्राग्धोमकालाहवनीयोनुगच्छेद्गार्हपत्यात्प्रणयेद्य
दि होमकाले प्राणउदानमप्यगादिति गार्हपत्ये जुहुयाद्यदि सर्वेनुगच्छेयुर्न्ते ग्निंमथित्वा यां दिशं वातो वा
यात्तां दिशमुद्धत्य वायवे स्वाहेति जुहुयाद्यद्य वै निवाते मथित्वा विहारं सादयित्वा परेणाहवनीयं यजमा
नत्रपविरूपपि वेदग्निहोत्रप्रत्याम्नायो भवतिविज्ञायतइति॥ ॥ शतपथभाष्यपिमाधवाचार्येर व्याख्या

दे·व·२५
॥८५॥

नमस्ति। अतो विकृतिरूपमग्निहोत्रमेवैतदभ्यस्यकरितेऽपि वदितियुक्तं। धूर्त्तस्वामिकृते भाष्ये। केचित्प्राणदान
इत्याद्याग्निहोत्रप्रधानाहुतयः सर्वाहुतिस्थानइत्याहुरिति। नवातं चेदिस्यत्र सर्वमाहवनीयसंपादमदर्शना
त्समानन्यायेन सर्वेष्वप्याहवनीयाद्यनुगमादिनिमित्तेष्वपि अनुगतस्य संपादनं सर्वमेव कार्यमिति याज्ञि
काः। नैमित्तिकानंतरमेवेत्यन्ये। सायंप्रातर्होमस्य कालातिक्रमेतत्स्थाने आहवनीयमुद्धृत्य मनोज्योतिर्जु
षतामाज्यस्येति मंत्रेण स्रुवेण तज्ज्येन समृद्धहीतेन समिद्धधान सर्वमाहवनीय आहुतिं जुहुयात्। इदम
ग्नमेज्योतिषे इति। अत एवानेकादिनहोमविच्छेदेऽप्येकैवं। सायंकालेग्निहोत्रमहुतं चेदनादिष्टं कृत्वा प्रातस्ता
यमुद्धरणाद्धोतव्यं। उद्धरणकालेऽपि पनिस्तहा मनरवीति लुप्तेहोमे ऽयेतद्दत्सौर्यं मासमाहिषु। तथाग्रयणयुक्ते
तु येतं तुमतीभवेत्। इतिकारिकायां। तथा चमानवे। यथाजस्रं विच्छिद्येतां तद्द्विहोमान्ह्नोत्वाग्नयेतंतुमते
ष्टाकपालं निर्वपेदपित्वाहुर्णाकुतिं कृत्वाना द्वियनहोमात्सायंहोमेन प्रतिपद्यतेति। तथाव्वापस्तंबः। य
स्याग्निहोत्रं विच्छिद्येतव्य होत्रं हे चतुरहे वाग्नये तंतुमते ष्टाकपालं निर्वपेदिति। आथर्वणसूत्रे। अथय

८५

स्यास्तिहोत्रे तृतीये होमकाले विच्छिद्येत कात्र प्रायश्चित्तिः सोऽग्नये तंतुमते ष्टाकपालं पुरोडाशं निर्व
पेदिति॥ २०॥ सत्रं करिष्यामीति संकल्प्य देवान्मानुषाद्वा कारणात्सत्रकरणाशक्तो विश्वजिताऽतिरात्रे
णशाकृतदक्षिणेन यजेत। अत्र परमेष्ठिन इति कालाहुतेरभावः विशेषविधानत्यामान्यस्य बाधात्॥
।यद्दिसत्रार्थकृतदीक्षीणां यजमानानां देवान्मानुषाकरणाद्वपरिसमाप्त एव सत्रेऽत्थानं जायेत सत्रं जा
त सत्रेनैव समापयिष्याम इति बुद्धिरुत्पद्यते। तदा सोमं विभज्य सोमोपक्लप्तं सर्वसाधारणद्रव्यं धा
न्यघृतसोमादिकं विभज्य तत्प्रत्येकं पृथक्कृत्य तेनैव स्वस्वभागेनैव विश्वजितातिरात्रेण सर्ववेदसदक्षि
णेन सर्वपृष्ठेन यजेरन्। सर्वपृष्ठत्वादत्र प्रार्थ्यते प्रात्याग्रत्याग्रत्यंते। सर्ववेदसदक्षिणात्वाद्दृश्वहाभ्योति
ष्टोन्नूबंध्यास्त्रधातव्यं। एवं स्नातीयामासोमक्रयानंतरं क्रियमाणे विश्वजिति सोमं क्रीत्वा सात्रिकं सोमं
तन्मध्ये मिश्रयेत्। तथाचोपन्यासः अथ सत्रे विश्वजित्यन्यं क्रीत्वा सात्रिकं सोमममपिसृजेयुरिति। सत्रार्थं दी
क्षितस्यासमाप्योत्थाने विश्वजितः श्रवणाद्दहीने दीक्षितस्योत्थाने प्रायश्चित्तं उत्थाननिमित्तत्वाच्च

द्वे० २५ ॥८७॥

तस्य बलवत्त्वात्तत्प्रयोगस्य दक्षिणासंस्थाप्यपुनराहारस्तस्यैव सोमस्य पुनःकरणं तत्र च सर्वस्वं दक्षिणा। तत्र तद्यागस्य सर्वस्मिन्नाम्यंतस्यादितिवचनात्॥ ॥द्वादशाहादावहर्गणे यस्मिन्नहनि यस्यां सुत्यायामुद्गातुरपच्छेदो भवति तद्दैवैकमहर्दक्षिणसंस्थाप्यतस्यैवैकस्याह्नः पुनराहारः पुनःकरणं भवति। न सकलस्याहर्गणस्य प्रतिहर्तुरपच्छेदे तु तस्मिन्नेकस्मिन्नहनि सर्ववेदसदानं। सोमयागे दीक्षितस्य पत्नी प्रहारश्च न भवति। तदा रीक्षारूपाणि परिधानवस्त्रोत्तरीयशंकुमेखलादीनि धारयेत्। अत एव निधानोपदेशात्तेषामेव च वासःप्रभृतीनामुपादने। पत्नी वस्त्रोहितस्त्रवनितावंतकाले शालासमीपे सिकतासूपविशेत। सायंकाले अस्तमयादारभ्य नक्षत्रदर्शनपर्यंतं सिकतासु तिष्ठेत्। प्रातःकाले रुयोदयादारभ्य सूर्योदयपर्यंतं सिकतासु तिष्ठेत्। पत्नीव्रतदुधायाम दोहने॥ व्रतमयोत्यहविष्यमश्नीयादित्यामनंतवचनात्। अतो व्रतदुधां धुक्षतिनमेषः। सुत्यासु मेध्यस्थलपत्नीवेदसमीपे सिकतासूपविशेतं सधिवेलयोस्तिष्ठेत सिकतास्वेन। अत्र मार्जालीयसमीपे परि

८७

श्रितं कृत्वा तन्मध्ये सिकतास्ववावस्थाने सर्वत्र शालासमीपइति धूर्तस्वामिनः। रजस्वलाद्वीक्षि
नापेक्षेत न च स्पृशेत्। यदि प्रमादाद्रजस्वला गार्हपत्यादीन् स्पृशति तदा तान् स्पृष्टानग्नीन् परित्यज्य पुनरा
धायमहाभारतोक्तशुचीष्टिः कर्त्तव्या। त्तरवेदिकाग्नीध्रीयशामित्रप्रावर्ग्यधिष्णीपानामसीनां स्पर्शे स्पृष्टान्प
रित्यज्य स्वयोनिमन्तुधानादि होतव्यं। एवं गार्हपत्यतिरिक्ताग्नीनां स्पर्शे सर्वत्र यत्तें अंचंद्रं उ। काष्ठस्पर्शने चैव
तेयं। अस्योपहूतौतूपसमिंधनं। तथा चापस्तंबः। यदिह विःप्रोक्षत्र श्विआमिश्रो सोद्दनेन पत्नेन यत्नेन न
श्वादिस्पृष्टावेसवः समिंधं तामितिपुनरपिमुपसमिध्यादेवं सर्वे घस्युपधामेति। उपसमिधनं च समिद्धस्यापि
पुनः समिधानं। हविःप्रोक्षणग्रहणं पर्युक्षणादिवधुपलक्षणार्थं। चंडालमहापातकिच। रजस्वलाव्यतिरि
क्तोप्रयतस्पर्शे चोपसमिधनं। चांडालमहापातकिस्पर्शे पुनराधानं। रजस्वलास्पर्श तूक्तं। मूत्रपुरीषसंसर्गे
विशेषमाह बौधायनः। अमेध्यस्पर्शने समारोप्य मथित्वा पचमानेष्टिरिति। मृत्तिकाशवस्पर्शे वा उ। आधान
मिति केचित्। अन्ये तु एवं सर्वेष्वात्मरूपधातेष्विति च वनादुपसंमिधनमित्यापस्तंबसूत्रकारिकाभाष्ये। अ

त्रकारिकाकारः।होमिनस्पयहापत्नीकर्ममध्येरजस्वला।समाप्यतरहःकर्मोपरतिर्यतकर्मणः।यजमानस्य
वाग्वंधत्र्रतनिद्रादिकंभवेत्।आत्रिकारात्राग्निकर्त्तव्यंतत्कर्मानधिकारातः।तत्वत्रवचनंयद्दग्निस्यष्टापत्न्य
तिक्रमेइतिपत्न्यांरजस्वलायांसूतिकायांवाप्रारब्धंकर्मक्रियतएतेनिगदाधरः॥तथाचत्रिकांडमंडनः॥
रजोदोषेसमुत्पन्नेसूतकेमृतकेपिव।नित्यंनैमित्तिकंकुर्यात्काम्यंकर्मनकिंचन।आधानेपुनराधानेप
शुःसौत्रामणीतथा॥चातुर्मास्यानिसोमश्चतथैवाग्रयणक्रिया।अकाम्यत्वेपिनैतेषांसूतकादीव
नुष्ठितिः।प्रक्रांतेष्वपिचैतेषुसूतकादिसमुद्भवे।कर्त्तव्यान्येवचैतानिबारिनात्यप्यशासतइति॥चतु
र्मास्येषुचवैश्वदेवपर्वणायागेनसेवरुणप्रघासादिऽनारब्धेष्वपिरजोदोषादिनिमित्तेजातेतामिनि
कर्मकर्त्तव्यान्येवेतिधर्त्तस्वामिनः।अतःप्रारब्धस्यसूतकरजोदोषादावप्यनुष्ठानमेवयुक्तं।नस्युद्दिश्य
तीक्षणं।आधानेतुविशेषः।अर्वाक्स्वर्णप्रदानाच्चेदाधानेस्त्रीरजस्वला।नष्टुद्दोपुनराधानंमात
हजनपूर्वकं।स्यांताते अरणीतत्रयो।निःसैवोत्तरस्तथा॥आधानानंतरं चेत्स्याद्।तोयुक्ता कथंचन।

मणिकादिनकर्तव्यं क्रुषिद्वेवोव्र। वीदिदं। आधानेप्सरणाद्दूर्ध्वं न स्यात्तत्रैव सूतके। मणिकादिनकर्तव्यं
कुर्यादिकादशेहनि॥ बौद्धायनमतादेवं भरद्वाजमतादपि। त्रिरात्रांते रजोदर्शनाच्चतुर्थेहनि स्नात्वा कल्क
नानेनेतयं गोमूत्रमिश्रेणोदकेन तोरजस्वलां स्नापयित्वा वासः परिधानादिसंनिपत्योपकारकं। कर्म
करोति॥ तत्रायं क्रमः। चतुर्थेहनि सूर्योदयानंतरं रजस्वलाया स्नाने। पश्चाद्गोमूत्रमिश्रेणपदेत्क
दकेन प्रतिप्रस्थातकारितेस्नाने। कालाहुति होमः। अनादिष्टवस्त्रपरिधाने। उत्तरीयधारणं। शाला
प्रयाहने। दीक्षणीयानभवस्यमांनिपातिकत्वात्। कुशास्तरणं। नवनीतेनाभ्यंजनं। अभ्यंजने पाव
ने। अंगुल्यंचनं प्राक्तासां विसर्गात्। अंगुष्ठ नत्स हितयोरुत्सर्गः। अपरेण वा प्रवेशने। मेखलाबंध
ने। नीवीकरणं। शिरोवेष्टने। शंकुबंधने। कवडुपरिलेखारोपस्पर्शने। नभूम्युल्लेपने॥ असांनिपा
तिकत्वात्। एवं दीक्षितस्याज्ञातिमरणास्पर्शनादिनिमित्तेस्नानभत्यनेउदकाभ्यवापंपवित्रैवस्नानं
कृत्वा पश्चाद्गोमूत्रमिश्रेणमरंस्करदकेन स्नात्वा कालाहुति सर्वकं वासः परिधानादिसांनिपातिकंक

मर्कर्त्तव्यं। स्तुत्यास्तु च मुष्टिविसर्गांतानां संस्काराणामपवृत्तानामपि स्नानानंतरं पुनः करणं भवस्ये
वेतियाज्ञिकाः। एवं सोमयागमध्ये प्रसूतायाः पत्न्यां दीक्षारूपाणि निधायेत्यादि सर्वं रजस्वलावत् भवति।
अत्र श्री अनंतयाज्ञिकाः प्राहुः। वेदिस्समीपे स्तुत्यासु सिकता चासनं तथा। योग्याभावाद्धृतोनास्या स्ति ष्टेदिति
विधिस्तथेति॥ ॥दीक्षितः स्तरीक्षितौ यजमानः स्वाप्राध्यायनिंदितमानिष्टस्ततकं स्वप्नं दृष्ट्वा कालाहुति वा
चनपूर्वकं पयोवत्तेदुःस्वप्न्यादित्यमुं मंत्रं जपति॥ ॥दीक्षितो रेतः स्कंदने जाते कालाहुति वाचनपूर्वकं यो मे
धपयस इति मंत्रेण स्वां नस्य रेतसः पर्युदकं निनयेत् यदि दीक्षितो नद्यादिस्थामुदकं तरेत्। तदा कालाहु
तिवाचनपूर्वकं उदतीर्बल्वं धत्तेति मंत्रेणातीर्यमणा दुदकमभिमंत्रयते॥ यदि दीक्षितस्योपरि मेधो वर्षे
त्। तदापि उदतीर्बलमित्यनेनैव मंत्रेण शरीरस्थं वर्षोदकं स्वयमेवाभिमंत्रयते। कालाहुतिवाचनपूर्व
कं। यदि दीक्षितो मेध्यं शूद्रं त्ययापिष्ठमूत्रपुरीषादिकं पश्यति तदा कालाहुतिवाचने कृत्वा अबद्धं मन
इति मंत्रेण सूर्यमुपतिष्ठते॥ ॥यदि दीक्षितः प्रयत्नपूर्वकं स्वदेहाद्रुधिरं निष्काशयति। तदाज्यं संस्कृत्य

ब्रह्माहुतिवाचने करोति। ततोध्वर्युः सकृद्गृहीतमाज्यं स्रुचा गृहीत्वाहवनीयपरिस्तरणसमिदाधाने कृ
त्वा रुद्रियाभ्यां स्वाहेति जुहुयात्॥ ॥यदि दीक्षितो निष्ठीवेत्। मुखादुदकश्लेष्मादिबलात् प्रकृत्य निरस्य
त्। तदा हुतिवाचने ब्रह्मा करोति। ततोध्वर्युः सकृद्गृहीतमाज्यं परिस्तरणसमिदाधानपूर्वकमाहवनी
ये वीभत्साभ्यो स्वाहेति जुहोति। यदि दीक्षितो सर्वे दृतिरायेन तूष्णीं गच्छेत्। तदा कालाहुतिवाचनानंत
रं अध्वर्युः सकृद्गृहीतेन वायवे स्वाहेति आहवनीयहोमं कुर्यात्। यदि दीक्षितस्य शरीरे प्रस्वेदो ज्यायते॥ ॥
तदा कालाहुतिवाचनानंतरमध्वर्युः सकृद्गृहीतमाज्यमाहवनीये अद्भ्यो स्वाहेति जुहुयात्॥ ॥यदि दी
क्षितो दिवा स्वप्यात् निद्रां कुर्यात्। तदा कालाहुतिवाचनानंतरं अध्वर्युः सकृद्गृहीतमाज्यं प्रजापतये स्वाहेति
मंत्रेणाहवनीये जुहोति स्मार्त्तमपि दिवास्वापनिषेधाति क्रमनिमित्तं प्रायश्चित्तमत्र भवति। यदि दीक्षित
इष्टवियोगपुत्रमरणादिदुःखनिमित्तमश्रुपातं करोति तदा सर्वं ब्रह्मा कालाहुतिं जुहोति। ततोध्वर्यु
सप्रभ्यो स्वाहेति मंत्रेण सकृद्गृहीतमाज्यमाहवनीये जुहोति। अत्र ब्राह्मण मत्स्यपि भवतीति कारिकाका

हेव०२५
॥७०॥

रः। नेति याज्ञिकाः। दीक्षितो यदा वमति तदा दुग्धं पीत्वा पुनर्वमनं कुर्यात्। अथ वोदकं पीत्वा पुनः। वमनं कु
र्यात्। तत्र कालाहुतिपूर्वकमध्वर्युराहवनीये सकृद्गृहीतमाज्यं बीभत्साभ्यो मघ्यः स्वाहेति मंत्रेण जुहुयात्।
इदं बीभत्साभ्यो मघ्यः पत्न्या अथ एतेषु निमित्तेषु एतान्येव नैमित्तिकानि दीक्षितत्वाद्विशेषात्। मंत्रवर्जमु
पस्थापनं। सोमचमसमध्ये पक्षिणा मूत्रपुरीषादिस्रावणे कृते कालाहुतिः। वाचनं च। ततोध्वर्युः
संस्कृतमाज्यं सकृद्गृहीतमंतरिक्षेण प॥ ततीति मंत्रेणाहवनीये जुहोति इदमग्नये। ततो दुष्टोस्य चम
सोत्तरे पूर्वे ईशानदिग्भागे उपरवे होमः॥ प्रजापतये स्वाहेति मंत्रेण ततस्य वमसस्य पुनरुन्नयनं। अ
नुपाकृतानुपाकृतचमससमाचारसाधारणमिदं प्रायश्चित्तं॥ ॥नाराशंसे तव्यतिरिक्ते वा चम
से भक्षिते सदस्सोमध्याद् इति स्म्राशिते च यदा स्तोत्रस्योपाकरणं भ्रांत्या ज्ञानेनो वा क्रियते तदा चम
सोनुपाकृत इत्युच्यते। तदा पूर्वेकालाहुतिहोमो वाचनं च। ततोनुपाकृतचमससमुत्संगे निधायाध्व
र्युराहवनीयसमिदाधानपूर्वं सकृद्गृहीतेनाज्येनाहुतिं जुहुयादग्न आयाहि वीतय इति मंत्रेण इदम

७०

द्ग्ये।आज्येनाभक्षपाकृतस्यजुहुयादितितांघ्रब्राह्मणेश्रवणात्।तथाचशांखायनः।हिरण्यगर्भइत्यभक्ष
पाकृतेजुहुयाद्वष्ट्वाद्यचनिहरेतिदिति।तेनाभक्षपाकृतस्यचसमस्यसहसोनिःकाशनमुत्तरीयेणा
नेनवाछाद्यकार्यं।अथवाअभक्षपाकृतंचमसमुत्संगेनिधायाध्वर्युर्हिरण्यगर्भःसमवर्त्तताग्रइष्टचाऽऽअ
ग्नीध्रीयेसकृद्गृहीतेनाज्येनसमिद्धाधानहविकामाहुतिंजुहुयात्।इदंप्रजापतये।कस्मैइतिवा।तथाच
एतिकात्यायनीयानामध्वर्युणांसूत्रंयस्यचमसोऽभक्षपाकृतःस्यात्तमेनमुत्तरसिचाववधायसर्वया
द्वारासहसोपनिर्हृत्यपुरस्तादाग्नीध्रीयस्यनिधायाज्येनजुहुयादिति।तथाचसूत्रांतरे।।आज्येनाभक्ष
पाकृतस्यजुहुयादित्युक्तेविमन्येहाज्याहुतेरेवमतीयामितितनोऽभक्षपाकृतस्यचमसस्यभक्षणंनतत्रा
प्यायमनोराशंसश्वेत।अन्यश्चेत्प्रक्षालनमितियथाविहितंकुर्यात्।तथाचलौगाक्षिसूत्रे।सदस्य
भक्षपाकृतेचमसेरिक्तेहिरण्यगर्भइतिद्वाभ्यांजुहुयादितिमानवेच।सदसिवेच्चमसमभक्षपाकुर्याद्धि
रण्यगर्भइत्याग्नीध्रीयेपूर्णाहुतिंजुहुयादिति।। ।।हुतस्यसोमस्यग्रहचमसादिस्थस्याभक्षितस्यअ

हेव॰२५ हुतेनसोमेनसहसंसर्गेजातेतत्कालमेवकालाहुतिवाचनेकृत्वा आहवनीयाग्नेःसकाशादेकंपुष्टंज्वा
॥७१॥ लारहितमंगारंहोमसमर्थंदक्षिणस्यांदिशिपरिधीनांमध्येतत्समीपएवपृथक्कृत्वानिधायदर्भैस्तत्पोनग्रहच
मसादिस्कंतेसंस्पृष्टसोमान्तमिस्त्रपृथक्कृतेंगारध्वर्युर्जुहोतिहुतस्यचाहुतस्यबोतमंत्रेणइदमिंद्राग्नि
भ्यां।ततएवमेवचुवहुतेस्वाहेतिद्वितीयामाहुतिंजुहोति।इदंचुकृते।तस्यसंपृष्टसोमस्यतद्देवभक्षणाय
थाधिकारं।प्रायश्चित्तहोमकर्त्त्वाध्वर्यौश्चितत्रभक्षमंत्रेविशेषः।माप्युत्तमानंतमो।विद्दानिदिति।ततः।
संसृष्टस्यग्रहवसादेर्यथाविहितेग्रहणमुत्रयनवाकार्यौहुताहुतौ।सोमौपीतापीतोवासंगच्छेयातांयत्तस्य
हिस्त्वइतिद्वाभ्यांबहिष्परिध्यंगारेशिषंनिनयोदितिकः।के।तथामानवसूत्रे।यदिहुताहुतोवासोमो
वासोमोवासंसृज्येयातांमंतःपरिध्यंगारान्दक्षिणायोल्हहु।तस्यवेतिजुहुयादिति।नाराशंसेषुविशे
षःशांखायने।अभ्यक्तनीतेभाराशंसंहुताहुतस्याल्पपतमित्यंतःपरिधिभस्मनिजुहोतिभस्मनिहोमो
विहितः।होमाभिषवनिमित्तरसाकर्षाःमिश्रःसोमवद्दष्टस्कच्यने।तस्मात्स्याइद्धवर्यैर्नाराशंसस्यापि ॥७५॥

भक्षणं वाचनात्॥ ॥यद्याग्रहचमसं वा विस्रुत सोमस्यापरि सोमो वर्षति स वर्षबिंदुमिश्रः सोमो वद्दु
ष्ट इत्युच्यते। तस्य दुष्टत्वान्नैव विहितं यथा॰प्राकृतेयागं कृत्वा स्वावसर एव तस्यावदुष्टस्य सोमस्य भक्ष
णे इंदुरिंदुमवगादित्येनेन मंत्रेण यागात्पूर्वमेव यत्कालाहुतिवाचने भवतः॥ मंत्रांतरोपदेशात्प्राकृत
स्य भक्षमंत्रस्य निवृत्तिः प्रतिसवनं भक्षमंत्रे विशेषः। इंदुरिंदुमवागान्नस्य यावतो गायत्रछंदसः सवग
णस्येति तृतीयसवनं। सर्वेषु सवनेषु अंछंदसं हुतः शाक्वर्जितं इंदुरिंतिश्च वदुष्टसोमस्य भक्षणमंत्रे के
चित्सकुर्वते। इंदुरिंदुमइंद्रियावतः सर्वगणस्यात्यवं॥ ॥यदि चमसस्थः सोमस्कंदति तदा कालाहुतिः
वाचनं च। ततो भूम्यां दैववत्सस्य सोमस्यांस्कंनन्यर्जन्य इत्यालंभं अध्वर्युः करोति। यद्यचमसस्थः सो
मोऽमेध्यपातश्वाद्युपघ्राणादिना दुष्टो भवति तदा कालाहुतिवाचने कृत्वा तेन च समस्थं दुष्टं सोमं॰त्तरप
वैइशान दिक्स्थे उपरवे प्रजापतये स्वाहेति मंत्रेणाध्वर्युर्जुहोति। तादृशे सोममात्रस्य दुष्टस्यात्र होमउक्तः।
प्रजापतये स्वाहेति मंत्रेणाध्वर्युर्जुहोति। तादृशे सोममात्रस्य दुष्टस्यात्र होमउक्तः। प्रजापतये स्वाहेत्यभ

दे०२५ ॥७२॥

क्षणीयस्य जुहुयादुन्नरस्य वर्षमिन्द्रमुपरवेद् इति। काटकेचाह विदुष्टमयो वनयेरस्सोमं दुष्टं मनसा प्रजापतये स्वाहेत्य
भक्षणायानुपरवे चवनयेदिति। दुष्टस्य च पुनरुत्त्रयनं कार्यं यत्र होमो धिषवणफलके उदन्त्य कार्यः काटके
दर्शनात्। अथयस्य मसव्याति रिक्ताः सर्वे ग्रहादि स्थाः सोमा भवंति। तान्नुष्टानग्नेयस्वाहेति मंत्रेणाध्वर्युर्ग्र
हामाः स्तनार्ये रवरे जुहुयात्। अत्रापि सर्वकाल्लाहुति वाचने भवत एव। ततो यथाविहितं तेषां विनष्टानां
सोमानां पुनः संपादनं कार्यं। यदि नाराशंसमः श्वमसः शुष्यति। तदा काल्लाहुति वाचन सर्वकिं आग्रहणात्
उन्नयं कार्यं। तदुक्तं श्रौतौ सय दि राजो परस्येत्तमत एव तन्वीरन् यदि राजा सोमे ग्रहेषु चमसादौ वा उपद
स्येदुपक्षीणो त्स्यो भवेत्। तमत आग्रयणादेव तन्वीरन् वर्द्धयेयुः। विस्तारयेयुः कार्यसमर्थं कुर्युः। सत्यत्रोक्त
कौसावित्रपालीवतहारियोजनोपक्षीणा नाग्रयणादिति। अथवा अथवा अन्यात्गृह्णात्। शुष्कनार
शंससमीपे भवान् गृहीतादेशं स्त्रवैश्वदेवमरुत्वतीयमाहेंद्रमहावैश्वदेवानामन्यतमस्मात्समीपवर्त्ति ॥७२॥
नाग्राहात् स्नह स्तोमान्नेतरेस्तं कं सोमे शुष्केनाराशंसचमसे आसिच्य भक्षयेयुः। तथाच सूत्रांतरं। यदि

नाराशंसेषु उपरस्येघमध्वर्युः पूर्वं ग्रहे ग्रहीयात्तेन वषट्कृतानुवषट्कृते हुत्वा चमसाध्वर्यवे प्रयच्छेत्ते
नैनं भक्षमाप्याययतीति।तथा च मानवे।यद्दि नाराशंसा उदस्येयुर्यंयं ग्रहमुपतिष्ठेरंस्तस्य तस्य बिंदुम
